बृहस्पतंयेहुविषांव्विधेमुस्वाहां ॥ ७ ॥ व्विश्वोंदेवस्यं ॥ व्विश्वों

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवस्यनेतुर्म्मर्त्तोवुरीतसुक्रयम् ॥ विश्वोरायऽइषुद्युतिद्युम्नंवृ
णीतपुष्यसेस्वाहा ॥८॥ [२-३] ऋक्सामयोःशिल्पे ॥ ऋक्सा
मयोःशिल्पेस्थस्तेवामारभेतेमापातमास्ययज्ञस्योदृचः ॥ श
र्म्मासिशर्म्ममेयच्छनमस्तेऽअस्तुमामाहिꣳसीः ॥ ९ ॥ ऊर्ग्गै
सि ॥ ऊर्ग्गस्याङ्गिरस्यूर्ण्णम्म्रदाऽऊर्ज्जमयिधेहि ॥ सोमस्यनी
विरसिविष्णोः शर्म्मासिशर्म्मयजमानस्येन्द्रस्ययोनिरसिसुस
स्याःकृषीस्कृधि ॥ उच्छ्रयस्ववनस्पतऽऊर्द्ध्वोमापाह्यꣳहसऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्ययज्ञस्योदृचं÷ ॥ १० ॥ [२-४] व्रतङ्कृणुत । व्रतङ्कृणुता
ग्निर्ब्रह्माग्निर्यज्ञोवनस्पतिर्यज्ञियं÷ ॥ दैवीन्धियंम्मनाम
हेसुमृडीकामभिष्टयेवर्चोधाँयज्ञवाहसꣳसुतीर्थानोऽअसद्व
शे॥येदेवामनोजातामनोयुजोदक्षंक्रतवस्तेनोवन्तुतेन÷पान्तु
तेभ्यꣳस्वाहा ॥ ११ ॥ श्वात्राःपीताः ॥ श्वात्राःपीताभवतयूय
मापोऽअस्माकमन्तरुदरेसुशेवा÷ ॥ ताऽअस्मभ्यंमयक्ष्मा

१ अत्र वृतम् कृणुत इति पदम् । स्पर्शे परपञ्चमम् (शु. य. प्रा. ४ अ. १२ सू.) इत्यनेन मकारस्य स्पर्शवर्णपरे स्पर्शवर्णस्य पञ्चमाक्षरो भवति तेन ङकारः । एतन्ते तत्र नकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽअनमीवाऽअनागसुꣳस्वदन्तुदेवीरमृताऽऋतावृधः ॥ १२ ॥ इयन्ते । यज्ञियातनूरपोमुञ्चामिनप्रजाम् ॥ अहꣳहोमुचꣳ स्वाहाकृताꣳपृथिवीमाविशतपृथिव्यासम्भव ॥ १३ ॥ अग्ने त्त्वम् ॥ अग्नेत्त्वꣳसुजागृहिवयꣳसुमन्दिषीमहि ॥ रक्षाणोऽ अप्प्रयुच्छन्प्रबुधेनꣳपुनस्कृधि॥ १४॥पुनर्म्मनः ॥ पुनर्म्मनुꣳपु नरायुर्म्मऽआगन्पुनः ॥ प्राणःपुनरात्कमामऽआगन्पुनश्चक्षुꣳ

१ पुनस्कृधि । अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (ऋ. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वे प्राप्ते ऋवर्णे (ऋ. य. प्रा. ४ अ. १११ सू.) इत्यनेन ऋवर्णपरे स्पर्शे निषेधान्न ककारस्य द्वित्वम् । यत्र यत्र ऊष्मभ्योऽन्तःस्थेभ्यश्च परः स्पर्शवर्णः ऋविशिष्टश्चेत्तत्र तत्र द्वित्वाभावो ज्ञेयः । यथा-कृपीस्कृधि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः श्रोत्रम्मऽआगन् ॥ वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्नः पातुदुरितादवद्यात् ॥ १५ ॥ त्वमग्ने । व्रतपाऽअसिदेवऽआमर्त्येष्वा ॥ त्वँयज्ञेष्वीड्यः ॥ रास्वेयत्सोमाभूयोभरदेवोनः सवितावसोर्दातावस्वदात् ॥ १६ ॥ [६-५]
एषाते । शुक्रतनूरेतद्वर्चस्तयासम्भवब्भ्राजङ्गच्छ ॥ जूरसि धृतामनसाजुष्टाविष्णवे ॥ १७ ॥ तस्यास्ते । सत्त्यसवसः प्रसवेतन्वोयन्त्रमशीयस्वाहा ॥ शुक्रमसिचन्द्रमस्यमृतमसिवै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वदेवमसि ॥ १८ ॥ चिदसि । मनासिधीरसिदक्षिणासिक्षत्रियासियज्ञियास्यदितिरस्युभयतःशीर्ष्णी ॥ सानुःसुप्राची सुप्रतीच्येधिमित्रस्त्वापदिबध्नीताम्पूषाद्धनस्पात्त्विन्द्राया द्यक्षाय ॥ १९ ॥ अनुत्त्वा । मातामन्यतामनुपितानुभ्रातासगुभ्योनुसखासयूथ्यः ॥ सादेविदेवमच्छेहीन्द्रायसोमꣳरुद्रस्त्वावर्त्तयतुस्वस्तिसोमसखापुनरेहि ॥ २० ॥ [४-६] वस्व्यसि ॥ वस्व्यस्यदितिरस्यादित्यासिरुद्रासिचन्द्रासि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतिष्ट्वासुम्नेरम्णातुरुद्रोवसुभिराचके ॥ २१ ॥ अदि
त्यास्त्वा । मूर्द्धन्नाजिघर्म्मिदेवयजनेपृथिव्याऽइडायास्पद
मसिघृतवत्स्वाहा ॥ अस्मेरमस्वास्मेतेबन्धुस्त्वेरायोमेरायो
माव्वयꣳरायस्पोषेणव्वियौष्मुतोतोरायः ॥ २२ ॥ समक्ख्ये ।
देव्याधियासन्दक्षिणयोरुचक्षसा ॥ मामऽआयुःप्रमोषीर्म्मोऽ
अहन्तवव्वीरंव्विदेयतवदेविसन्दृशि ॥ २३ ॥ [३-७] एषते ।

१ समक्ख्ये । अत्र स्वरात्संयोगा० (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन खकारस्य द्वित्वे जाते प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः (शु. य. प्रा. ४ अ. १०८ सू.) इत्यनेन खस्थाने ककारो विहितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गायत्रोभागऽइतिमेसोमायब्रूतादेषतेत्रैष्टुभोभागऽइतिमेसो
मायब्रूतादेषतेजागतोभागऽइतिमेसोमायब्रूताच्छन्दोनामा
नाꣳसाम्म्राज्यङ्गच्छेतिमेसोमायब्रूतादास्म्माकोसिशुक्रस्त्ते
ग्रह्योविचितस्त्वाविचिन्वन्तु ॥ २४ ॥ अभित्त्यम् ॥ अभि
त्त्यन्देवꣳसवितारमोण्योः कविक्रतुमर्चामिसत्त्यसवꣳरत्नधा
मभिप्रियम्मतिङ्गविम् ॥ ऊर्द्ध्वायस्यामतिर्भाऽअदिद्युतत्सवी

॥ २९ ॥

१ देवꣳसवितारमोण्योः । अत्र देवम् इत्यस्य मकारस्य अनुस्वारं रोष्मसु मकारः (शु. य. प्रा. ४ अ-१ सू.) इत्यनेन उष्मणि सकारे परे अनुस्वारे अथानुस्वारस्य गूंमित्यादेशः शषसहरेफेषु (का. प. १ सू.) इत्यनेन (गूंकारे) कृते गूंविशिष्टं रूपम् । एवम् उरुꣳहिराजा । अꣳहोमुचः । इत्यादिस्थलेषु गूंकारोऽनेन ज्ञेयः । वयꣳसुम. । अग्ने त्वꣳसुजा. । सोमꣳरुद्रस्त्वा. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनिहिरंण्यपाणिरमिमीतसुक्रतुं÷कृपास्वं÷ ॥ प्रजाभ्यंस्त्वा
प्प्रजास्त्वांनुप्प्राणंन्तुप्प्रजास्त्वमंनुप्प्राणिहि ॥२५॥[२-८]
शुक्रन्त्वां । शुक्रेणंक्रीणामिचुन्द्रञ्चुन्द्रेणामृतंमृतेंन ॥ सुग्मे
तेगोरस्मेतेंचुन्द्राणितपंसस्तुनूरंसिप्प्रजापंतेर्व्वर्ण्णं÷परमेणंपु
शुनांक्रीयसेसहस्रपोषम्पुंषेयम् ॥२६॥ मित्रोनं÷ ॥ मित्रोनुऽए
हिसुमित्रधऽइन्द्रंस्योरुमाविंशुदक्षिणमुशन्नुशन्तंꣳस्योनꣳस्यो
नम् ॥ स्वानुभ्राजाङ्घारेबम्भारेहस्तुसुहंस्तुकृशांनवेतेवं÷सोमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रयंणास्त्ताब्रंक्षद्धम्मावोंदभन् ॥ २७ ॥ परिंमा । ग्नेदुश्चंरिता
द्बाधस्वामासुचंरितेभज ॥ उदायुंषास्वायुषोदंस्त्थाममृताँ २ ॥
ऽअनुं ॥ २८ ॥ प्रतिपन्थांम् ॥ प्रतिपन्थांमपद्महिस्वस्त्तिगा
मंनेहसंम् ॥ येनुविश्वाःपरिद्विषोंवृणक्तिंविन्दतेवसुं ॥ २९ ॥
[४-९] अदिंत्त्यास्त्त्वक् ॥ अदिंत्त्यास्त्त्वगस्यदिंत्त्यैसदुऽआ
सींद ॥ अस्त्तंब्भ्नाद्यांवृंषभोऽअन्तरिंक्षममिंमीतवरिमाणंम्पृ
थिव्याः ॥ आसींदुद्विश्वाभुवंनानिसम्राड्विश्वेत्तानिवरुंणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतानि ॥ ३० ॥ वनेषुवि ॥ वनेषुव्यन्तरिक्षन्ततानुवाजम
र्वत्सुपयऽउस्रियासु ॥ हृत्सुक्रतुंवरुणोविक्ष्वग्निन्दिवि
सूर्य्यमदधात्सोममद्रौ ॥ ३१ ॥ सूर्य्यस्यचक्षुः ॥ सूर्य्यस्य
चक्षुरारोहाग्नेरक्ष्णः कनीनकम् ॥ यत्रैतंशोभिरीयसेभ्राजमा
नोविपश्चिता ॥ ३२ ॥ उस्रावेतम् ॥ उस्रावेतन्धूर्षाहौयुज्ये
थामनुश्रूऽअवीरहणौब्रह्मचोदनौ ॥ स्वस्तियजमानस्यगृहा

१ अत्र स्वरात्संयोगा० (शु. यं. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वे प्राप्ते न क्षवृचिश्विसतयेभ्यस्त्रैकम् (शु. य. प्रा. ६ अ. २७ सू.) इत्यने-
नैतेभ्यः परस्य त्रशब्दस्य द्वित्वं न भवति तेन क्षत्र, वृत्र, चित्रम्। श्वित्रम्, सत्रस्य। तत्र गच्छ, यत्र पूर्वे। इत्येतेषु द्वित्वाभावो ज्ञेयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्गच्छतम् ॥ ३३ ॥ भद्रोमे । सिप्प्रऋयंवस्वभुवस्पतेविश्वा
न्यभिधामानि ॥ मात्त्वापरिपरिणोविदुन्मात्त्वापरिपन्थिनो
विदुन्मात्त्वावृकाऽअघायवोविदन् ॥ श्येनोभूत्त्वापरापतुयजं
मानस्यगृहान्गच्छतन्नौसँस्कृतम् ॥ ३४ ॥ नमोमित्रस्य ॥ नमो
मित्रस्यवरुणस्यचक्षसेमहोदेवायतदृतꣳसपर्य्यत ॥ दूरेदृशेदेव
जातायकेतवेदिवस्पुत्रायसूर्य्यायशꣳसत ॥ ३५ ॥ वरुणस्यो
त्तम्भनम् ॥ वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्वरुंणस्यऽऋतुसदंन्यसिव्वरुंणस्यऽऋतुसदंनमासिव्वरुंणस्यऽऋतु
सदंनुमासींद ॥ ३६ ॥ यातें ॥ यातेधामांनिहुविषायजंन्ति
तातेव्विश्वांपरिभूरंस्त्तुयुज्ञम् ॥ गुयुस्प्फानं÷प्प्रतरंणः्सुवीरो
वींरहाप्प्रचंरासोमुदुर्य्यांन् ॥ ३७ ॥ [८-१०] इतिश्रीवाज
सनेयसंहितायांचतुर्थोऽध्यायः ॥ ४ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाकसूत्रम्–अग्नेस्तनू, रापतयेत्वाचतुष्कौ, तप्तायनीमेद्वे,
इन्द्रघोषस्त्वास्तिस्त्रो, युंजतेमनाष्टौ, देवस्यत्वाचतस्त्रो, देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यत्वापंच, विभूरसिचतस्रो, ज्योतिरसिष, डुरुविष्णोतिस्रो,
दश त्रिचत्वारिꣳशत् ॥ [अ. ५ मं. ४३-अनु० १०] हरिः ॐ ॥
अग्नेस्त्तनूः ॥ अग्नेस्त्तनूरसिविष्णवेत्त्वासोमस्यतनूरसिवि
ष्णवेत्त्वातिथेरातित्थ्यमसिविष्णवेत्त्वाश्श्येनायत्त्वासोम
भृतेविष्णवेत्त्वाग्नयेत्त्वारायस्पोषदेविष्णवेत्त्वा ॥ १ ॥
अग्नेर्जनित्रम् ॥ अग्नेर्जनित्रमसिवृषणौस्थऽउर्वश्श्यस्या
युरसिपुरूरवाऽअसि ॥ गायत्रेणत्त्वाच्छन्दसामन्थामित्रैष्टुभे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्त्वाच्छन्दसामन्थामिजागतेनत्त्वाच्छन्दसामन्थामि ॥ २ ॥
भवतन्नः ॥ भवतन्नुःसमनसौसचेतसावरेपसौ ॥ मायज्ञ६
हिं६सिष्टम्मायज्ञपतिज्ञातवेदसौशिवौभवतमद्यनः ॥ ३ ॥
अग्नावग्निः ॥ अग्नावग्निश्चरतिप्रविष्टऽऋषीणाम्पुत्रोऽअ
भिशस्तिपावा ॥ सनः स्योनःसुयजायजेहदेवेभ्योहव्य६
सदुमप्प्रयुच्छन्त्स्वाहा ॥ ४ ॥ [४-१] आपतयेत्त्वा ॥ आ
पतयेत्त्वापरिपतयेगृह्णामितनूनप्त्रेशाक्करायशक्कनुऽओजि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठाय ॥ अनाधृष्टमस्यनाधृष्ट्यन्देवानामोजोनभिशस्त्याभि
शस्तिपाऽअनभिशस्तेन्यमङ्गसासुत्यमुपगेषꣳस्वितेमाधाꣳ
॥ ५ ॥ अग्नेव्रतपाः ॥ अग्नेव्रतपास्त्वेव्रतपायातवतनूरियꣳ
सामयियोममतनूरेषासात्त्वयि ॥ सुहनौव्रतपतेव्रतान्यनुमे
दीक्षान्दीक्षापतिर्मन्यतामनुतपस्तपस्पतिः ॥ ६ ॥ अꣳ
शुरꣳशुष्टे । देवसोमाप्यायतामिन्द्रायैकधनविदे ॥ आतुब्भ्यु
मिन्द्रꣳप्यायतामात्त्वमिन्द्रायप्यायस्व ॥ आप्यायय्यास्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्सखींन्त्सुन्यामेधयांस्वस्तितेदेवसोमसुत्त्यामंशीय ॥ एष्टा
रायꣳप्प्रेषेभगायऽऋतमृतवादिब्भ्योनमोद्यावापृथिवीब्भ्याम्
॥ ७॥ यातें ॥ यातेऽअग्नेयꣳशुयातुनूर्व्वर्षिष्ठागह्वरेष्ठा ॥ उग्रं
व्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्स्वाहा ॥ यातेऽअग्नेरजꣳ
शुयातुनूर्व्वर्षिष्ठागह्वरेष्ठा ॥ उग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽ
अपावधीत्स्वाहा ॥ यातेऽअग्नेहरिशुयातुनूर्व्वर्षिष्ठागह्वरेष्ठा ॥
उग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्स्वाहा ॥ ८॥ [४-२]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुप्तायनीमे ॥ तुप्तायनीमेसिद्वित्तायनीमेस्यवतान्मानाथिता
दवतान्माव्यथितात् ॥ द्विदेदुग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयु
नानाम्नेहियोस्याम्पृथिव्यामसियत्तेनाधृष्टुन्नामयुज्ञियुन्तेनु
त्त्वादधेद्विदेदुग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुनानाम्नेहियो
द्वितीयस्याम्पृथिव्यामसियत्तेनाधृष्टुन्नामयुज्ञियुन्तेनुत्त्वादधे
द्विदेदुग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुनानाम्नेहियस्तृतीय
स्याम्पृथिव्यामसियत्तेनाधृष्टुन्नामयुज्ञियुन्तेनुत्त्वादधे ॥ अनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्वादेववीतये ॥ ९ ॥ सिंहयसि । सपत्नसाहीदेवेभ्यः कल्प स्वसिंहयसिसपत्नसाहीदेवेभ्यः शुन्धस्वसिंहयसिसपत्न साहीदेवेभ्यः शुम्भस्व ॥ १० ॥ [२-३] इन्द्रघोषस्त्वा ॥ इन्द्र घोषस्त्वावसुभिः पुरस्तात्पातुप्रचेतास्त्वारुद्रैः पश्चात्पातुम नोजवास्त्वापितृभिर्दक्षिणतः पातुविश्वकर्म्मात्त्वादित्यैरुत्तर तः पात्त्विदमहन्तुप्संवार्बहिर्द्धायज्ञान्निःसृजामि ॥ ११ ॥

१ अत्र अनुस्वारं रोष्मसु मकारः (शु. य. प्रा. ४ अ० १ सू.) इत्यनेन मकारस्यानुस्वारे कृते अथानुस्वारस्य गूमित्यादेशः शषसहरेफेषु (शु. य. प्रा. परिशि. सू.) इत्यनेन दीर्घगूंकारे प्राप्ते नानुस्वारः (शु. य. प्रा. ४ अ. १०९ सू.) इत्यनेन स्योन इति संयोगे परे सकारे न दीर्घगुंकारः किन्तु ह्रस्वः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि॒ꣳह्य॒सि ॥ सि॒ꣳह्य॒सि॒स्वाहा॑सि॒ꣳह्य॒स्यादि॑त्त्य॒वनि॒ꣳस्वाहा॑
सि॒ꣳह्य॒सिब्र॑ह्म॒वनि॑ꣳक्षत्र॒वनि॒ꣳस्वाहा॑सि॒ꣳह्य॒सिसु॑प्रजा॒व
नी॑रायस्पोष॒वनि॒ꣳस्वाहा॑सि॒ꣳह्य॒स्याव॑हदे॒वान्यज॑मानायु॒स्वा
हा॑भू॒तेभ्य॑स्त्त्वा ॥ १२ ॥ ध्रु॒वोसि । पृथि॒वीन्दृꣳह॑द्ध्रु॒क्षिद॑स्य॒
न्तरि॑क्षन्दृꣳहाच्च्यु॒तक्षिद॑सि॒दिव॑न्दृꣳहा॒ग्नेः पुरी॑षमसि ॥ १३ ॥
[३-४] यु॒ञ्जते॒मन॑ꣳ ॥ यु॒ञ्जते॒मन॑ऽउ॒तयु॑ञ्जते॒धियो॒विप्रा॒वि
प्र॑स्यबृह॒तोवि॑प॒श्चित॑ꣳ ॥ विहोत्रा॑दधेवयुना॒विदेक॒ऽइन्मही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवस्यसवितुः परिष्टुतिः स्वाहा ॥ १४ ॥ इदंविष्णुः ॥ इदं
विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा ँसुरेस्वाहा
॥१५॥ इरावतीधेनुमती ॥ इरावतीधेनुमतीहिभूतꣳसूयवसिनी
मनवेदशस्या ॥ द्यंस्कम्भ्नारोदसीविष्णवेतेदाधर्त्थपृथिवीम्
भितोमयूखैः स्वाहा ॥ १६ ॥ देवश्रुतौदेवेषु ॥ देवश्रुतौदेवेष्वा
घोषतम्प्राचीप्रेतमध्वरङ्कल्पयन्तीऽऊर्द्ध्वंयज्ञन्नयतम्माजिह्व
रतम् ॥ स्वङ्गोष्ठमावदतन्देवीदुर्य्येऽआयुर्म्मानिर्वादिष्टम्प्रजा

१ अत्र रकारात्परस्य यकारस्य परंतु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यनेन द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्मानिर्वाँदिष्टुमत्रंरमेथांवृष्मँन्पृथिव्याः ॥ १७ ॥ विष्णोर्नु ।
कंवीर्याणिप्रवोचँयः पार्थिवानिविममेरजाँसि ॥ योऽ
अस्कंभायदुत्तरꣳसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णंवे
त्त्वा ॥ १८ ॥ दिवोवा । विष्णऽउतवापृथिव्यामहोवाविं
ष्णऽउरोरन्तरिक्षात् ॥ उभाहिहस्ताव्वसुनापृणस्वाप्रयच्छद
क्षिणादोतसव्याद्विष्णंवेत्त्वा ॥ १९ ॥ प्रतत् ॥ प्रतद्विष्णुं

१ अत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वम् ॥ यथा–विष्णाऽउत वा । विष्णऽ उरोर० । द्विष्णवे त्वा । प्रतद्विष्णुः । विष्णोरराटम् । इत्यादिषु बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्तवतेवीर्य्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषु
विक्रमणेष्वधिक्षियन्तिभुवनानिविश्वा ॥ २० ॥ विष्णोरराटम् ॥ विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्द्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्त्वा ॥२१॥ [८-५]
देवस्यत्त्वा । सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ आददेनार्य्यसीदमहꣳरक्षसाग्रीवाऽअपिकृन्तामि ॥
बृहन्नसिबृहद्रवाबृहतीमिन्द्रायवाचंवद ॥ २२ ॥ रक्षोहणंव

सं. ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लगुहनम् ॥ रक्षोहणंव्वलगुहनंव्वैष्णवीमिदमुहन्तंव्वलुगमुत्तिंक
रामियम्मेनिष्ट्योयमुमात्त्योनिचुखानेदमुहन्तंव्वलुगमुत्तिंकरा
मियम्मेंसमानोयमसंमानोनिचुखानेदमुहन्तंव्वलुगमुत्तिंकरा
मियम्मेसबंन्धुर्य्यमसंबन्धुर्न्निचुखानेदमुहन्तंव्वलुगमुत्तिंकरा
मियम्मेंसजातोयमसंजातोनिचुखानोत्कृत्याङ्किंरामि॥२३॥
खुराडंसि । सपत्क्रुहासंत्रुराडंस्यभिमातिहाजंनुराडंसिरक्षोहा
संर्व्वराडंस्यमित्रुहा ॥ २४ ॥ रक्षोहणोंवः ॥ रक्षोहणोंवोव्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लगुहनुंप्प्रोक्षामिवैष्णुवान्त्रंक्षोहणौवोवलगुहनोवंनयामिवै
ष्णुवान्त्रंक्षोहणौवोवलगुहनोवंस्तृणामिवैष्णुवान्त्रंक्षोहणौवां
वलगुहनाऽउपंदधामिवैष्णुवीरंक्षोहणौवांवलगुहनौपर्य्यूहा
मिवैष्णुवीवैष्णुवमंसिवैष्णुवास्त्थं ॥ २५॥ [४-६] देवस्यं
त्त्वा । सवितुःप्प्रंसुवेश्विनोर्बाहुभ्यांम्पूष्णोहस्त्तांभ्याम् ॥
आदंदेनार्य्यसीदमुहंरक्षंसाङ्ग्रीवाऽअपिंकृन्तामि ॥ यवोंसि
युवयास्म्मद्वेषोंयुवयारांतीर्द्दिवेत्त्वान्तरिंक्षायत्त्वापृथिव्यैत्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥ २६ ॥ उद्दि
वम् ॥ उद्दिवꣳस्तभानान्तरिक्षम्पृणद्दृꣳहस्वपृथिव्यान्द्युतान
स्त्वामारुतोमिनोतुमित्रावरुणौद्रुवेणधर्म्मणा ॥ ब्रह्मवनि
त्वाक्षत्रवनिरायस्पोषवनिपर्य्यूहामि ॥ ब्रह्मदृꣳहक्षत्रन्दृꣳ
हायुर्दृꣳहप्प्रजान्दृꣳह ॥ २७ ॥ ध्रुवासि । ध्रुवोयँयजमानो
स्मिन्नायतनेप्प्रजयापशुभिर्भूयात् ॥ घृतेनद्यावापृथिवी
पूर्य्येथामिन्द्रस्यच्छदिरसिविश्वजनस्यच्छाया ॥ २८ ॥ परि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्वा । गिर्व्वणोगिरऽइमाभवन्तुविश्वतः ॥ वृद्धायुमनुवृद्ध्यो
जुष्टाभवन्तुजुष्टयः ॥ २९ ॥ इन्द्रस्यस्यूः ॥ इन्द्रस्यस्यूरसी
न्द्रस्यध्रुवोसि ॥ ऐन्द्रमसिवैश्वदेवमसि ॥ ३० ॥ [५-७]
विभूरसि । प्रवाहणोवह्निरसिहव्यवाहनः ॥ श्वात्रोसिप्रचे
तास्तुथोसिविश्ववेदाऽउशिगसि ॥ ३१ ॥ उशिगसि । कवि
रङ्घारिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीयः
सम्राडसिकृशानुः परिषद्योसिपवमानोनभोसिप्रतक्वामृष्टो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिहव्युसूदंनऽऋतधांमासिस्वज्योंतिꣳसमुद्रोसि ॥ ३२ ॥ समुद्रोसि। विश्वव्यंचाऽअजोस्येकपादहिंरसिबुध्न्योवागंस्यैन्द्रमंसिसदोस्यृतंस्यद्वारौमामासन्तांप्सुमद्धंनामद्धपतेप्रमांतिरस्वस्तिमेस्मिन्नपथिदेवयानेंभूयान्मित्रस्यंमा ॥ ३३ ॥ मित्रस्यंमा ॥ मित्रस्यंमा चक्षुंषेक्षद्धमग्न्यंयꣳसगराꣳसगंरास्त्थसगंरेणनाम्नारौद्रेणानीकेनपातमांग्न्नयꣳपिपृतमांग्न्नयोगोपायतंमानमोंवोस्त्तुमामांहिꣳसिष्ट ॥ ३४ ॥ [४-८] ज्योतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसि । विश्वरूपंविश्वेषान्देवानांꣳसमित् ॥ त्वꣳसोमतनू
कृद्भ्योद्वेषोभ्योन्यकृतेभ्यऽउरुयन्तासिवरूथꣳस्वाहाजुषा
णोऽअप्सुराज्यस्यवेतुस्वाहा ॥ ३५ ॥ शतम् ॥ २०० ॥
अग्नेनय । सुपथारायेऽअस्म्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोद्धयस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंविधेम
॥ ३६ ॥ अयन्नः ॥ अयन्नोऽअग्निर्वरिवस्कृणोत्त्वयम्मृधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरऽएतुप्प्रभिन्दन् ॥ अयंवाजांञ्जयतुवाजसातावयꣳशत्रू
ञ्जयतुजर्हृषाणꣳस्वाहा ॥ ३७ ॥ उरुविष्णो ॥ उरुविष्णो
विक्रमस्वोरुक्षयायनस्कृधि ॥ घृतङ्घृतयोनेपिबप्प्रप्प्रयज्ञपति
न्तिरस्वाहा ॥ ३८ ॥ देवसवितः ॥ देवसवितरेषतेसोमस्तꣳ
रक्षस्वमात्त्वादभन् ॥ एतत्त्वन्देवसोमदेवोदेवाँ २ ॥ ऽउपा
गाऽइदमहम्मनुष्ष्यान्त्सहरायस्पोषेणस्वाहानिर्व्वरुणस्यपा

१ अत्र वाजान् जयतु इति पदे तकारवर्गश्चकारवर्गे चकारवर्गम् । (शु. य. प्रा. ४ अ. ९५ सू.) इत्यनेन वाजान् पदघटिततवर्गस्य नकारस्य जयतुपदघटिते चकारवर्गे परे चवर्गत्वं जातम् । तेन वाजाञ्जयतु । एवं शत्रूञ्जयतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शान्मुञ्चये ॥ ३९ ॥ अग्नेर्व्रतपाः ॥ अग्नेर्व्रतपास्त्वेर्व्रतपाया
तवतनूर्म्मय्यभूदेषासात्त्वयियोममतनूस्त्वय्यभूदियꣳसाम
यि ॥ यथायथन्नौर्व्रतपतेर्व्रतान्यनुमेदीक्षान्दीक्षापतिरमुꣳ
स्तानुतपस्तपस्पतिः ॥ ४० ॥ [६-९] उरुर्विष्णो ॥ उरुर्वि
ष्णोर्विक्रमस्वोरुक्षयायनस्कृधि ॥ घृतङ्घृतयोनेपिबप्रप्रयज्ञ
पतिन्तिरस्वाहा ॥ ४१ ॥ अत्त्युन्न्यान् ॥ अत्त्युन्न्याँ २ ॥
ऽअगान्नान्न्याँ २ ॥ ऽउपागामुर्वाङ्क्त्वापरेभ्योविदम्परोवरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यः ॥ तन्त्वाजुषामहेदेववनस्पतेदेवयज्यायैदेवास्त्वादेव
यज्यायैजुषन्तांविष्णवेत्त्वा ॥ ओषधेत्रायस्वस्वधितेमैनꣳ
हिꣳसीः ॥ ४२ ॥ द्याम्मा ॥ द्याम्मालेखीरन्तरिक्षम्माहिꣳ
सीःपृथिव्यासम्भव ॥ अयꣳहित्वास्वधितिस्तेतिजानःप्रणि
नायमहतेसौभगाय ॥ अतस्त्वन्देववनस्पतेशतवल्शोवि
रोहसहस्रवल्शाविवयꣳरुहेम ॥ ४३ ॥ [३-१०] ॥
इति श्रीवाजसनेयसंहितायां पंचमोऽध्यायः ॥ ५ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ देवस्यत्त्वाषडु, पावी
रसिपंच, माहिःषट्, संतेतिस्रः, समुद्रंगच्छ, हविष्मतीरिमा
द्विकौ, हृदेत्वापंच, देवस्यत्वाष्टौ, अष्टौ सप्तत्रिंशत् ॥
[अ. ६ मं. ३७ अनु. ८] हरिः ॐ॥ देवस्यत्त्वा। सवितुःप्रसवे
श्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ आददेनार्य्यसीदम
हꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि ॥ यवोसियवयास्मद्वेषोयव
यारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृषदनाः पितृषदनमसि ॥ १ ॥ अग्ग्रेणीरसि । स्वावेशऽ
उन्नेतृणामेतस्यावित्तादधित्त्वास्त्थास्यतिदेवस्त्त्वासविताम्द्धा
नक्कुसुपिप्पलाब्भ्यस्त्त्वौषधीब्भ्यः ॥ द्यामग्ग्रेणास्पृक्षऽआ
न्तरिक्षम्मद्ध्येनाप्प्राः पृथिवीमुपरेणाद्दृहीः ॥ २ ॥ यातें ॥
यातेधामान्न्युश्म्मसिगमद्ध्येयत्रगावोभूरिशृङ्गाऽअयासः ॥
अत्राहुतदुरुगायस्यविष्णोः परमम्पदमवभारिभूरि ॥ ब्रह्म
वनित्त्वाक्षत्रवनिरायस्पोषवनिपर्य्यूहामि ॥ ब्रह्मदृहक्ष

अत्र देवः त्वा इति पदम् । तथयोः सम् (शु. य. प्रा. ३ अ. ८ सू.) इत्यनेन त्वाघटिते तकारे परे विसर्जनीयस्य सत्वे देवस्त्वेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रन्द्दुहायुर्द्दृहप्प्रजान्द्दृह ॥ ३ ॥ विष्णोः कर्म्माणि ।
पश्यतयतोव्रतानिपस्प्पशे ॥ इन्द्रस्ययुज्ज्यःसखा ॥ ४ ॥
तद्विष्णोः । परमम्पदꣳसदापश्यन्तिसूरयः ॥ दिवीवचक्षु
राततम् ॥ ५ ॥ पृथिवीरसि ॥ पृथिवीरसिपरित्त्वादैवीर्व्विशो
व्ययन्तामपरीमँऽयजमानद्दरायोमनुष्ष्याणाम् ॥ दिवःसनु
रस्येषतेपृथिव्याँल्लोकऽआरण्यस्तेपशुः ॥ ६ ॥ [६-१] उपा
वीरसि ॥ उपावीरस्युपदेवान्दैवीर्व्विशꣳप्रागुरुशिजोवह्नित

सं. ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मान् ॥ देवंत्त्वष्टुर्वसुंरमहुंघ्यातैंस्वदन्ताम् ॥ ७ ॥ रेवंतीर मंद्धम् ॥ रेवंतीरमंद्धम्बृहंस्पतेधारयावसूंनि ॥ ऋतस्यंत्त्वा देवहविःपाशेंनुप्रतिंमुञ्चामिधर्षामानुंषः ॥ ८ ॥ देवस्यंत्त्वा । सवितुःप्रंसवेश्विनोंर्बाहुभ्यांम्पूष्णोहस्तांभ्याम् ॥ अग्नी षोमांभ्याञ्जुष्टन्नियुंनज्मि ॥ अद्भ्यस्त्वौषंधीभ्योनुंत्त्वा मातामंन्यतामनुंपितानुभ्रातासगुभ्योंनुसखासयूंत्थ्यः ॥

१ धारय वसूनि पदम् । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयधृणिसेदिमेन्द्रियधारय० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे धारयघटिताकारस्य दीर्घत्वं विधीयते । तेन धारयावसूनि । २ अत्र पिबासोमम् (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन धर्ष इत्यकारस्य दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नीषोमाभ्यान्त्वाजुष्टम्प्रोक्षामि ॥ ९ ॥ अपाम्पेरुः ॥
अपाम्पेरुरस्यापोदेवीःस्वदन्तुस्वात्तश्चित्तसद्देवहविः ॥ सन्ते
प्राणोवातेनगच्छतां समङ्गानियजत्रैःसँस्युज्ञपतिराशिषा
॥ १० ॥ घृतेनाक्तौ । पशूँस्त्रायेथाँरेवतियजमानेप्रिय
न्धाऽआविश ॥ उरोरन्तरिक्षात्सजूर्देवेनवातेनास्यहविष
स्तमनायजसमस्यतन्वाभव ॥ वर्षोवर्षीयसियज्ञेयज्ञपतिन्धाः
स्वाहादेवेभ्योदेवेभ्यःस्वाहा ॥ ११ ॥ [५-२] माहिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माहिंब्भूर्म्मापृदांकुर्न्नमंस्त्तऽआतानानुर्व्वाप्प्रेहिं ॥ घृतस्यंकु
ल्याऽउपंऽऋतस्युपत्थ्याऽअनुं ॥ १२ ॥ देवींरापः । शुद्धाव्वो
ऽद्भ्यसुपंरिविष्टादेवेषुसुपंरिविष्टाव्वयम्पंरिवेष्टारोंभूयास्म्म ॥ १३ ॥
व्वाचंन्ते ॥ व्वाचंन्तेशुन्धामिप्प्राणन्तेंशुन्धामिचक्षुंस्त्तेशुन्धा
मिश्श्रोत्रंन्तेशुन्धामिनाभिंन्तेशुन्धामिमेढ्रंन्तेशुन्धामिपायु
न्तेंशुन्धामिचरित्राँस्त्तेशुन्धामि ॥ १४ ॥ मनंस्त्ते ॥
मनंस्त्तुऽआप्प्यांयतांव्वाक्तुऽआप्प्यांयताम्प्राणस्त्तुऽआप्प्यांय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताञ्चक्षुस्तुऽआप्यायताꣳश्रोत्रन्तुऽआप्यायताम् ॥ यत्तेक्रू
रꣳयदास्थितन्तत्तुऽआप्यायतान्निष्ट्यायतान्तत्तेशुध्यतुशम
होभ्यः ॥ ओषधेत्रायस्वैनꣳहिꣳसीः ॥ १५ ॥ रक्षं
साम्भागः ॥ रक्षंसाम्भागोऽसिनिरस्तꣳरक्षंऽइदमहꣳरक्षोभि
तिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोधमन्तमोनयामि ॥ घृ
तेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामग्निराज्यस्यवे

१ निष्ट्यायताम् । अत्र निःस्त्यायताम् इति पदम् । अत्र नेःस्त्यास्तनोः (शु. य. प्रा. ३ अ. ७० सू.) इत्यनेन नेरुपसर्गात्परयोः स्त्यास्तन्योर्धात्वोः सकारस्य षकारो भवति संहितायाम् । इति षत्वे षात्तथौ मूर्धन्यम् इति ष्टुत्वे (शु. य. प्रा. ३. अ. ८० सू.) ऊष्मान्तस्थाभ्यश्च स्पर्श इत्यनेन टकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुस्वाहास्वाहाकृतेऽऊर्द्धनभसम्मारुतङ्गच्छतम् ॥ १६ ॥ इदमापः ॥ इदमापःप्रवहतावद्यञ्चमलञ्चयत् ॥ यच्चाभिदुद्रोहानृतँयच्चशेपेऽअभीरुणम् ॥ आपोमातस्म्मादेनसःपवमानश्चमुञ्चतु ॥ १७ ॥ [६-३] सन्ते ॥ सन्तेमनोमनसासम्प्राणःप्राणेनगच्छताम् ॥ रेडस्युग्निष्ट्वाश्रीणात्त्वापस्त्वासमरिणन्वातस्यत्वाद्भ्राज्यैपूष्णोरꣳहयाऽऊष्मणोव्यथिषत्प्रयुतन्द्वेषः ॥ १८ ॥ घृतङ्घृतपावानः ॥ घृतङ्घृतपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानꣳपिबतुवसांवसापावानꣳपिबतान्तरिक्षस्यहविरसिस्वाहा ॥
दिशां ऽप्रदिशंऽआदिशोविदिशंऽउद्दिशोदिग्भ्यः स्वाहा ।१९।
ऐन्द्रःप्राणः ॥ ऐन्द्रःप्राणोऽअङ्गेऽअङ्गेनिदीध्यदैन्द्रऽउदानो
ऽअङ्गेऽअङ्गेनिधीतꣳ ॥ देवत्वष्टर्भूरितेसꣳसमेतुसलक्ष्मायद्वि
षुरूपम्भवाति ॥ देवत्रायन्तमवसेसखायोनुत्त्वामातापितरो
मदन्तु ॥ २० ॥ [३-४] समुद्रङ्गच्छ ॥ समुद्रङ्गच्छस्वाहा
न्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्गच्छस्वाहामित्रावरुणौगच्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहाहोरात्रेगच्छस्वाहाच्छन्दाꣳसिगच्छस्वाहाद्यावापृथिवी
गच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छ
स्वाहाग्निंवैश्वानरङ्गच्छस्वाहामनोमेहार्दियच्छदिवन्तेधूमो
गच्छतुस्वर्ज्योतिः÷पृथिवीम्भस्म्मनापृणस्वाहा॥२१॥ मापः॥
मापोमौषधीर्हिꣳसीर्द्धाम्नोधाम्नोराजँस्ततोवरुणनोमुञ्च ॥
यदाहुरग्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च ॥ सुमि
त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्म्मान्द्वेष्टियञ्चंवयन्द्विष्म्मः ॥ २२ ॥ [२-५] हविष्म्मंती
रिमाः ॥ हविष्म्मंतीरिमाऽआपोंहविष्म्माँ २ ॥ ऽआविंवा
सति ॥ हविष्म्मांन्देवोऽअंद्धरोहविष्म्माँ २ ॥ ऽअस्त्तुसूर्य्यं÷
॥ २३ ॥ अग्नेर्व्वं÷ ॥ अग्नेर्व्वोपंन्नगृहस्यसदंसिसादयामीन्द्रा
ग्न्योर्ब्भांगधेयींस्थमित्रावरुंणयोर्ब्भागधेयींस्थविश्वेषान्दे
वानांम्भागधेयींस्थ ॥ अमूर्ज्जाऽउपसूर्य्येयाभिर्व्वासूर्य्यं÷
सह ॥ तानोंहिन्वन्त्वद्धरम् ॥ २४ ॥ [२-६] हदेत्त्वां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदेत्त्वामनसेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्धमिममध्वरन्दि
विदेवेषुहोत्रायच्छ ॥ २५ ॥ सोमराजन् ॥ सोमराजन्विं
श्वास्त्वम्प्रजाऽउपावरोहविश्वास्त्वाँम्प्रजाऽउपावरोहन्तु ॥
शृणोत्त्वग्निः समिधाहवम्मेशृण्वन्त्वापोधिषणाश्चदेवीः ॥
श्रोताग्रावाणोविदुषोनयज्ञꣳशृणोतुदेवः सविताहवम्मेस्वाहा
॥ २६ ॥ देवीरापꣳ ॥ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविः

१ अत्र विश्वाऽऊष्मान्तं परिद्विषस्त्वं त्वाम् (शु. य. प्रा. ४ अ. २७ सू.) इत्यनेन विश्वापदम् ऊष्मान्तं (सान्तम्) जाते विश्वास्त्वम् विश्वास्त्वाम् ।
२ श्रोताग्रावाणः । पिबासोमम् (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन श्रोत इति क्रियापदस्थह्रस्वाकारस्य दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यऽइन्द्रियावान्मदिन्तमः ॥ तन्देवेभ्योदेवत्रादत्तशुक्रुपे
भ्योयेषाम्भागस्त्थस्वाहा ॥ २७ ॥ कार्षिरसि ॥ कार्षिरसि
समुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमो
षधीभिरोषधीः ॥ २८ ॥ यमग्ने ॥ यमग्नेपृत्सुमर्त्यमवा
वाजेषुयञ्जुनाः ॥ सयन्ताशश्वतीरिषःस्वाहा ॥ २९ ॥ [५-७]
देवस्यत्त्वा ॥ देवस्यत्त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो
हस्ताभ्याम् ॥ आददेरावासिगभीरमिममन्द्ध्रङ्घीन्द्रायसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षूतमम् ॥ उत्तमेनपविनोर्जस्वन्तम्मधुमन्तम्पयस्वन्तंनिग्ग्रा
भ्यास्त्थदेवश्श्रुतस्त्तर्प्पयतमामनोमे ॥ ३० ॥ मनोमे । तर्प्प
यतवाचम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुर्म्मेतर्प्पयतश्श्रोत्रम्मे
तर्प्पयतात्मानम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपशून्मेतर्प्पयतग
णान्मेतर्प्पयतगणामेमाविर्तृषन् ॥ ३१ ॥ इन्द्रायत्त्वा ॥ इन्द्रा
यत्त्वावसुमतेरुद्रवतऽइन्द्रायत्त्वादित्त्यवतऽइन्द्रायत्त्वाभिमा
तिग्घ्ने ॥ श्येनायत्त्वासोमभृतेग्नयेत्त्वारायस्प्पोषदे ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तें । सोमदिविज्योतिर्य्यत्पृथिव्याँऽयदुरावन्तरिक्षे । तेना
स्मैयजमानायोरुरायेकृध्यधिदात्रेवोचः॥३३॥ श्वात्रास्त्थं ॥
श्वात्रास्त्थंवृत्रतुरोराधोगूर्त्ताऽअमृतस्यपत्नीः ॥ तादेवीर्देवत्रे
मँऽयज्ञन्नयतोपहूताःसोमस्यपिबत ॥ ३४ ॥ माभैः ॥
माभेर्म्मासंविक्थाऽऊर्ज्जन्धत्स्वधिषणेवीड्वीसतीवीडयेथाम्
र्ज्जन्दधाथाम् ॥ पाप्मामाहतोनसोमः ॥ ३५ ॥ प्रागपा
क् ॥ प्रागपागुदगधराक्सर्व्वतस्त्वादिशऽआधावन्तु ॥ अम्ब

सं. ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्प्परुसमुरीर्व्विदाम् ॥ ३६ ॥ त्वमुङ्ग ॥ त्वमुङ्गप्प्रशंढ सिषोदेवश्शविष्ठुमर्त्त्यम् ॥ नत्त्वदुन्न्योमघवन्नस्त्तिमर्ड्डितेन्द्र ब्रवीमितेव्वचः ॥ ३७ ॥ [८-८] इति श्रीवाजसनेयसंहितायां षष्ठोऽध्यायः ॥ ६ ॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ व्वाचस्पतयेत्रिको, पयामगृहीतोसित्रिका, वायोद्विका, यंव्वांद्विको, यावामेका, तंप्रत्कथाचतस्रो, ऽयंव्वेनस्त्रिका,

१ निष्प्पर अत्र निः इति विसर्गस्य आविर्निरिड इडाया वसतिर्वीरिवः (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन यथायोगं ककारपकारपरयोः विसर्जनीयस्य षकारः क्रियते इति षकारे कृते निष्परः । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येदेवासस्त्रिका, इन्द्राय मूर्द्धानंद्विकौ, यस्तएका, प्राणायमे तिस्रो, मधवऽएकेन्द्राग्नीऽआगतमेका, घैको, मासऽएका, विश्वेदेवासऽआगतऽएके, न्द्रमरुत्वऽएका, मरुत्वन्तंवृषभमेका, मरुतान्त्वा, सजोषाऽइन्द्रऽएका, मरुत्वाँ २ ॥ ऽइन्द्रऽएका, महाँ २ ॥ ऽइन्द्रऽएका, महाँ २ ॥ ऽइन्द्रऽएको, दुत्यमष्टौ पंचविꣳशतिरष्टाचत्वारिꣳशत् [अ. ७ मं. ४८ अनु. २५]

१ इति शतपथब्राह्मणपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिः ॐ ॥ वाचस्पतयेपवस्वबृषणोऽअंशुभ्याङ्गभंस्तिपूतः ॥ देवोदेवेभ्यः ÷ पवस्वयेषांम्भागोसि ॥ १ ॥ मधुमतीर्नः ॥ मधुमतीर्न्नऽइषस्कृधियत्तेसोमादाभ्यन्नामजागृविंतस्मैतेसोमसोमायस्वाहास्वाहोर्व्वन्तरिक्षमन्वेमिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृतोसि । विश्वेभ्यऽइन्द्रियेभ्योदिव्येभ्यःपार्थिवेभ्योमनस्त्वाष्टुस्वाहात्त्वासुभवसूऽर्य्यायदेवेभ्यस्त्वामरीचिपेभ्योदे

१ वाचस्पतये अत्र प्रकृत्या कखयोः पफयोश्च (शु. य. प्रा. ३ अ. ११ सू.) इत्यनेन विसर्गस्य प्रकृतिभावे प्राप्ते पतितालव्यस्वरोदये (शु. य. प्रा. ३ अ. ३५ सू.) इत्यनेन पतिशब्दे परे विसर्जनीयस्य सकारे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांꣳशोयस्मैत्त्वेडुतत्सुत्त्यमुपरिप्प्रुतांभुङ्क्तेनहुतोसौफट्प्रा
णायत्त्वाव्यानायत्त्वा ॥ ३ ॥ [३-१] उपयामगृहीतोसि ॥
उपयामगृहीतोस्युन्तर्य्यच्छमघवन्पाहिसोमम् ॥ उरुष्यराय
ऽएषोयजस्व ॥ ४ ॥ अन्तस्त्ते ॥ अन्तस्त्तेद्यावापृथिवीदधा
म्म्युन्तर्द्दधाम्म्युर्व्वन्तरिक्षम् ॥ सुजूर्द्देवेभिरवरैःपरैश्चान्तर्य्या
मेमघवन्मादयस्व ॥ ५ ॥ स्वाङ्कृतोसि ॥ स्वाङ्कृतोसिविश्वेभ्यऽ

---

१ अन्तस्त्ते । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन नकारस्य द्वित्वे प्राप्ते स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन स्ववर्गीये तकारे परे द्वित्वनिषेधान्न द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रियेब्भ्योदिव्येब्भ्यु॑ःपार्त्थिवेब्भ्योमनस्त्वाष्टुस्वाहा॑त्त्वासु
भवसूर्य्यायदेवेब्भ्यस्त्वामरीचिपेब्भ्यऽउदानायत्त्वा ॥ ६ ॥
[३-२] आवायो ॥ आवायो भूषशुचिपाऽउपनः॑सुहस्त्रन्तेनि
युतोविश्ववार ॥ उपोतेऽअन्धोमद्यमयामियस्यदेवदधिषेपूर्व्व
पेयंवायवेत्त्वा ॥ ७ ॥ इन्द्रवायूऽइमे । सुताऽउपप्रयोभिरागे
तम् ॥ इन्दवोवामुशन्तिहि ॥ उपयामगृहीतोसिवायवऽइन्द्र

१ इन्द्रवायुभ्याम् । अत्र पूर्वो द्वन्द्वेष्ववायुषु (शु. य. प्रा. ३ अ. १२८ सू.) इत्यनेन अवायौ द्वन्द्वसमासे पूर्वस्य पदान्तस्याकारस्य दीर्घविधानात्रेन्द्रशब्दाकारस्य दीर्घाकारो वायुशब्दपरत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायुब्भ्यान्त्वैषतेयोनिं÷सुजोषोब्भ्यान्त्वा ॥ ८ ॥ [२-३]
अयंव्वाम् ॥ अयंव्वाम्मित्रावरुणासुतःसोमऽऋतावृधा ॥ म
मेदिहश्रुतुहवम् ॥ उपयामगृहीतोसिमित्रावरुणाब्भ्यान्त्वा
॥ ९ ॥ रायाव्वयम् ॥ रायाव्वयꣳसंसवाꣳसोमदेमहुब्भ्येनदेवा
यवसेनुगावः÷ ॥ तान्धेनुम्मित्रावरुणायुवन्नोव्विश्वाहाधत्तमनं
पस्फुरन्तीमेषतेयोनिर्ऋतायुब्भ्यान्त्वा ॥ १० ॥ [२-४]
यावाम् ॥ यावाङ्कशामधुमत्त्यश्विनासुनृतावती ॥ तया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वैषतेयोनि
र्म्माद्धीभ्यान्त्वा ॥ ११ ॥ [१-५] तम्प्रत्कथा । पूर्व्व
थाविश्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् ॥ प्रतीचीनं
वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ॥ उपयामगृ
हीतोसिशण्डायत्त्वैषतेयोनिर्व्वीरताम्पाह्यपमृष्टꣳशण्डोदेवा
स्त्वाशुक्रपाःप्रणयन्त्वनाधृष्टासि ॥ १२ ॥ सुवीरोवीरान् ॥
सुवीरोवीरान्प्रजनयन्परीहयभिरायस्पोषेणयजमानम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुञ्जग्मानोदिवापृथिव्याशुक्रꣳशुक्रशोचिषानिरस्त्तꣳशण्डं÷
शुक्रस्याधिष्ठानमसि ॥१३॥ अच्छिन्नस्यते । देवसोमसुवीर्य्यं
स्यरायस्पोषस्यददितारं÷स्याम ॥ साप्प्रथमासँस्कृतिर्व्विश्ववा
रासप्प्रथमोवरुणोमित्रोऽअग्निꣳ॥१४॥ सप्प्रथमꣳ॥ सप्प्रथमो
बृहस्पतिश्चिकित्वाँस्त्तस्म्माऽइन्द्रायसुतमाजुहोतस्वाहा ॥
तृम्पन्तुहोत्रामद्धोयाꣳस्विष्टायाꣳसुप्प्रीताꣳसुहुतायत्त्स्वाहायां

१ तथयोः सम् (शु. य. प्रा. ३ अ. १३६ सू.) इत्यनेन नकारस्य सकारे अनुनासिकमुपधा प्रागन्तस्थायाः (शु. य. प्रा. ३ अ. १३१ सू.) इत्यनेन चोपधायामनुनासिके कृते रूपम् । नात्र धामञ्छत्रून् (शु. य. प्रा. ३ अ. १४६ सू.) इति निषेधस्त्वंपरत्वाभावात् ॥ २ तृम्पन्तु होत्राः । अत्र ऋषरेभ्यः (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे विधीयमानं णत्वं प्राप्तं परञ्च तवर्गे च (शु. य. प्रा. ३ अ. ९४ सू.) इत्यनेन निषेधान्न णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ड्ग्नीत् ॥ १५ ॥ [४-६] अयंवेनः ॥ अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने ॥ इममपाᳬसंङ्गमे सूर्य्यस्यशिशुन्नविप्राःमतिभीरिहन्ति ॥ उपयामगृहीतोसिमर्क्कीयत्त्वा ॥ १६ ॥ मनोन । येषुहवनेषुतिग्मंविपᳬशङ्क्यांवनुथोद्रवन्ता ॥ आयःशर्य्याभिस्तुविनृम्णोऽअस्याःश्रीणीतादिशङ्गभस्त्तावेषतेयोनिः÷प्रजाःपाह्यपमृष्टोमर्क्कोदेवास्त्वामन्थिपाःप्रणयन्त्वनाधृष्टासि ॥ १७ ॥ सुप्रजाः । प्रजाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्र्ंजनयन्नपरीह्यभिरायस्पोषेंणयजंमानम् ॥ सञ्जग्मानो
दिवापृंथिव्यामन्थीमन्थिशौंचिषानिरंस्त्तोमक्कौंमन्थिनौंधि
ष्ठानंमसि ॥ १८ ॥ [३-७] येदेंवासः ॥ येदेंवासोंदिव्येकां
दशस्त्थपृंथिव्यामध्येकांदशस्त्थ ॥ अप्सुक्षितोंमहिनैकांदश
स्त्थतेदेंवासोयज्ञमिमञ्जुंषध्वम् ॥ १९ ॥ उपयामगृंहीतोसि ॥
उपयामगृंहीतोस्याग्रयणोसिस्वाग्ग्रयणंपाहियज्ञम्पाहियज्ञ
पंतिंविष्णुस्त्वामिंन्द्रियेणंपातुविष्णुन्त्वम्पांह्यभिसवंना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपाहि ॥ २० ॥ सोमः पवते ॥ सोमः पवतेसोमः पवतेस्म्मै
ब्रह्मणेस्म्मैक्षत्रायास्म्मैसुन्वतेयजमानायपवतऽइषऽऊर्ज्जेप
वतेद्वयऽओषधीब्भ्यःपवतेद्यावापृथिवीब्भ्यांम्पवतेसुभूतायं
पवतेविश्वेब्भ्यस्त्वादेवेब्भ्यंऽएषतेयोनिर्विश्वेब्भ्यस्त्वादेवे
ब्भ्यः ॥ २१ ॥ [३-८] उपयामगृहीतोसीन्द्रायत्त्वाबृहद्ब
तेवयस्वतऽउक्थाद्यङ्गृह्णामि ॥ यत्तंऽइन्द्रबृहद्वयस्तस्म्मै
त्त्वाविष्णवेत्त्वैषतेयोनिरुक्थेब्भ्यस्त्वादेवेभ्यस्त्वादेवाद्यँ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽयुज्ञस्यायुषेगृह्णामिमित्रावरुणाब्भ्यान्त्वा ॥ २२ ॥ मित्रा
वरुणाब्भ्यान्त्वा । देवाब्यँऽयुज्ञस्यायुषेगृह्णामीन्द्रायत्त्वादेवा
ब्यँऽयुज्ञस्यायुषेगृह्णामीन्द्राग्निब्भ्यान्त्वादेवाब्यँऽयुज्ञस्यायु
षेगृह्णामीन्द्रावरुणाब्भ्यान्त्वादेवाब्यँऽयुज्ञस्यायुषेगृह्णामी
न्द्राबृहस्पतिंब्भ्यान्त्वादेवाब्यँऽयुज्ञस्यायुषेगृह्णामीन्द्रावि
ष्णुंब्भ्यान्त्वादेवाब्यँऽयुज्ञस्यायुषेगृह्णामि ॥ २३ ॥ [२-९]
सं. १० मूर्द्धानंन्दिवः ॥ मूर्द्धानंन्दिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आजातमग्निम् ॥ कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ २४ ॥ उपयामगृहीतोसि । ध्रुवोसिध्रुवक्षितिर्ध्रुवाणान्ध्रुवतमोच्युतानामच्युतक्षित्तमऽएषतेयोनिर्वैश्वानरायत्त्वा ॥ ध्रुवन्ध्रुवेणमनसावाचासोमुमवनयामि॥अथानऽइन्द्रऽइद्विशोसपत्काःसमनसस्करत् ॥२५॥[२-१०]यस्तेद्रप्प्सस्कन्दतियस्तेऽअꣳशुर्ग्रावच्युतोधिषणयोरुपस्थात् ॥ अध्वर्योर्वापरिवायःपवित्रात्तन्तेजुहोमिमनसावषट्कृतꣳस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हांदेवानांमुत्क्रमंणमसि ॥ २६ ॥ [१-११] प्राणायंमे । वर्च्चो
दावर्च्चसेपवस्वव्यानायंमेवर्च्चोदावर्च्चसेपवस्वोदानायंमेवर्च्चोदा
वर्च्चसेपवस्ववाचेमेंवर्च्चोदावर्च्चसेपवस्वक्रतुदक्षांब्भ्याम्मेवर्च्चो
दावर्च्चसेपवस्वश्रोत्रांयमेवर्च्चोदावर्च्चसेपवस्वचक्षुंब्भ्याम्मेव
र्च्चोदसौवर्च्चसेपवेथमात्क्मनेंमे ॥ २७ ॥ आत्क्मनेंमे । वर्च्चोदा
वर्च्चसेपवस्वौजंसेमेवर्च्चोदावर्च्चसेपवस्वायुंषेमेवर्च्चोदावर्च्चसेपव
स्वविश्वांब्भ्योमेप्प्रजाब्भ्योवर्च्चोदसौवर्च्चसेपवेथाम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोसि । कतमोसिकस्यासिकोनामासि ॥ यस्यतेनामामन्म
हियन्त्वासोमेनातीतृपाम ॥ भूर्भुवःस्वः सुप्प्रजाःप्प्रजाभिः
स्याꣳसुवीरोवीरैःसुपोषःपोषैः ॥ २९ ॥ [३-१२] उपया
मगृहीतोसिमधवेत्त्वोपयामगृहीतोसिमाधवायत्त्वोपयामगृ
हीतोसिशुक्रायत्त्वोपयामगृहीतोसिशुचयेत्त्वोपयामगृहीतो
सिनभसेत्त्वोपयामगृहीतोसिनभस्यायत्त्वोपयामगृहीतोसीषे
त्त्वोपयामगृहीतोस्यूर्जेत्त्वोपयामगृहीतोसिसहसेत्त्वोपयामगृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हीतोसिसहस्यायत्त्वोपयामगृहीतोसितपसेत्त्वोपयामगृहीतो
सितपस्यायत्त्वोपयामगृहीतोस्यꣳहसस्पतयेत्त्वा ॥ ३० ॥
[१-१३] इन्द्राग्नीऽआगतम् ॥ इन्द्राग्नीऽआगतꣳसुतङ्गी
र्भिर्न्नभोवरेण्यम् ॥ अस्यपातन्धियेषिता ॥ उपयामगृहीतो
सीन्द्राग्निभ्यान्त्वैषतेयोनिरिन्द्राग्निभ्यान्त्वा ॥ ३१ ॥
[१-१४] आघ ॥ आघायेऽअग्निमिन्धतेस्तृणन्तिबर्हिरानु

१ आघाये । अत्र श्रथोदारिथशोचपनयसादयर्जुवृषशत्रुसलक्ष्माघाघारात्यृभवत यकारे (ऋ. य. प्रा. ३ अ. ११३ सू.) यकारे परे एते दीर्घा भवन्ति । तेन घ इत्यस्याकारस्य दीर्घः । एवम् अघायतः इत्यत्रापि दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षक् ॥ येषामिन्द्रोयुवासखा ॥ उपयामगृहीतोस्यग्नीन्द्रा
ब्भ्यान्त्वैषतेयोनिरग्नीन्द्राब्भ्यान्त्वा ॥ ३२ ॥ [१-१५]
ओमासश्चर्षणीधृतः ॥ ओमासश्चर्षणीधृतोविश्वेदेवासऽआ
गत ॥ दाश्वाꣳसोदाशुषः सुतम् ॥ उपयामगृहीतोसिविश्वे
ब्भ्यस्त्वादेवेब्भ्यऽएषतेयोनिर्विश्वेब्भ्यस्त्वादेवेब्भ्यः ॥ ३३ ॥
[१-१६] विश्वेदेवासः ॥ विश्वेदेवासऽआगतशृणुतामऽइमꣳ

१ अत्र पिबासोमम् । (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन चर्षणिशब्दस्येकारस्य दीर्घे चर्षणीधृतः । २ शृणुत मऽइमम् । अत्र शृणुतत्विंपिध्रजिभवतपिबेतस्मतिष्ठरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति । इति तकारस्य दीर्घे शृणुतामऽइमम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हवम् ॥ एदम्बर्हिर्निषीदत ॥ उपयामगृहीतोसिविश्वेभ्य
स्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ ३४ ॥
[१-१७] इन्द्रमरुत्वः ॥ इन्द्रमरुत्वऽइहपाहिसोमँय्यथा
शाय्यातेऽअपिबःसुतस्य ॥ तवप्रणीतीतवशूरशर्म्मन्नाविवा
सन्तिकवयःसुयज्ञाः ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्वं
तऽएषतेयोनिरिन्द्रायत्त्वामरुत्वंते ॥ ३५ ॥ [१-१८] मरु
त्वन्तंवृषभं । वावृधानमकवारिन्दिव्यꣳशासमिन्द्रम् ॥

१ बर्हिर्निषीदत अत्र निःसीदत इति पदम् । अत्र नेः सीदतेः (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन नेः परस्य सीदतेत्यत्रस्थसकारस्य षकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वासाहमवसेनूतनायोग्रꣳसहोदामिहतꣳहुवेम ॥ उप
यामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरु
त्त्वते ॥ [२] [१-१९] उपयामगृहीतोसिमरुतान्त्वौजसे ॥३६॥
[१-२०] सजोषाऽइन्द्र ॥ सजोषाऽइन्द्रसगणोमरुद्भिः
सोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ[३] १ ॥ रपमृधोनुदु
स्वाथाभयङ्कृणुहिविश्वतोनः ॥ उपयामगृहीतोसीन्द्रायत्त्वा

१ विश्वासाहम्। अत्र विश्वशब्दाकारस्य विश्वसहभुवपुषवसुषु (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन सहपरे दीर्घाकारः। २ (इति शतपथे)। ३ शत्रूँ १ ॥ रपमृधः। अत्र स्वर औपशविः (शु. य. प्रा. ३ अ. १३२ सू.) इत्यनेन नकारस्य स्वरे परे अनुस्वारे उपधायामनुनासिक्ये च रूपम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरुत्त्वतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥ ३७ ॥ [१-२१]
मरुत्त्वाँ २ ॥ ऽइन्द्र । वृषभोरणायपिबासोममनुष्ष्वधम्म
दाय ॥ आसिञ्चस्वजठरेमध्ऽऽऊर्म्मिन्त्वꣳराजासिप्रतिपत्त्सु
तानाम् ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वतऽएषतेयोनि
रिन्द्रायत्त्वामरुत्त्वते ॥३८॥ [१-२२] महाँ २ ॥ ऽइन्द्र ÷ ॥
महाँ २ ॥ ऽइन्द्रोनृवदाचर्षणिप्राऽउतद्विबर्हाऽअमिनःसहो

१ मरुत्वान् इन्द्रः । अत्राकारोपधो यकारम् (शु. य. प्रा. ३ अ. १४३ सू.) इत्यनेन स्वरे परे नकारस्य यकारे कृते उपधायामनुनासिक्ये च यवयोः पदान्तयोः स्वरमध्ये लोपः (शु. य. प्रा. ४ अ. १२५ सू.) इत्यनेन यकारलोपे न परकाल० (शु. य. प्रा. ३ अ. ४ सू.) इत्यनेन सन्धेर्निषेधः । तथैव महाँ २ इन्द्रः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिः ॥ अस्म्मद्द्र्यग्गवावृधेव्वीर्य्यायोरुः पृथुः सुकृतः कृर्तृभिः
र्भूत् ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥३९॥ [१-२३] मुहाँ २॥ ऽइन्द्रः ॥ मुहाँ २॥ ऽइन्द्रो यऽओजसापुर्ज्जन्न्योवृष्टिमाँ २॥ ऽइव ॥ स्तोमैर्व्वृत्तस्यव्वावृधे ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥४०॥ [१-२४] उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥

१ कर्तृभिः । अत्र परंतु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यस्यापवादभूतेन ऊष्मान्त. (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन तकारस्य द्वित्वे प्राप्ते ऋवर्णे च (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन ऋवर्णे परे व्यञ्जनस्य द्विर्भावनिषेधान्न द्वित्वम् । एतादृशेष्वन्येष्वपि बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृशेविश्वायसूर्य्यꣳस्वाहा ॥४१॥ चित्रन्देवानाम् ॥ चित्रन्देवा
नामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावा
पृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्क्माजगतस्तस्थुषश्चस्वाहा
॥ ४२ ॥ अग्नेनयं । सुपथारायेऽअस्म्मान्विश्वानिदेवव्वयुना
निविद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउ
क्तिंविधेमस्वाहा ॥ ४३ ॥ अयन्नः ॥ अयन्नोऽअग्निर्व्वरि
वस्कृणोत्त्वयम्मृधः पुरऽएतुप्रभिन्दन् ॥ अयंवाजांञ्जयतुवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जंसातावुयꣳशत्रूँञ्जयतुजर्हृषाणꣳस्वाहा ॥ ४४ ॥ रूपेणवꣳ ॥ रूपेणवोरूपमभ्यागान्तुथोवोविश्वेवेदाविभजतु ॥ ऋतस्य पथाप्रेतचन्द्रदक्षिणाविस्वꣳपश्यन्त्युन्तरिक्षँ्यतस्वसदस्यैः ॥ ४५ ॥ ब्राह्मणमद्य । विदेयम्पितृमन्तम्पैतृमत्त्यमृषिमार्षेयꣳसुधातुंदक्षिणम् ॥ अस्मद्रातादेवत्रागच्छतप्रदातारमाविशत ॥ ४६ ॥ अग्नयेत्त्वा ॥ अग्नयेत्त्वामह्यंवरुणोददातु

१ विस्वः । अत्र वेर्युदयः (शु. य. प्रा. ३ अ. ६७ सू.) इत्यनेन वेः उपसर्गात्परस्य सकारस्य यकारोदयः षकारो भवति । अतो नात्र सकारात्परस्य वकारोदयस्य वेरुपसर्गस्य सकारस्य षकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमृतत्त्वमंशीयायुर्द्दात्रऽएंधिमयोमह्यम्प्रतिग्रहीत्रेरुद्रायं
त्त्वामह्यँवरुणोददातुसोमृतत्त्वमंशीयप्प्राणोदात्रऽएंधिवयो
मह्यम्प्रतिग्रहीत्रेबृहस्पतयेत्त्वामह्यंवरुणोददातुसोमृतत्त्व
मंशीयत्त्वग्ग्दात्रऽएंधिमयोमह्यम्प्रतिग्रहीत्रेयुमायत्त्वामह्यं
वरुणोददातुसोमृतत्त्वमंशीयुहयोदात्रऽएंधिवयोमह्यम्प्रति
ग्ग्रहीत्रे ॥ ४७ ॥ कोदात् ॥ कोदात्तकस्म्माऽअदात्तकामोदा
त्तकामायादात् ॥ कामोदाताकामं÷प्रतिग्ग्रहीताकामैतत्ते

सं. ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ [८-२५] इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः ॥ ७ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ उपयामगृहीतोस्यादित्येभ्यः पंच, वाममद्यद्वे, सुशर्मास्येका, बृहस्पतिसुतस्यद्वे, हरिरसिचतस्रः, समिन्द्रेऽष्टौ, माहिः पंच, ऽएजतुदशमास्यः पंचा, तिष्ठैका, युक्ष्वाह्येके, न्द्रमिदेका, यस्मान्नद्वे, ऽग्नेपवस्वो, त्तिष्ठन्न, दृश्रमु, दुत्यमेकैका, जिघ्र द्वे, विनइन्द्र, वाचस्पतिं, विश्वकर्मन्नेकैका, ग्नयेत्वाचतस्र,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहरतिस्तिस्रः, परमेष्ठीदश, त्रयोविꣳशतिस्त्रिषष्टिः ॥ [अ. ८ मं. ६३ अनु. २३] हरिः ॐ ॥ उपयामगृहीतोसि ॥ उपयामगृहीतोस्यादित्येभ्यस्त्वा ॥ विष्णोऽउरुगायैषतेसोमस्तꣳरक्षस्वमात्त्वादभन् ॥ १ ॥ कदाचन । स्तरीरसिनेन्द्रसश्चसि दाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यतऽआदित्येभ्यस्त्वा ॥ २ ॥ कदाचन । प्रयुच्छस्युभेनिपासिजन्मनी ॥ तुरीयादित्यसवनन्तऽइन्द्रियमातस्थावमृतन्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्यादित्येब्भ्यस्त्वा ॥ ३ ॥ यज्ञोदेवानाम् ॥ यज्ञोदेवाना
म्प्रत्येतिसुम्नमादित्यासोभवतामृडयन्तः ॥ आवोर्व्वाचीं
सुमतिर्व्ववृत्त्यादुहोश्चिद्यावरिवोवित्तरासदादित्येब्भ्यस्त्वा
॥ ४ ॥ विवस्वन्नादित्य ॥ विवस्वन्नादित्यैषतेसोमपीथस्त
स्मिन्मत्स्व ॥ श्रदस्मैनरोव्वचसेदधातनयदाशीर्द्दादम्पती
व्वाममश्नुतः ॥ पुमान्पुत्रोजायतेविन्दतेव्वस्वधाविश्वाहारपऽ
एधतेगृहे ॥ ५ ॥ [५-१] व्वाममद्य । सवितर्व्वाममुश्वोदिवे

१ भवत मृडयन्तः । अत्र शृणुत्विषिध्वजिभवतपिबेतस्मतिष्ठरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे दीर्घे भवता मृडयन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवेब्वाममुस्म्मब्भ्यंङ्सावीः ॥ ब्वामस्युहिक्षयंस्यदेवुभूरेंरयाधि
यावांमुभाजं÷स्याम ॥ ६ ॥ उपुयामगृंहीतोसि । सावित्रो
सिचनोधाश्चंनोधाऽअंसिचनोमयिंधेहि ॥ जिन्वंयुज्ञञ्जिन्वं
युज्ञपंतिम्भगांयदेवायंत्त्वासवित्रे ॥ ७ ॥ [२-२] शतम्
॥ ३०० ॥ उपुयामगृंहीतोसि । सुशम्मांसिसुप्प्रतिष्ठानोबृहदुं
क्षायुनमं÷ ॥ विश्वेंब्भ्यस्त्त्वादेवेब्भ्यंऽएषतेयोनिर्विश्वेंब्भ्य
स्त्त्वादेवेब्भ्यं÷ ॥ ८ ॥ [१-३] उपुयामगृंहीतोसि ॥ उपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामगृहीतोसि बृहस्पतिसुतस्य देवसोमतऽइन्दोरिन्द्रियावतः पत्कीवतोग्रहाँ २ ॥ ऽऋच्छासम् ॥ अहम्पुरस्तादुहमुवस्ताद्यदुन्तरिक्षन्तदुमेपिताभूत् ॥ अहꣳसूर्य्यमुभयतोददर्शाहन्देवानाम्परमङ्गुह्यायत् ॥ ९ ॥ अग्ना ३॥ ऽइपत्कीवन् ॥ अग्ना ३ ॥ ऽइपत्कीवन्त्सुजूर्देवेनुत्त्वष्ट्रासोमम्पिबस्वाहा ॥ प्रजापतिर्वृषासिरेतोधारेतोमयिधेहिप्रजापतेस्त्वेवृषण्णोरेतो

१ बृहस्पतिसुतस्य । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सस्य षत्वे प्राप्ते अनुसन्तनोतु बृहस्पति० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन समानपदे सस्य प्रकृतिभावविधानान्न षत्वम् । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति पकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धसौरेतोधामंशीय ॥ १० ॥ [२-४] उपयामगृहीतोसि ॥
उपयामगृहीतोसिहरिरसिहारियोजनोहरिंभ्यान्त्वा ॥ हव्यौ
द्वानास्त्थंसहसौमाऽइन्द्राय ॥ ११ ॥ यस्त्तें । ऽअश्वसनि
र्भक्षोयोगोसनिस्त्तस्यतऽइष्टयंजुषस्त्तुतस्त्तोमस्यशस्त्तोक्थ
स्योपंहूतस्योपंहूतोभक्षयामि ॥ १२ ॥ देवकृतस्यैनंसः ॥
देवकृतस्यैनंसोवयजनमसिमनुष्यकृतस्यैनंसोवयजनमसिपि
तृकृतस्यैनंसोवयजनमस्यात्मकृतस्यैनंसोवयजनमस्यैनंसऽए

१ गोसनिस्त. । भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ अनुसन्त० (३ अ. ८२ सू.) इत्यनेन निषिध्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसोवयजंनमसि ॥ यच्चाहमेनोंविद्वाँश्चकारयच्चाविंद्वाँस्तस्य सर्व्वस्यैनंसोवयजंनमसि॥१३॥ संवर्च्चसा॥ संवर्च्चसापयंसासन्तनूभिरगंन्महिमनंसासꣳशिवेनं ॥ त्वष्टांसुदत्रोविदंधातुरायोनुंमार्ष्टुतन्वोयद्विलिंष्टम्॥१४॥ [४-५]समिंन्द्र। णोमनंसानेषिगोभिꣳसꣳसूरिभिंर्म्मघवन्त्सꣳस्वस्त्या ॥ सम्ब्रह्मंणादेवकृतँ्यदस्त्तिसन्देवानांꣳसुमतौयज्ञियांनाꣳस्वाहां ॥ १५ ॥

१ समिन्द्रणो। अत्र इन्द्र नः इति पदद्वयेन भाविभ्य० (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन समानपदत्वाभावाण्णत्वाप्राप्तौ निषण्णायरथवाहण। मिन्द्रऽएणस्परिणीयते समिन्द्रण० (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन णत्वं निपात्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवर्च्चसा ॥ संवर्च्चसापयसासन्तनूभिरगन्महिमनसासꣳशि
वेन। त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ १६ ॥
धातारातिः। संवितेदङ्गुषताम्प्रजापतिर्निधिपादेवोऽअग्निः ॥
त्वष्टाविष्णुः प्रजयासꣳरराणायजमानायद्रविणन्दधातु
स्वाहा ॥ १७ ॥ सुगावः ॥ सुगावोदेवाःसदनाऽअकर्म्मयऽ
आजग्मेदꣳसवनञ्जुषाणाः ॥ भरमाणावहमानाहवीꣳष्यु
स्मेधत्तवसवोवसूनिस्वाहा ॥ १८ ॥ याँ २ ॥ ऽआवहः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याँ २॥ ऽआवहऽउशतोदेवदेवाँस्तान्प्रेरयस्वेऽअग्नेसधस्थे ॥
जक्षिवाꣳसः पपिवाꣳसश्चविश्वेसुङ्कर्म्मꣳसुरातिष्टतानु
स्वाहा ॥ १९ ॥ ब्रुयद्धि । त्वाप्रयतियज्ञेऽअस्मिन्नग्नेहोतार
मवृणीमहीह ॥ ऋधंगयाऽऋधंगुताशमिष्ठाꣳप्रजानन्यज्ञमु
पयाहिविद्वान्त्स्वाहा ॥ २० ॥ देवागातुविदꣳ ॥ देवागातुविदोगा
तुंवित्त्वागातुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाꣳ
॥ २१ ॥ यज्ञंयज्ञम् ॥ यज्ञंयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वाँयोनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसुहसूक्तवाकुꣳसर्व्ववीरस्तज्जु
षस्वस्वाहा ॥ २२ ॥ [८-६] माहिः÷माहिर्भूम्मापृदाकुꣳ ॥
उरुहिराजावरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽऊ ॥ अप
दुपादुप्प्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् ॥ नमोवरुणा
याभिष्ठितोवरुणस्यपाशः÷ ॥ २३ ॥ अग्नेरनीकम् ॥ अग्ने
रनीकमुपऽआविवेशोपान्नपात्त्प्रतिरक्षन्नसुर्य्यम् ॥ दमेदमेसु

१ हृदयाविधश्चित् । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयधृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदय० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे हृदयाकारस्य दीर्घाकारो विधीयते । अतो हृदयशब्दाकारस्य दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिधँऽयक्ष्यग्ग्नेप्प्रातिंतोजिह्वाघृतमुच्चंरण्यत्त्वाहा ॥ २४ ॥ सुमु
द्रेतें ॥ सुमुद्रेतेहृदंयमुप्प्स्वुन्तःसन्त्वांविशुन्त्वोषंधीरुतापं÷ ॥
यज्ञस्यंत्त्वायज्ञपतेसुक्तोक्तौंनमोवाकेविंधेमुयत्त्वाहा ॥ २५ ॥
देवींरापः ॥ देवींरापऽएषवोगर्भ्भस्त्तꣳसुप्प्रीतुꣳसुभृंतम्बिभृत ॥
देवंसोमैषतेंलोकस्त्तस्मिम्ञ्छञ्चुवक्ष्वुपरिंचवक्ष्व ॥ २६ ॥ अवं
भृथनिचुम्पुण । निचेरुरंसिनिचुम्पुणः ॥ अवंदेवैर्देवकृतमे
नोंयासिषमवुमर्त्त्यैर्म्मर्त्त्यंकृतम्पुरुराव्णोंदेवरिषस्प्पांहिदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाँ ँसमिदसि ॥ २७ ॥ [५-७] एजंतुदशंमास्यः ॥ एजं
तुदशंमास्योगर्भौजरायुणासह ॥ यथायंवायुरेजंतियथासमु
द्रऽएजंति ॥ एवायन्दशंमास्योऽअस्त्रंजरायुणासह ॥ २८ ॥
यस्यैते । यज्ञियोगर्भौयस्यैयोनिर्हिरण्ययी ॥ अङ्गान्यह्रु
तायस्यतम्मात्रासमंजीगमुँस्वाहा ॥ २९ ॥ पुरुदुस्मोवि
षुरूपः ॥ पुरुदुस्मोविषुरूपऽइन्दुरन्तर्म्महिमानंमानञ्जुधी
रः ॥ एकपदीन्द्विपदींत्रिपदीञ्चतुष्पदीमष्टापदीम्भुवनानु

सं. १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथन्ताᳬस्वाहा ॥ ३० ॥ मरुतोयस्य ॥ मरुतोयस्यहिक्षये पोथादिवोविमहसः ॥ ससुगोपातमोजनः ॥ ३१ ॥ मही द्यौः । पृथिवीचनऽइमँयज्ञम्मिमिक्षताम् ॥ पितृतान्नोभरीमभिः ॥ ३२ ॥ [५-८] आतिष्ठ । वृत्रहन्रथँयुक्क्षातेब्रह्मणाहरी ॥ अर्वाचीनꣳसुतेमनोग्रावाकृणोतुवग्नुना ॥ उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वा

१ अत्र पिबा सोमम् (शु. य. प्रा. अ. १३० सू.) इत्यनेन पाथ इत्यस्य ह्रस्वाकारस्य दीर्घः । २ आतिष्ठ वृत्रहन् । अत्र तिष्ठाद्युदात्तम् । (शु. य. प्रा. ३ अ. १०४ सू.) तिष्ठेत्येतत्पदं दीर्घमापद्यते यद्याद्युदात्तं भवति । इत्यनेन विधीयमानो दीर्घाकार आतिष्ठपदस्य आद्युदात्तत्वाभावेन न दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशिनं ॥ ३३ ॥ [१-९] युक्ष्वाहि । केशिनाहरीवृषणा
कक्ष्युप्रा ॥ अथानऽइन्द्रसोमपागिरामुपश्रुतिञ्चर ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वाषो
डशिनं ॥ ३४ ॥ [१-१०] इन्द्रमित् ॥ इन्द्रमिद्धरीवहतोप्प्रति
धृष्टशवसम् ॥ ऋषीणाञ्चस्तुतीरुपयज्ञञ्चमानुषाणाम् ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वाषो
डशिनं ॥ ३५ ॥ [१-११] यस्मान्न । जातःपरोऽअन्योऽअ

१ अत्र पिबा सोमम् (ऋ. प्र. प्रा. ३ अ. १३० सू.) इत्यनेन अकारस्य दीर्घे युक्ष्वाहि इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तिस्तयऽआविवेशभुवनानिविश्वा ॥ प्रजापतिःप्रजयासꣳ
रराणस्त्रीणिज्योतींꣳषिसचतेसषोडशी ॥ ३६ ॥ इन्द्रश्च ।
सम्राड्वरुणश्चराजातौतेभक्षञ्चक्रतुरग्रऽएतम् ॥ तयोरहमनुभ
क्षम्भक्षयामिवाग्देवीजुषाणासोमस्यतृप्यतुसुहृप्प्राणेनस्वा
हा ॥ ३७ ॥ [२-१२] अग्नेपवस्व ॥ अग्नेपवस्वस्वपाऽअस्मे
वर्चः सुवीर्य्यम् ॥ दधद्रयिम्मयिपोषम् ॥ उपयामगृहीतोस्य
ग्नयेत्त्वावर्चसऽएषतेयोनिरग्नयेत्त्वावर्चसे ॥ अग्नेवर्चस्विन्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्च्चस्वाँस्त्वन्देवेष्वसिव्वर्च्चस्वानहम्मनुष्येषुभूयासम् ॥ ३८ ॥
[१-१३] उत्तिष्ठन्नोजसा ॥ उत्तिष्ठन्नोजसासहपीत्वीशिप्रेऽ
अवेपयः ॥ सोमंमिन्द्रचमूसुतम् ॥ उपयामगृहीतोसीन्द्रायु
त्त्वौजसऽएषतेयोनिरिन्द्रायुत्त्वौजसे ॥ इन्द्रौजिष्ठौजिष्ठस्त्व
न्देवेष्वस्योजिष्ठोहम्मनुष्येषुभूयासम् ॥ ३९ ॥ [१-१४]
अद्दृश्श्रमस्य। केतवोविरुश्मयोजनाँ२ ॥ ऽअनु ॥ भ्राजन्तोऽ
अग्नयोयथा ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाभ्राजायैषते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योनिꣳसूर्य्यायत्त्वाभ्राजाय ॥ सूर्य्यंभ्राजिष्ठुभ्राजिष्ठुस्त्व
न्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम् ॥ ४० ॥ [१-१५]
उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥ दृशेवि
श्वायसूर्य्यम् ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाभ्राजायैषते
योनिꣳसूर्य्यायत्त्वाभ्राजाय ॥ ४१ ॥ [१-१६] आजिग्घ ॥
आजिग्घकुलशम्मह्यात्त्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्त्त
स्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४२ ॥ इडेरन्तेः ॥ इडेरन्तेहव्येकाम्ये चन्द्रे ज्योतेदितिसरस्वतिमहिविश्रुति ॥ एतातेऽअग्न्येनामानिदेवेभ्योमासुकृतम्ब्रूतात् ॥ ४३ ॥ [२-१७] विनः ॥ विनऽइन्द्रमृधोजहि नीचायच्छपृतन्यतः ॥ योऽअस्माँ२ ॥ ऽअभिदासत्यधरङ्गमयातमः ॥ उपयामगृहीतोसीन्द्रायत्त्वाविमृधेऽएषतेयोनिरिन्द्रायत्त्वाविमृधे ॥ ४४ ॥ [१-१८] वाचस्पतिं ।

१ अस्य नामानि । अत्र नामानिपदस्थस्य निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इति सूत्रेण पदान्तीयस्य निशब्दस्य लोपे प्राप्तेऽपि सूत्रे बहुलम् ग्रहणात्क्वचिन्न भवति । तेन नात्र लोपः । २ अत्र पिबा सोममम् (शु. य. प्रा. ३ अ. १३० सू.) इत्यनेन दीर्घाकारे जाते गमयातमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वकर्म्माणमूतयेमनोजुवंवाजेऽअद्याहुवेम ॥ सनोविश्वा
निहवंनानिजोषद्विश्वशम्भूरवसेसाधुकर्म्मा ॥ उपयामगृही
तोसीन्द्रायत्त्वाविश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाविश्वक
र्म्मणे ॥ ४५ ॥ [१-१९] विश्वकर्म्मन्हविषा ॥ विश्वकर्म्म
न्हविषाववर्द्धनेनत्रातारमिन्द्रमकृणोरवध्यम् ॥ तस्मैविशः
समनमन्तपूर्व्वीरयमुग्रोविहव्योयथासत् ॥ उपयामगृहीतो

१ अद्य हुवेम । अत्र अद्य तं हकारचकारभवतवृणीमहेदेवेषु (शु. य. प्रा. २ अ. ११५ सू.) इत्यनेन अद्येत्येतत्पदं ह्रस्वहकारतकारचकारभवत-वृणीमहेदेवेत्येषु परेषु दीर्घमापद्यते । इति हकारे परे अद्यशब्दाकारो दीर्घो जातः । तेन अद्याहुवेम इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीन्द्रायत्त्वाविश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाविश्वकर्म्मणे ॥ ४६ ॥ [१-२०] उपयामगृहीतोसि ॥ उपयामगृहीतोस्युग्नयेत्त्वागायत्रच्छन्दसङ्गृह्णामीन्द्रायत्त्वात्रिष्टुप्छन्दसङ्गृह्णामिविश्वेभ्यस्त्वादेवेभ्योजगच्छन्दसङ्गृह्णाम्यनुष्टुप्तेभिगुरः ॥४७॥ व्रेशीनान्त्वा ॥ व्रेशीनान्त्वापत्क्रमुन्नाधूनोमिकुकूननानान्त्वापत्क्रमुन्नाधूनोमिभुन्दनानान्त्वापत्क्रमुन्नाधूनोमिमुदिन्तमानान्त्वापत्क्रमुन्नाधूनोमिमुधुन्तमाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्वापत्नमुन्नाधूनोमिशुक्रन्त्वाशुक्रऽआधूनोम्म्यह्नौरूपेसूर्य्यस्यरश्मिषु ॥ ४८ ॥ कुकुभꣳरूपं । वृषभस्यरोचतेबृहच्छुक्रꣳशुक्रस्यपुरोगाꣳसोमꣳसोमस्यपुरोगाꣳ ॥ यत्तेसोमादाभ्यन्नामुजागृवितस्म्मैत्त्वागृह्णामितस्म्मैतेसोमुसोमायुस्वाहा ॥ ४९ ॥ उशिक्त्वम् ॥ उशिक्त्वन्देवसोमाग्नेꣳप्रियम्पाथोपीहिवृशीत्त्वन्देवसोमेन्द्रस्यप्रियम्पाथोपीहयुस्म्मत्सखात्त्वन्देवसोमुविश्वैषान्देवानाम्प्रियम्पाथोपीहि ॥ ५० ॥ [४-२१]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहरतिः ॥ इहरतिरिहरमद्धमिहधृतिरिहस्वधृतिःस्वाहा ॥
उपसृजन्धुरुणम्मात्रेधुरुणोमातरन्धयन् ॥ रायस्पोषमस्मा
सुदीधरत्स्वाहा ॥ ५१ ॥ सुत्रस्युऽऋद्धिः ॥ सुत्रस्युऽऋद्धिर
स्यगन्मज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्याऽअध्यारुहामा
विदामदेवान्त्स्वर्ज्योतिः ॥ ५२ ॥ युवन्तम् ॥ युवन्तमि
न्द्रापर्व्वतापुरोयुधायोनः पृतन्यादपुतन्तमिद्धतंवज्रेणतन्त
मिद्धतम् ॥ दूरेचत्तायच्छन्त्सद्गहनंन्यदिनक्षत् ॥ अस्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुद्धशत्रुँन्परिशूरविश्वतोदुर्म्मादर्षीष्टविश्वतः ॥ भूर्भुवःस्वः सुप्प्रजाःप्प्रजाभिः स्यामसुवीरांवीरैःसुपोषाःपोषैः ॥ ५३ ॥ [३-२२] परमेष्ठ्यभिधीतः । प्प्रजापतिर्वाचिव्याहृतायामन्धोऽअच्छैतःसवितासुन्यांविश्वकर्म्मादीक्षायाम्पूषासोमक्रयेपण्यामिन्द्रश्च ॥ ५४ ॥ इन्द्रश्च । मरुतश्चक्रयायोपोत्थितो सुरःपण्यमानोमित्रःक्रीतोविष्णुःशिपिविष्टऽऊरावासन्नो

१ परमेष्ठ्यभिधीतः । अत्र परमेस्थ्यभिधीतः इत्यत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सकारस्य षत्वे पात्तथौ-मूर्धन्यम् (शु. य. प्रा. ३ अ. ८१ सू.) इत्यनेन षकारात्परौ तथौ मूर्धन्यत्वमापद्येते । तकारस्य टकारो थकारस्य ठकारो भवतीति ज्ञेयम् । एवं थकारस्य ठकारे कृते ऊष्मान्तास्थश्च स्पर्शाः (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन ठकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुर्न्नरन्धिषꣳप्रोह्यमाणꣳसोमः ॥ ५५ ॥ प्रोह्यमाणꣳ
सोमः ॥ प्रोह्यमाणꣳसोमऽआगतोवरुणऽआसुन्द्यामासन्नो
ग्निराग्नीद्रऽइन्द्रोहविर्द्धानेथर्वोपावहिह्रुयमाणोविश्वेदेवाः
॥ ५६ ॥ विश्वेदेवाः ॥ विश्वेदेवाऽअद्दशुषुन्युप्तोविष्णुरा
प्रीतपाऽआप्प्याय्यमानोयमःसुयमानोविष्णुःसम्भ्रियमा
णोवायुःपूयमानꣳशुक्रःपूतःशुक्रःक्षीरश्रीर्म्मन्थीसंक्रुश्रीर्वि

१ आप्प्याय्यमानः। अत्र आप्यायमानो यमो० (शु. य. प्रा. ४ अ. १५१ सू.) इत्यनेन द्विः यकारा संयोगा भवन्ति तेन द्वियकारे कृते पुनस्तृतीये क्रमजे यकारे प्राप्ते तस्य निषेधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वेदेवाः ॥ ५७ ॥ विश्वेदेवाः ॥ विश्वेदेवाश्चमसेषून्नीतोसुर्हो
मायोद्यतोरुद्रोहूयमानोवातोऽभ्यावृत्तोनृचक्षाः प्रतिक्ख्यातो
भक्षोभक्ष्यमाणः पितरोनाराशुद्धसाः सन्नः सिन्धुः ॥ ५८ ॥
सन्नः सिन्धुः ॥ सन्नः सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्रि
यमाणः सलिलः प्रप्लुतोययोरोजसास्कभितारजांसिवीर्यै
भिर्वीरतमाशविष्ठा ॥ यापत्त्येतेऽअप्रतीतासहोभिर्विष्णूऽ
अगन्वरुणापूर्वहूतौ ॥ ५९ ॥ देवान्दिवम् ॥ देवान्दिवम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्यज्ञस्त्ततोमाद्रविणमष्टुमनुष्ष्यानुन्तारिक्षमगन्यज्ञस्त्ततो
माद्रविणमष्टुपितृन्पृथिवीमंगन्यज्ञस्त्ततोमाद्रविणमष्टुयङ्कञ्च
लोकमगंन्यज्ञस्त्ततोमेभुद्रमंभूत् ॥ ६० ॥ चतुस्त्रिꣳशत्त
न्तवꣳ ॥ चतुस्त्रिꣳशत्तन्तवोयेवितत्किरेयऽइमँयज्ञꣳस्व
धयाददन्ते ॥ तेषांञ्छिन्नꣳसम्वेतद्दधामिस्वाहाघर्म्मोऽ
अप्प्येतुदेवान् ॥ ६१ ॥ यज्ञस्यदोहं÷ ॥ यज्ञस्यदोहोवितं
तꣳपुरुत्रासोऽअष्टुधादिवमुन्वातंतान ॥ सयंज्ञधुक्क्ष्वमहिमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्प्रजायाꣳरायस्पोषंविश्वमायुरशीयस्वाहा ॥ ६२ ॥ आप
वस्व ॥ आपवस्वहिरण्यवदश्वंवत्सोमवीरवत् ॥ वाजङ्गोम
न्तमाभरस्वाहा ॥ ६३ ॥ [१०-२३] ॥ इतिश्रीवाजसनेय
संहितायामष्टमोऽध्यायः ॥ ८ ॥ श्रीवेदपुरुषाय नमः ॥ अनु
वाकसूत्रम् ॥ देवसवितश्चतस्र, इंद्रस्यवज्रः पंच, देवस्याहं
दशा, पयेस्वाहातिस्रो, वाजस्येममष्टा, वग्निरेकाक्षरेणचतुष्कौ,

१ हिरण्यवदश्ववत् । अत्र अश्वशब्दस्य वत्परे अश्वरश्मि० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन अश्वशब्दाकारस्य दीर्घाकारे प्राप्ते नाश्ववद्धिरण्यात् (शु. य. प्रा. ३ अ. ९९ सू.) इत्यनेन हिरण्यशब्दात्परस्याश्वशब्दाकारो न दीर्घ इति निषेधाज्ञात्राश्वशब्दाकारो दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षतेचतुष्कौ, सवितात्वाद्वे, अष्टौचत्वारिꣳशत् [अ. ९ मं. ४०
अनु. ८] हरिः ॐ ॥ देवंसवितꣳ ॥ देवंसवितुꣳप्रसुंवयुज्ञम्प्रसुं
वयुज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वꣳकेतुपूꣳकेतन्नꣳपुनातुवाच
स्पतिर्व्वाजन्नꣳस्वदतुस्वाहा ॥ १ ॥ ध्रुवसदन्त्वा । नृषदम्मनुꣳ
सदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रा
यत्त्वाजुष्टतमम् ॥ अप्सुषदन्त्वाघृतसदंद्योमसदमुपयाम
गृहीतोसीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्त्वाजुष्टत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम् ॥ पृथिविसदन्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकसद
मुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्राय
त्त्वाजुष्टतमम् ॥ २ ॥ अपाꣳरसम् ॥ अपाꣳरसमुद्वयसꣳ
सूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरसस्तंवोगृह्णाम्यु
त्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रा

१ पृथिविसदन्त्वा । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन समानपदे षत्वप्राप्तौ पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन पृथिविपरस्य सस्य षत्वनिषेधः । एवं दिविसदन्देवसदम् इत्यादिषु बोध्यम् । २ अपाꣳरसम् अत्र । दीर्घादर्द्धमात्रा पूर्वाचाध्यर्द्धा (शु. य. प्रा. ४ अ. १४९ सू.) इत्यनेन दीर्घात्स्वरात्परोऽनुस्वारोऽर्धमात्राकालो भवति तेन अपामित्यस्याऽऽकारात्परस्य मकारस्यानुस्वारस्यार्द्धमात्राप्रदर्शको ह्रस्वो गुंकारोऽत्र ज्ञेयः । एवं अपाꣳरसस्य । रजाꣳसि, प्रजायाꣳरायस्पोषम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्त्वाजुष्टंतमम् ॥ ३ ॥ ग्रहांऽऊर्ज्जाहुतयः ॥ ग्रहांऽऊर्ज्जाहुत
योव्यन्तोविप्रांयमतिम् ॥ तेषांविशिंप्रियाणांवोहमिषमूर्ज्जं
समंग्रभमुपयामगृहीतोसीन्द्रांयत्त्वाजुष्टंङ्गृह्णाम्येषतेयोनि
रिन्द्रांयत्त्वाजुष्टंतमम् ॥ सुम्पृचौस्त्थःसम्मांभद्रेणपृङ्क्तंविपृचौ
स्त्थोविमांपाप्मनांपृङ्क्तम् ॥ ४ ॥ [४-१] इन्द्रस्यवज्ज्रः ॥
इन्द्रस्यवज्ज्रोसिवाजसास्त्वयायंवाजंसेत् ॥ वाजंस्यनुप्प्र
सवेमातरंम्महीमदितिन्नामवचसाकरामहे ॥ यस्यामिदंविश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्भुवनमाविवेशतस्यान्नोदेवः संविताधर्म्मंसाविषत् ॥ ५ ॥
अप्स्वन्तः॥ अप्स्वन्तरमृतमप्सुभेषजमपामुतप्रशस्तिषष्व
श्वाभवतवाजिनः ॥ देवीरापोयोवऽऊर्म्मिः प्रतूर्त्तिः कुकुन्मा
न्वाजसास्तेनायंवाजंऽसेत् ॥ ६ ॥ वातोवा ॥ वातोवामनो
वागन्धर्वाः सप्तविंऽशतिः ॥ तेऽअग्रेश्वमयुञ्जँस्तेऽअस्मि
ञ्जवमादधुः ॥ ७ ॥ वातरंऽहाभव । वाजिन्युज्यमानऽइन्द्र
स्येवदक्षिणःश्रियैधि ॥ युञ्जन्तुत्वामरुतोविश्ववेदसऽआतेत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टांपत्त्सुजुवन्दंधातु ॥८॥ जुवोयः ॥ जुवोयस्त्तेंवाजिन्निहितो
गुहायःश्श्येनेपरीत्तोऽअर्चंरच्चवातें ॥ तेनंनोवाजिन्बलंवान्ब
लेनवाजजिच्चभवसमंनेचपारयिष्णुः ॥ वाजिंनोवाजजितो
वाजंꣳसरिष्यन्तोबृहस्पतेंर्भागमवंजिग्घ्रत ॥ ९ ॥ [५-२]
देवस्याहम् ॥ देवस्याहꣳसंवितुःसुवेसत्त्यसंवसोबृहस्पतेंरुत्त
मन्नाकंꣳरुहेयम् ॥ देवस्याहꣳसंवितुःसुवेसत्यसंवसुऽइन्द्रंस्यो
त्तमन्नाकंꣳरुहेयम् ॥ देवस्याहꣳसंवितुःसुवेसत्त्यप्प्रंसवसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतेरुत्तमन्नाकमरुहम् ॥ देवस्याहꣳसवितुःसवेसत्त्यप्प्र
सवसऽइन्द्रस्योत्तमन्नाकमरुहम् ॥ १० ॥ बृहस्पतेवाजम् ॥
बृहस्पतेवाजञ्जयबृहस्पतयेवाचंवदतबृहस्पतिंवाजञ्ज्ञाप
यत ॥ इन्द्रवाजञ्जयेन्द्रायवाचंवदतेन्द्रंवाजञ्ज्ञापयत ॥ ११ ॥
एषावः ॥ एषावꣳसासत्त्यासंवागंभूद्ययाबृहस्पतिंवाजम
जींजपताजींजपतबृहस्पतिंवाजंवनस्पतयोविमुञ्चयद्धम् ॥
एषावꣳसासत्त्यासंवागंभूद्ययेन्द्रंवाजमजींजपताजींजपतेन्द्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाजंवनस्पतयोविमुंञ्चध्वम् ॥१२॥ देवस्याहम् ॥ देवस्याहꣳ
सवितुःसवेसुत्त्यप्प्रसवसोबृहस्पतेर्वाजजितोवाजंजेषम् ॥
वाजिनोवाजजितोद्धनस्कब्भ्नुवन्तोयोजनामिमानाꣳकाष्ठां
ङ्गच्छत ॥ १३ ॥ एषस्य ॥ एषस्यवाजीक्षिपणिन्तुरण्य
तिग्रीवायाम्बद्धोऽअपिकक्षऽआसनि ॥ क्रतुन्दधिक्राऽअ
नुसꣳसनिष्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा ॥ १४ ॥

१ एषः स्यः वाजी । अत्र स्य एव च (शु. य. प्रा. ३ अ. १७ सू.) इति सूत्रेण स्यपरे व्यञ्जने एष इत्यस्य विसर्गस्य लोपः । तथैव स्य इत्यस्य वाजी-घटिते वकारे व्यञ्जने परे विसर्जनीयस्य लोपः । तेन एषस्यवाजी । अत्र लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्येऽयं लोपनामा सन्धिर्विज्ञेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उतस्म्मा ॥ उतस्म्मास्युद्रवंतस्त्तुरण्यतः पूर्ण्णन्नवेरनुवातिप्र
गर्द्धिनः ॥ श्येनस्येवद्रजतोऽअङ्कसम्परिदधिक्काव्र्ण्णः
सहोर्जातरित्रतुः स्वाहा ॥ १५ ॥ शन्नः ॥ शन्नोभवन्तुवा
जिनोहवेषुदेवतातामितद्रवः स्वर्काः ॥ जम्भयन्तोहिंवृकुद्ध
रक्षांसिसनेम्म्यस्म्मद्युयवन्नमीवाः ॥ १६ ॥ तेनः ॥ तेनोऽ
अर्वन्तोहवनश्रुतोहवंविश्वेशृण्वन्तुवाजिनोमितद्रवः ॥ सहु
स्रसामेधसातासनिष्ष्यवोमुहोयेधनंसमिथेषुजब्भ्रिरे ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाजेवाजेवत । वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥
अस्यमद्धः पिबतमादयध्वन्तृप्तायातपथिभिर्देवयानैः ॥ १८ ॥
आमा ॥ आमावाजस्यप्रसवोजगम्म्यादेमेद्यावापृथिवीविश्व
रूपे ॥ आमागन्ताम्पितरामातराचामासोमोऽअमृतत्त्वेनगम्म्यात् ॥ वाजिनोवाजजितोवाजꣳससृवाꣳसोबृहस्पतेर्भागमवजिग्घ्रतनिमृजानाः ॥ १९ ॥ [१०-३] आपयेस्वाहा । स्वापयेस्वाहापिजायस्वाहाक्रतवेस्वाहावसवेस्वाहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हर्ऽ्पतयेस्वाहाहर्ऽ्मुग्ग्धायस्वाहामुग्ग्धायवैनꣳशिनायस्वाहाविनꣳशिनंऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहा ॥ २० ॥ आयुर्ऽ्यज्ञेन । कल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्ऽ्यज्ञेनकल्पताꣳश्रोत्रंऽ्यज्ञेनकल्पताम्पृष्ठंऽ्यज्ञेनकल्पताँऽ्यज्ञोयज्ञेनकल्पताम् ॥ प्रजापतेꣳप्रजाऽअभूमस्वर्देवाऽअगन्मामृताऽअभूम ॥ २१ ॥

१ अहर्ऽ्पतये । अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते, अहःपतौ रेफम् (शु. य. प्रा. ३ अ. ३९ सू.) इत्यनेन पतिशब्दे परे अहरित्यस्य विसर्जनीयस्य रेफः । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्म्मेवं ॥ अस्म्मेवोऽअस्त्वन्द्रियमस्म्मेनृम्णमुतक्रतुर
स्म्मेवर्च्चाँसिसन्तुवः ॥ नमोमात्रेपृथिव्यैनमोमात्रेपृथि
व्याऽइयन्तेराड्युन्तासियमनोद्धुवोसिधरुणं ॥ कृष्यैत्त्वा
क्षेमायत्त्वारय्यैत्त्वापोषायत्त्वा ॥ २२ ॥ [३-४] वाज
स्येमम् ॥ वाजस्येमम्प्रसवःसुषुवेग्रेसोमराजानमोषधीष्वप्
सु ॥ ताऽअस्म्मभ्यम्मधुमतीर्भवन्तुवयँराष्ट्रेजागृयाम
पुरोहिताःस्वाहा ॥ २३ ॥ वाजस्येमाम् ॥ वाजस्येमाम्प्रसवःशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रियेदिवमिमाचुविश्वाभुवनानिसम्राट् ॥ अदित्तसन्तन्दा
पयतिप्रजानन्त्सनोरयिꣳसर्ववीरन्नियच्छतुस्वाहा ॥ २४ ॥
वाजस्यनु । प्रसवऽआबभूवेमाचुविश्वाभुवनानिसर्वतः ॥
सनेमिराजापरियातिविद्वान्प्रजाम्पुष्टिंवर्द्धयमानोऽअस्मेस्वा
हा ॥ २५ ॥ सोमꣳराजानम् । सोमꣳराजानमवसेग्निमु
न्वारभामहे ॥ आदित्यान्विष्णुꣳसूर्य्यम्ब्रह्माणञ्चबृहस्प
तिꣳस्वाहा ॥ २६ ॥ अर्य्यमणम्बृहस्पतिम् ॥ अर्य्यमण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्बृहस्पतिमिन्द्रन्दानायचोदय ॥ वाचंविष्णुꣳसरस्वतीꣳ सवितारञ्चवाजिनꣳस्वाहा ॥ २७ ॥ अग्नेऽअच्छ ॥ अग्नेऽ अच्छावदेहनꣳप्रतिनꣳसुमनाभव ॥ प्रनोयच्छसहस्राजित्त्वꣳ हिधनदाऽअसिस्वाहा ॥ २८ ॥ प्रनः ॥ प्रनोयच्छत्त्वर्य्यमा प्रपूषाप्रबृहस्पतिः ॥ प्रवाग्देवीददातुनꣳस्वाहा ॥२९॥ देव स्यत्त्वा । सवितुःप्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥

---

१ प्रनो यच्छत्वर्यमा । अत्र ऋषरेभ्यो नकारो णकारꣳ समानपदे (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन ऋकारषकाररेफेभ्य उत्तरो नकारो णकारमापद्यते समानपदे । अनेन समानपदे णत्वविधानादत्र प्र नो इति पदयोः समानपदत्वाभावान्न णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरस्वत्यैवाचोयन्तुर्य्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ[1] ॥ ३० ॥ [८-५] अग्निरेकाक्षरेण। प्राणमुदजयत्तमुज्जेषमश्विनौद्व्यक्षरेणाद्विपदोमनुष्यानुदजयतान्तानुज्जेषंविष्णुस्त्र्यक्षरेणत्रींल्लोकानुदजयत्तानुज्जेषꣳसोमश्चतुरक्षरेणचतुष्पदःपशूनुदजयत्तानुज्जेषम्पूषापञ्चाक्षरेण ॥ ३१ ॥ पूषापञ्चाक्षरेण ॥ पूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउज्जे

१ अभिषिञ्चामि। अत्र अभेश्च (शु. य. प्रा. ३ अ. ६५ सू.) इत्यनेन अभेः परस्य सिञ्चामीतिपदघटितस्य सकारस्य षत्वे रूपम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षढ्ँसवितापडक्षरेणषड्ऋतूनुदजयुत्तानुर्ज्जेषम्मरुतः सप्ताक्षरे
णसप्तग्राम्यान्पशूनुदजयँस्तानुर्ज्जेषम्बृहस्पतिरष्टाक्षरेण
गायत्रीमुदजयुत्तामुर्ज्जेषम्मित्रोनवाक्षरेण ॥ ३२ ॥ मित्रो
नवाक्षरेण । त्रिवृतꣳस्तोममुदजयुत्तमुर्ज्जेषंवरुणोदशाक्षरेण
विराजमुदजयुत्तामुर्ज्जेषमिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदज
युत्तामुर्ज्जेषंविश्वेदेवाद्वादशाक्षरेणजगतीमुदजयँस्तामुर्ज्जेषंव
सवस्त्रयोदशाक्षरेण ॥ ३३ ॥ वसवस्त्रयोदशाक्षरेण । त्रयोदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शꣳस्तोमꣳमुदजयँस्तमुज्जेषꣳरुद्राश्चतुर्दशाक्षरेणचतुर्दशꣳ
स्तोमꣳमुदजयँस्तमुज्जेषमादित्याः पञ्चदशाक्षरेणपञ्चदशꣳस्तो
मꣳमुदजयँस्तमुज्जेषमदितिꣳषोडशाक्षरेणषोडशꣳस्तोमꣳमुद
जयँस्तमुज्जेषम्प्रजापतिꣳसप्तदशाक्षरेणसप्तदशꣳस्तोमꣳमुद
जयँस्तमुज्जेषम् ॥ ३४ ॥ [४-६] एषते । निर्ऋतेभागस्त
ऽ्ऽषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यः÷पुरꣳसद्युꣳस्वाहायमनेत्रे

१ अदितिꣳषोडशा । अत्र प्रत्ययसवर्णम्मुदि शाकटायनः (शु. य. प्रा. ३ अ. ९ सू.) इति विसर्गस्य परसवर्णे प्राप्ते अविकारं शाकल्यः शषसेषु (शु. य.प्रा. ३ अ. १० सू.) इत्यनेन परसवर्णनिषेधाद्विसर्ग एव । लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्ये प्रकृतिभावाख्योऽयं सन्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्भ्योदेवेब्भ्योदक्षिणासद्यꣳस्वाहाविश्वदेवनेत्रेब्भ्योदेवेब्भ्यः
पश्चात्तसद्यꣳस्वाहामित्रावरुणनेत्रेब्भ्योवामुरुनेत्रेब्भ्योवादेवे
ब्भ्यऽउत्तरासद्यꣳस्वाहासोमनेत्रेब्भ्योदेवेब्भ्यऽउपरिसद्योदुवं
स्वद्वयꣳस्वाहा॥३५॥ येदेवाः॥ येदेवाऽअग्निनेत्राꣳपुरꣳसदुस्त्ते
ब्भ्यꣳस्वाहायेदेवायमनेत्रादक्षिणासदुस्त्तेब्भ्यꣳस्वाहायेदेवा
विश्वदेवनेत्राꣳपश्चात्तसदुस्त्तेब्भ्यꣳस्वाहायेदेवामित्रावरुणने
त्रावामुरुनेत्रावोत्तरासदुस्त्तेब्भ्यꣳस्वाहायेदेवाःसोमनेत्राऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपरिसदोदुवस्वन्तुस्तेभ्यः स्वाहा ॥ ३६ ॥ अग्नेसहस्व ॥ अग्नेसहस्वपृतनाऽअभिमातीरपास्य ॥ दुष्टरस्तरन्नरातीर्वर्चो धायज्ञवाहसि ॥ ३७ ॥ देवस्यत्त्वा । सवितुः प्रसवेऽश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ उपांशोर्वीर्य्येणजुहोमि हुतꣳरक्षः स्वाहारक्षसान्त्वावधायावधिष्म्मरक्षोवधिष्म्मामुमसौहतः ॥ ३८ ॥ [४-७] सुवितात्त्वा । सुवानांसुवता

१ उपरिसदः । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन षत्वप्राप्तौ पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन उपरिशब्दात्परस्य सदः इत्यस्य सस्य प्रकृतिभावे जाते न षत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मग्निर्गृहपतीनाᳬसोमोवनस्पतीनाम् ॥ बृहस्पतिर्वाचऽ
इन्द्रोज्यैष्ठ्यायरुद्रःपशुभ्योमित्रःसत्त्योवरुणोधर्म्मपतीना
म् ॥ ३९ ॥ इमन्देवाः ॥ इमन्देवाऽअसपत्त्क्रꣳसुवद्ध्वम्महते
क्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय ॥
इममुमुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमो
स्माकम्ब्राह्मणानाᳬराजा ॥ ४० ॥ [२-८] ॥ इतिश्रीवाज
सनेयसंहितायांनवमोऽध्यायः ॥ ९ ॥ श्रीवेदपुरुषायनमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुवाकसूत्रम् ॥ अपोदेवाश्चतस्रः, सोमस्यत्विषिः पञ्चा, वेष्टादन्दशूकाः सप्त, सोमस्यत्वाचतस्र, ऽइन्द्रस्यवज्रः पञ्च, स्योनासिचतस्रः, सवित्राप्रसवित्रैका, श्विभ्यांपच्यस्वचतस्रो, ष्टौचतुस्त्रिꣳशत् [अ. १० मं. ३४ अनु. ८] हरिः ॐ॥ अपोदेवाꣳ॥ अपोदेवामधुमतीरगृब्भ्णन्नूर्जस्वतीराजस्वश्चितानाꣳ ॥ याभिर्मित्रावरुणावब्भ्यषिञ्चन्याभिरिन्द्रमनयन्नत्त्यरातीꣳ ॥ १ ॥

१ अभ्यषिञ्चन् । अभि असिञ्चन् । इति द्वे पदे अत्र अभेश्च (शु. ३ अ. ६५ सू.) अभेरुपसर्गात्परस्य सिञ्चतेः सकारः षकारमापद्यते संहितायाम् । इति इत्यनेनासिञ्चन्पदघटिताकारस्य व्यवधानेन षत्वाप्राप्तौ अव्यवहितोऽपि (शु. य. प्रा. ३ अ. ६६ सू.) इत्यनेन व्यवधानेऽपि षकारे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृष्णंऽऊर्म्मिः ॥ वृष्णंऽऊर्म्मिरंसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहा
वृष्णंऽऊर्म्मिरंसिराष्ट्रदाराष्ट्रममुष्म्मैदेहिवृषसेनोसिराष्ट्रदारा
ष्ट्रम्मेदेहिस्वाहावृषसेनोसिराष्ट्रदाराष्ट्रममुष्म्मैदेह्यर्त्थेतंस्थ
॥ २ ॥ अर्त्थेतंस्थ । राष्ट्रदाराष्ट्रम्मेदत्तस्वाहार्त्थेतंस्थराष्ट्र
दाराष्ट्रममुष्म्मैदत्तौजंस्वतीस्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहौजंस्व
तीस्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापं÷परिवाहिणींस्थराष्ट्रदाराष्ट्र
म्मेदत्तस्वाहापं÷परिवाहिणींस्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तापा

सं. १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्पतिरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाम्पतिरसिराष्ट्रदाराष्ट्रममु
ष्म्मैदेह्यपाङ्ब्भौसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाङ्ब्भौसिराष्ट्र
दाराष्ट्रममुष्म्मैदेहिसूर्य्यत्त्वचसस्त्थ ॥ ३ ॥ सूर्य्यत्त्व
चसस्त्थ । राष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्यत्त्वचसस्त्थराष्ट्रदा
राष्ट्रममुष्म्मैदत्तसूर्य्यवर्च्चसस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्य
वर्च्चसस्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तमान्दास्त्थराष्ट्रदाराष्ट्रम्मेदत्त
स्वाहामान्दास्त्थराष्ट्रदाराष्ट्रममुष्म्मैदत्तव्रजक्षितस्त्थराष्ट्रदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राष्ट्रम्मेदत्तस्वाहाब्रजक्षितंस्त्थराष्ट्रदाराष्ट्रमुमुष्म्मैदत्तुवाशां
स्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहावाशांस्त्थराष्ट्रदाराष्ट्रमुमुष्म्मैदत्तु
शविष्ठास्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहाशविष्ठास्त्थराष्ट्रदाराष्ट्रमु
मुष्म्मैदत्तुशक्करीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तुस्वाहाशक्करीस्त्थराष्ट्र
दाराष्ट्रमुमुष्म्मैदत्तजनुभृतंस्त्थराष्ट्रदाराष्ट्रम्मेदत्तुस्वाहाजनुभृ
तंस्त्थराष्ट्रदाराष्ट्रमुमुष्म्मैदत्तविश्वभृतंस्त्थराष्ट्रदाराष्ट्रम्मेदत्तु
स्वाहाविश्वभृतंस्त्थराष्ट्रदाराष्ट्रमुमुष्म्मैदुत्तापं÷स्वराजंस्त्थरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ट्रदाराष्ट्रमुमुष्म्मैदत्त ॥ मधुमतीर्म्मधुमतीभिः पृञ्चयन्ताम्महि
क्षत्रङ्क्षत्रियायवन्वानाऽअनाधृष्टाः सीदतसहौजसोमहिक्षत्रङ्क्ष
त्रियायदधतीः ॥ ४ ॥ [४-१] शतम् ॥ ४०० ॥ सोमस्यत्त्वि
षिः ॥ सोमस्यत्त्विषिरसितवेवमेत्त्विषिर्भूयात् ॥ अग्नयेस्वा
हासोमायस्वाहासवित्रेस्वाहासरस्वत्यैस्वाहापूष्णेस्वाहाबृह
स्पतयेस्वाहेन्द्रायस्वाहाघोषायस्वाहाश्लोकायस्वाहाँशायु
स्वाहाभगायस्वाहार्य्यम्णेस्वाहा ॥ ५ ॥ पवित्रेस्थः ॥ पवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैस्त्थोवैष्णुद्यौसवितुर्वः÷प्रसुवऽउत्त्पुनाम्यच्छिद्रेणपुवि
त्रेणसूर्य्यस्यरश्मिभिः÷ ॥ अनिभृष्टमसिवाचोबन्धुस्तपो
जाःसोमस्यदात्रमसिस्वाहाराजस्वः÷ ॥ ६ ॥ सुधमादौद्युम्नि
नीः ॥ सुधमादौद्युम्निनीरापऽएताऽअनाधृष्टाऽअपस्योवसा
नाः ॥ पस्त्यासुचक्रेवरुणःसुधस्त्थमुपाꣳशिशुर्म्मातृतमा
स्वन्तः ॥ ७ ॥ क्षत्रस्योल्बम् ॥ क्षत्रस्योल्बमसिक्षत्रस्यजरा
युवसिक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसीन्द्रस्यवार्त्रघ्नमसिमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रस्यांसिव्वरुणस्यासित्त्वयायंवृत्रंवधेत् ॥ द्रुबासिरुजासिक्षु
मासि ॥ पातैनम्प्राञ्चम्पातैनम्प्रत्यञ्चम्पातैनन्तिर्य्यञ्चन्दि
ग्भ्यःपात ॥ ८ ॥ आविर्म्मर्य्याः ॥ आविर्म्मर्य्याऽआ
वित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रोवृद्धश्रवाऽआवित्तौमित्रा
वरुणौधृतव्रतावावित्तःपूषाविश्ववेदाऽआवित्तेद्यावापृथिवीवि
श्वशम्भुवावावित्तादितिरुरुशर्म्मा ॥ ९ ॥ [५-२] अवेष्टा
दन्दुशूकाः ॥ अवेष्टादन्दुशूकाःप्राचीमारोहगायत्रीत्त्वांव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुरथन्तरꣳसामंत्रिवृत्स्तोमोंवसन्तऽऋतुर्ब्रह्मद्रविंणन्दक्षिंणा
मारोंह ॥१०॥ दक्षिंणामारोंह । त्रिष्टुप्त्वांवतुबृहत्सामंपञ्चद
शस्तोमोंग्रीष्म्मऽऋतुःक्षत्रन्द्रविंणम्प्रतीचीमारोंह ॥ ११ ॥
प्रतीचीमारोंह । जगंतीत्त्वावतुवैरूपꣳसामंसप्तदशस्तोमों
वर्षाऽऋतुर्विड्द्रविंणमुदींचीमारोंह ॥ १२ ॥ उदींचीमारोंहा ।
नुष्टुप्त्वांवतुवैराजꣳसामैकविꣳशस्तोमं÷शरदृतुःफलुन्द्रविं
णमूर्द्धामारोंह ॥ १३ ॥ ऊर्द्धामारोंह । पङ्क्तिस्त्वांवतुशाक्कर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रैवतेसामंनीत्रिणवत्रयस्त्रिंशौस्तोमौहेमन्तशिशिरावृतूवर्चो
द्रविणम्प्रत्त्यंस्तुन्नमुंचेंशिरं÷ ॥ १४ ॥ सोमंस्यत्त्विषिं÷ ॥
सोमंस्यत्त्विषिंरसितवेंवमेत्त्विषिंर्भूयात् ॥ मृत्त्योंःपाह्योजो
जोंसिसहोंस्यमृतंमसि ॥ १५ ॥ हिरंण्यरूपाऽउषसं÷ ॥
हिरंण्यरूपाऽउषसोंविरोकऽउभाविंन्द्राऽउदिंथुंसूर्य्यंश्च ॥
आरोंहतंवरुणमित्रगर्त्तन्ततंश्चक्षाथामदितिन्दितिंञ्चमित्रोंसि
वरुणोसि ॥ १६ ॥ [७-३] सोमंस्यत्त्वा । द्युम्नेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिषिञ्चाम्यग्नेर्भ्राजसासूर्य्यस्यवर्च्चसेन्द्रस्येन्द्रियेण ॥ क्षत्रा
णाङ्क्षत्रपतिरेध्यतिदिद्युन्नपाहि ॥ १७ ॥ इमन्देवाः ॥ इम
न्देवाऽअसपत्नꣳसुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहते
जानराज्यायेन्द्रस्येन्द्रियाय ॥ इममुमुष्यपुत्रमुमुष्यैपुत्र
मुस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणानाꣳराजा
॥ १८ ॥ प्रपर्व्वतस्य । वृषभस्यपृष्ठान्नावश्चरन्तिस्वसिचऽइया
नाः ॥ ताऽआवघृत्रन्नधरागुदक्ताऽअहिम्बुध्न्यमनुरीयमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णाꣳ ॥ विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोर्ꣳ
क्रान्तमसि ॥ १९ ॥ प्रजापतेन । त्त्वदेतान्यन्योविश्वारूपा
णिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयमुमु
ष्यपितासावस्यपितावयꣳस्यामुपतयोरयीणाꣳस्वाहा ॥ रुद्र
यत्तेक्रिविपरन्नामतस्मिन्हुतमस्यमेष्टमसिस्वाहा ॥ २० ॥
[४-४] इन्द्रस्यवज्रः ॥ इन्द्रस्यवज्रोसिमित्रावरुणयोस्त्वा
प्रशास्त्रोः प्रशिषायुनज्मि ॥ अध्यथायैत्त्वास्वधायैत्त्वारिष्टोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्ज्जुनोमुरुतांम्प्रसुवेनंजुयापांमुमनंसासमिंन्द्रियेणं ॥ २१ ॥
मातं ॥ मातंऽइन्द्रतेव्वयन्तुंराषाडयुंक्तासोऽअब्रह्मताविं
दंसाम ॥ तिंष्ठारथुमधियंव्वंज्ज्रहुस्त्तारुम्मीन्देंवयमसुंस्व
श्वांन् ॥२२॥ अग्नयेंगृहपंतये ॥ अग्नयेंगृहपंतयेस्वाहासोमांयु
व्वनुस्पतंयेस्वाहांमुरुतामोजंसेस्वाहेन्द्रंस्येन्द्रियायुस्वाहां ॥
पृथिंविमातुर्म्मामांहिंऽसीर्म्मोंऽअहन्त्वाम् ॥ २३ ॥ हुंसः शुं
चिषत् ॥ हुंसः शुंचिषद्वसुंरन्तरिक्षुसद्धोतांव्वेदिषदतिंथिर्दुरोणं

१ तिष्ठारथेन । अत्र तिष्ठाद्युदात्तम् (शु. य. प्रा. ३ अ. १०४ सू.) इत्यनेन तिष्ठेत्येतत्पदे आद्युदात्ते तस्याकारस्य दीर्घो भवति । अतो दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽ
ऋतम्बृहत् ॥ २४ ॥ इयदसि ॥ इयदस्यायुरस्यायुर्म्मयिधेहि
युङ्क्ष्वि वर्च्चोसि वर्च्चोमयिधेह्यूर्ग्स्यूर्ज्जम्मयिधेहि ॥ इन्द्रस्यवां
वीर्य्यकृतोबाहूऽअभ्युपावहरामि ॥ २५ ॥ [५-५] स्योनासि ।
सुषदासिक्षत्रस्ययोनिरसि ॥ स्योनामासीदसुषदामासीदक्षत्र
स्ययोनिमासीद ॥ २६ ॥ निषसाद । धृतव्रतोवरुणःपस्त्यास्वा ॥
साम्राज्यायसुक्रतुः ॥ २७ ॥ अभिभूरसि ॥ अभिभूरस्येता

१ निषसाद । अत्र नि ससाद इति पदम् ससाद च (शु. य. प्रा. ३ अ. ६० सू.) इत्यनेन नेः परस्य ससादशब्दस्य सकारस्य षकारे निषसादेति रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्तेपञ्चदिशः÷कल्पन्तान्ब्रह्मँस्त्वम्ब्रह्मासिसवितासिसत्त्य
प्रसवोवरुणोसिसत्त्यौजाऽइन्द्रोसिविशौजारुद्रोसिसुशेवः÷ ॥
बहुकारश्श्रेयस्करभूयस्करेन्द्रस्यवज्रोसितेनमेरध्य ॥ २८ ॥
अग्निःपृथुः ॥ अग्निःपृथुर्द्धर्म्मणस्पतिर्ज्जुषाणोऽअग्निःपृ
थुर्द्धर्म्मणस्पतिराज्यस्यवेतुस्वाहास्वाहाकृताःसूर्य्यस्यरश्मिम
भिर्य्यतद्धः सजातानाम्मध्यमेष्ठ्याय ॥ २९ ॥ [४-६] सवि
त्राप्रसवित्रा । सरस्वत्यावाचात्त्वष्ट्रारूपैःपूष्णापशुभिरिन्द्रे

१ श्रेयस्करभूयस्कर इत्यत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन ककारपकारपरयोः यथायोगं समानपदे सकारः षकारश्च विधीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णास्म्मेबृहस्पतिनाब्रह्मणाव्वरुणेनौजसाग्निनातेजसासोमे
नराज्ञाविष्णुनादशम्म्यादेवतयाप्प्रसूतःप्प्रसर्प्पामि ॥ ३० ॥
[१-७] अश्विभ्याम्पच्यस्व ॥ अश्विभ्याम्पच्यस्वसरस्व
त्यैपच्यस्वेन्द्रायसुत्राम्णेपच्यस्व ॥ व्वायुःपूतःपवित्रेणप्प्र
त्यङ्क्सोमोऽअतिस्रुतः ॥ इन्द्रस्ययुज्ज्यःसखा ॥ ३१ ॥ कुवि
दङ्ग । यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्व्वंव्वियूय ॥ इहेहैषाङ्कृणु

१ प्रत्यङ्क्सोमः । अत्र प्रत्यङ् सोम इति पदम् । ङ्गौ क्ताभ्यां सकारे (शु. य. प्रा. ३ अ. १५ सू.) ङकारनकारौ यथासंख्यं ककारतकाराभ्यां सकारे परे व्यवधीयेते । तेनात्र ङकारात्परस्य ककारे रूपम् । लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्येऽयमागमाख्यः सन्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिभोजंनानियेबर्हिषोनमंऽउक्तिँस्यजंन्ति ॥ उपयामगृहीतो
स्यश्विभ्यांन्त्वासरंस्वत्यैत्त्वेन्द्रांयत्त्वासुत्राम्णे ॥ ३२ ॥ युवꣳ
सुरामंम् ॥ युवꣳसुरामंमाश्विनानमुंचावासुरेसचां ॥ द्विपिपा
नाशुंभस्पतीऽइन्द्रङ्कर्म्मस्वावतम् ॥ ३३ ॥ पुत्रमिंवपितरौ ॥
पुत्रमिंवपितरांवश्विनोभेन्द्रावथुःकाव्यैर्द्दꣳसनांभिः ॥ यत्त्सु
रामुंव्यपिंबःशचींभिःसरंस्वतीत्त्वामघवन्नभिष्णक् ॥ ३४ ॥
[४-८] इतिश्रीवाजसनेयसंहितायांदशमोऽध्यायः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवेदपुरुषायनमः। अनुवाकसूत्रम्। युञ्जानएकादश, प्रतूर्त्तं वाजिन्षोडश, देवस्यत्वादशा, पोदेवीर्द्वादशा, पोह्येकादशा, दितिष्ट्वापञ्चा, कूतिमग्निमष्टादश, सप्तत्र्यशीतिः॥ [अ. ११ मं. ८३ अनु० ७]॥ हरिःॐ॥ युञ्जानः प्रथमम्॥ युञ्जानः प्रथमम्मनस्तत्त्वायसविताधियः॥ अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरत्॥१॥ युक्तेनमनसा। वयन्देवस्यसवितुः सवे॥ स्वर्ग्यायशक्त्या॥ २॥ युक्त्वायसविता। देवान्त्स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्य्यतोधियादिवम् ॥ बृहज्ज्योतिः करिष्यतः सविताप्रसुवाति
तान् ॥ ३ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्रा
विप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइन्महीं
देवस्यसवितुःपरिष्टुतिः ॥ ४ ॥ युजेवाम् ॥ युजेवाम्ब्रह्मपूर्व्य
नमोभिर्विश्लोकऽएतुपथ्येवसूरेः ॥ शृण्वन्तुविश्वेऽअमृत
स्यपुत्राऽआयेधामानिदिव्यानितस्थुः ॥ ५ ॥ यस्यप्रयाणम् ॥
यस्यप्रयाणमन्वन्यऽइद्ययुर्देवादेवस्यमहिमानमोजसा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यः पार्थिवानि विममे सऽएतं शो रजाᳬसि देवः सविता महित्वना ॥ ६ ॥ देव सवितः ॥ देव सवितः प्रसुव यज्ञम् प्रसुव यज्ञपतिम् भगाय ॥ दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ ७ ॥ इमन्नः ॥ इमन्नो देव सवितर्यज्ञम् प्रणय[1] देवाव्यᳬ सखविदᳬ सत्राजितं धनजितᳬ स्वर्जितम् ॥ ऋचा स्तोमᳬ समर्द्धयगायत्रेण रथन्तरम् बृहद्वा गायत्रवर्त्तनि स्वाहा ॥ ८ ॥

१ प्रणय। अत्र प्र नय इति पदम्। अत्र समानपदाभावेन ऋषरेभ्यः इत्यस्याप्राप्तौ प्रनेतिनुदातिहिनोमीनाम् (शु. य. प्रा. ३ अ. ८९ सू.) इत्यनेन प्रपूर्वाणां नेति नुदाति हिनोमि इत्येषां नकारस्य णकारो विधीयते तेनात्र प्रणय इत्यत्र णत्वम्। सूत्रे हिनोमीतिविकरणनिर्देशाद्यत्र विकरणाभावस्तत्र न णत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवस्यत्त्वा । सवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ आददेगायत्रेणच्छन्दसाङ्गिरस्वत्पृथिव्याःसधस्थादग्निम्पुरीष्यमङ्गिरस्वदाभरत्रैष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ९ ॥ अब्भिरसि ॥ अब्भिरसिनार्य्यसित्त्वयावयमग्निꣳशकेमखनितुꣳसधस्थऽआ ॥ जागतेनच्छन्दसाङ्गिरस्वत् ॥ १० ॥ हस्तेऽआधायं । सविताबिभ्रदब्भिरꣳहिरण्ययीम् ॥ अग्ने

१ त्रैष्टुभेन । अत्र ऋषरेभ्यो नकारो णकारꣳ समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन व्यवधानेऽपि विहितस्य प्राप्तस्य णत्वस्य शिलिसिवर्गमध्यमव्यवहितोऽपि (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन शकारलकारसकार (मध्यमवर्ग) चवर्गटवर्गतवर्गव्यवधानेषु ऋषरेभ्यः परस्य नकारस्य प्रकृतिभावादत्र णत्वं निषिध्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिर्निचाय्यपृथिव्याऽअध्याभरदानुष्टुभेनुच्छन्दसाङ्गिर
स्वत् ॥ ११ ॥ [११-१] प्रतूर्त्तंवाजिन् ॥ प्रतूर्त्तंवाजिन्नाद्रवुवरिं
ष्ठामनुसंवतम् ॥ दिविते जन्मपरममन्तरिक्षेतवनाभिः पृथि
व्यामधियोनिरित् ॥ १२ ॥ युञ्जाथाᳬरासभम् ॥ युञ्जाथाᳬ
रासभँऽयुवमस्मिन्न्यामेवृषण्वसू ॥ अग्निमभरन्तमस्मयुम्
॥ १३ ॥ योगेयोगेतवस्तरम् ॥ योगेयोगेतवस्तरंवाजेवाजे
हवामहे ॥ सखायऽइन्द्रमूतये ॥ १४ ॥ प्रतूर्वन्नेहि ॥ प्रतूर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नेह्यंवक्रामन्नशंस्तीरुद्रस्यगाणंपत्त्यम्मयोभूरेहि ॥ उर्व्वन्तरिक्षं
व्वीहिस्वस्तिगंव्यूतिरभंयानिकृण्वन्पूष्णासयुजांसह ॥१५॥
पृथिव्याःसधस्त्थात् ॥ पृथिव्याःसधस्त्थादग्निम्पुरीष्यमङ्गि
रस्वदाभरग्निम्पुरीष्यमङ्गिरस्वदच्छैमोग्निम्पुरीष्यमङ्गिर
स्वद्धरिष्यामः ॥ १६ ॥ अन्वग्निः ॥ अन्वग्निरुषसामग्रं
मक्ख्यदन्वहानिप्प्रथमोजातवेदाः ॥ अनुसूर्य्यस्यपुरुत्राचं
रश्मीननुद्यावापृथिव्वीऽआततन्थ ॥ १७॥ आगत्त्यंव्वाजी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगत्यंवाज्यध्वानꣳसर्वाम्मृधोविधूनुते ॥ अग्निꣳसधस्थे
महतिचक्षुषानिचिकीषते ॥ १८ ॥ आक्रम्म्यंवाजिन् ॥ आक्र
म्म्यंवाजिन्पृथिवीमग्निमिच्छरुचात्त्वम् ॥ भूम्म्यांवृत्त्वायं
नोब्रूहियतꣳखनेमतंवयम् ॥ १९ ॥ द्यौस्त्वे । पृष्ठम्पृथिवी
सधस्थंमात्क्मान्तरिक्षꣳसमुद्रोयोनिः ॥ विक्ख्यायचक्षु
षात्त्वमभितिष्ठपृतन्यतः ॥ २० ॥ उत्क्रांम । महतेसौभगाया
स्म्मादास्त्थानाद्द्रविणोदावांजिन् ॥ वयꣳस्यांमसुमतौपृथि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्याऽअग्निङ्खनन्तऽउपस्त्थैऽअस्याः॥२१॥ उदक्रमीत्॥ उदक्र
मीद्विष्णोदाद्वाज्यर्व्वाकुः सुलोकꣳ सुकृतम्पृथिव्याम्॥ ततः
खनेमसुप्प्रतीकमग्निꣳ स्वोरुहाणाऽअधिनाकमुत्तमम्॥२२॥
आत्त्वा। जिघर्म्मिमनसाघृतेनप्प्रतिक्षियन्तम्भुवनानिविश्वा॥
पृथुन्तिरश्चाव्वयसाबृहन्तंव्यचिष्ठमन्नैरभसन्दृशानम्॥ २३॥
आविश्वतः। प्प्रत्त्यञ्चंञ्जिघर्म्म्यरक्षसामनसातज्जुषेत॥ मर्य्य
श्श्रीस्पृहयद्वर्ण्णोऽअग्निर्न्नाभिमृशेतन्वाजर्भ्भुराणः॥ २४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिवाजंपतिꣳ ॥ परिवाजंपतिꣳकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ २५ ॥ परित्त्वा । ग्नेपुरंवयंविप्रꣳसह स्यधीमहि ॥ धृषद्वर्णन्दिवेदिवेहन्तारम्भङ्गुरावताम् ॥ २६ ॥ त्वमग्ने ॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वम श्मनस्परि ॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपतेजा

---

१ परिवाजपतिः कविः । अत्र कविष्करत्कृधिषु (शु. य. प्रा. ३ अ. ३२ सू.) इत्यनेन कविपरे पतिशब्दस्य विसर्गस्य षकारे प्राप्ते वाजपतिर्वासऽएदिधिषुरन्तःपर्शव्येनान्तःपार्श्वयमिति च (शु. य. प्रा. ३ अ. ३८ सू.) इत्यनेन सकारषकारयोर्निषेधाद्विसर्जनीय एव । २ भङ्गुरावताम् । अत्र अश्वरश्मिममतिसुमति (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे भङ्गुरशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । ३ नृणाम् । अत्र ऋपरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे ऋकात्परस्य नकारस्य णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यसेशुचिः ॥ २७ ॥ [१६-२] देवस्यत्त्वा । सवितुः प्रसु
वेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम् ॥ पृथिव्याःसधस्थां
दुग्निम्पुरीष्यमङ्गिरस्वत्खनामि ॥ ज्योतिष्मन्तन्त्वाग्ने
सुप्रतीकमजस्रेणभानुनादीद्यंतम् ॥ शिवम्प्रजाभ्योहिंकं
सन्तम्पृथिव्याःसधस्थांदुग्निम्पुरीष्यमङ्गिरस्वत्खनामः
॥ २८ ॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमसियोनिरग्नेःसमुद्रम्
भितःपिन्वमानम् ॥ वर्द्धमानोमहाँ२॥ ऽआचपुष्कारेदिवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्रयाव्वरिम्मणाप्प्रथस्व ॥ २९ ॥ शर्म्मंच ॥ शर्म्मंचस्त्थो
व्वर्म्मंचस्त्थोच्छिद्रे बहुलेऽउभे ॥ व्यचंस्वतीसंव्वंसाथाम्भृतम्
ग्निम्पुरीष्यम् ॥ ३० ॥ संव्वंसाथाम् ॥ संव्वंसाथाꣳस्व्विदा
समीचीऽउरसात्क्मनां ॥ अग्निमन्तर्भरिष्यन्तीज्योति
ष्मन्तमजस्त्रमित् ॥ ३१ ॥ पुरीष्योसि । व्विश्वभराऽअथ
र्व्वात्त्वाप्प्रथमोनिरमन्थदग्ने ॥ त्वामग्नेपुष्कराद्ध्यथर्व्वानिर
मन्थत ॥ मूर्ध्नोव्विश्वस्यव्वाघतः ॥ ३२ ॥ तमुत्त्वा । दुध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इ॒ऋषिं॑ ÷ पु॒त्रऽइ॑ध्ये॒ऽअथ॑र्व्वणः ॥ वृ॒त्र॒हणं॑ पुरन्दु॒रम् ॥ ३३ ॥
तमु॑त्त्वा । पा॒त्थ्यो॒वृ॒षा॒समी॑धे॒दस्यु॒हन्तं॑मम् ॥ धु॒नु॒ञ्जु॒यꣳ॒रणे॑
रणे ॥ ३४ ॥ सीद॑होतः ॥ सीद॑होतु॒ꣳस्वऽउ॑लो॒के॒चि॑कि॒त्त्वा
न्त्सा॑दया॑य॒ज्ञꣳसु॑कृ॒तस्य॒योनौ॑ ॥ दे॒वावी॑र्दे॒वान्ह॒विषा॑यजा॒स्य
ग्ने॑बृ॒हद्य॑जमाने॒वयो॑धाः ॥ ३५ ॥ निहोता॑ । होतृ॒षद॑ने॒वि
दा॑नस्त्त्वे॒षोदी॑दि॒वाँ२॥ऽअ॑सदत्सु॒दक्षः॑ ÷ ॥ अद॑ब्धव्रतप्रम
ति॒र्व्वसि॑ष्ठः॒सह॒स्रम्भ॒रः॒शुचि॑जिह्वोऽअ॒ग्निः॒ ॥ ३६ ॥ सꣳसी

१ सादय यज्ञम्। इति पदम्। अत्र श्रथोदारिथशोचपनय सादयर्जु० (य. शु. प्रा. ३ अ. ११३ सू.) इत्यनेन यकारे परे दीर्घविधानात्। सादयायज्ञम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दस्व । मुहाँ २॥ऽअसिशोचस्वदेववीतमः॥ विधूममग्नेऽअरुष
म्मियेद्यसृजप्प्रशस्तदर्शतम्॥ ३७॥ [१०-३] अपोदेवीः॥
अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्प्रजाभ्यः॥ तासामा
स्त्थानादुज्जिहतामोषधयःसुपिप्पुलाः॥ ३८॥ सन्ते । वायु
म्मातरिश्वादधातूत्तानायाहृदयँ्यद्धिकस्त्तम्॥ योदेवानाञ्चर
सिप्प्राणथेनुकस्म्मैदेवव्वषडस्त्तुतुभ्यम्॥ ३९॥ सुजातोज्ज्यो
तिषा । सहशर्म्मव्वरूथमासदत्स्वः॥ वासोऽअग्नेविश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपꣳसंव्ययस्वविभावसो ॥४०॥ उदुतिष्ठ । स्वद्धरांवांनोदेव्या
धिया ॥ दृशेचंभासाबृहतासुशुक्रनिराग्नेयाहिसुशस्तिभिः ÷
॥ ४१ ॥ ऊर्द्धऽऊषुणः ÷ ॥ ऊर्द्धऽऊषुणऽऊतयेतिष्ठादेवो
नसविता ॥ ऊर्द्धोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे
॥ ४२ ॥ सजातः ॥ सजातोगर्भोऽअसिरोदस्योरग्नेचारुर्वि
भृतऽओषधीषु ॥ चित्रःशिशुःपरितमांस्यक्तून्प्रमातृभ्योऽ

१ अवानोधिया । अत्र अवोपसर्गस्य ह्रस्वाकारस्य नोपरे धारययोजाव० (य. शु. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः । २ ऊर्द्धऽऊषुणः ऊर्द्ध ऊ सुनः इत्यत्र ऊश्चापृक्तात् (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन अपृक्तसंज्ञादूकारात्परः सकारः षत्वमापद्यते तेन सस्य षकारः । ३ तिष्ठादेवः । अत्र तिष्ठाद्युदात्तम् (शु. य प्रा. ३ अ. १०४ सू.) इत्यनेन यदि तिष्ठेत्येतत्पदं आद्युदात्तं भवेत्तदा दीर्घत्वं प्राप्नोति । अत्र तिष्ठेत्येतत्स्याद्यदात्तत्वादीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकनिक्कदद्गाꣳ ॥ ४३ ॥ स्थिरोभव । वीड्वङ्गऽआशुर्भव वाज्यर्वन् ॥ पृथुर्भवसुषदस्त्वमग्नेः पुरीषवाहणꣳ ॥ ४४ ॥ शिवोभव । प्रजाभ्योमानुषीभ्यस्त्वमङ्गिरꣳ ॥ माद्यावापृथिवीऽअभिशोचीर्मान्तरिक्षम्माद्वनस्पतीन् ॥ ४५ ॥ प्रैतु । वाजीकनिक्कदुन्नानदुद्वासंभꣳपत्त्वा ॥ भरन्नग्निम्पुरीष्यम्मा पाद्यायुषꣳपुरा ॥ वृषाग्निंवृषणम्भरन्नपाङ्गर्भꣳसमुद्रियम् ॥

---

१ पुरीषवाहणः । अत्र ऋषरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यप्राप्तौ स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन ऋषरेभ्यो स्वरयवहकवर्गपवर्गव्यवधानेष्वपि णत्वविधानादत्र वाहनशब्दस्य नस्य णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नऽआयाहिवीतये ॥ ४६ ॥ ऋतꣳसत्त्यम् ॥ ऋतꣳस
त्त्यमृतꣳसत्त्यमग्निम्पुरीष्यमङ्गिरस्वद्भरामः ॥ ओषधयः
प्रतिमोदध्वमग्निमेतꣳशिवमायन्तमब्भ्यत्रयुष्मा ॥ द्यस्य
न्विश्वाऽअनिराऽअमीवानिषीदन्नोऽअपदुर्म्मतिञ्जहि ॥४७॥
ओषधयःप्रति । गृब्भ्णीतपुष्प्पवतीःसुपिप्पला ॥ अयंब्रो
गब्भंऽऋत्त्वियः प्रत्क्रꣳसधस्त्थमासदत् ॥४८॥ विपाजसा ।
पृथुनाशोशुचानोबाधस्वद्विषोरक्षसोऽअमीवाः ॥ सुशर्म्मणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहतः शर्म्मणिस्यामग्नेरहꣳसुहवस्यप्प्रणीतौ ॥४९॥ [१२-४]
आपोहि । ष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ५० ॥ योवः । शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ ५१ ॥ तस्माऽअरम् ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ५२ ॥ मित्रः सꣳसृज्यं । पृथिवीम्भूमिञ्चज्योतिषासह ॥ सुजातञ्जात

१ हिष्ठामयः । अत्र हि स्थामयो भुवः । अत्र हेर्मिथोदयः (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन हिशब्दात्परः मकारोदयो थकारोदयो वा सकारस्य षकारो विधीयते । तथा सति ततः ष्टुत्वे थकारस्य ठकारे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ठकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदसमयक्ष्मायंत्त्वासद्धसृंजामिप्रजाभ्यं ॥ ५३ ॥ रुद्राःसद्ध
सृज्यं । पृथिवीम्बृहज्ज्योतिंसमीधिरे । तेषांम्भानुरजंस्रऽइ
च्छुक्रोदेवेषुरोचते ॥५४॥ सद्धसृष्टांवसुंभिः ॥ सद्धसृष्टांवसुंभी
रुद्रैर्द्धीरैंकर्म्मण्याम्मृदम् ॥ हस्ताभ्याम्मृद्वीकृत्वासिंनी
वालीकृणोतुताम् ॥ ५५ ॥ सिनीवालीसुंकपर्द्दा । सुंकुरीरा
स्वौपशा ॥ सातुभ्यंमदितेमह्योखान्दंधातुहस्तयोः ॥ ५६ ॥
उखाङ्कृणोतु ॥ उखाङ्कृणोतुशक्त्याबाहुभ्यामदितिर्द्धिया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातापुत्रँऽयथोपस्थेसाग्निम्बिभर्त्तुगर्भ्भऽआ ॥ मुखस्यशि
रोसि॥५७॥ वसंवस्त्वा। कृण्वन्तुगायत्रेणुच्छन्दसाङ्गिरस्वद्ध्रु
वासिपृथिव्यसिधारयामयिप्रजाꣳरायस्पोषङ्गौपत्त्यꣳसुवी
र्य्यꣳसजातान्यजमानायरुद्रास्त्वाकृण्वन्तुत्रैष्टुभेनुच्छन्दसा
ङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्रजाꣳरायस्पोषङ्गौ
पत्त्यꣳसुवीर्य्यꣳसजातान्यजमानायादित्यास्त्वाकृण्वन्तु
जागतेनुच्छन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसिधारयामयिप्रजाꣳ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रायस्पोषङ्गौपत्त्यꣳसुवीर्य्यꣳसजातान्यजमानायविश्वैत्त्वा
देवाविश्वैश्वानराःकृण्वन्त्वानुष्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवासिदि
शोसिधारयामयिप्रजाꣳरायस्पोषङ्गौपत्त्यꣳसुवीर्य्यꣳस
जातान्यजमानाय ॥ ५८ ॥ अदित्यैरास्नां ॥ अदित्यैरा
स्नासयदितिष्टेबिलङ्गृभ्णातु ॥ कृत्वायसामुहीमुखाम्मृन्मयीं
ग्योनिमुग्नयें॥ पुत्रेभ्यःप्रायच्छददितिःश्रपयानिति ॥५९॥
वसवस्त्वा । धूपयन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रुद्रास्त्वा धूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्तुत्रैष्टुभेनुच्छन्दसाङ्गिरस्वदादित्यास्त्वाधूपयन्तुजागतेनु
च्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराधूपयन्त्वानुष्टुभेनुच्छ
न्दसाङ्गिरस्वदिन्द्रस्त्वाधूपयतुवरुणस्त्वाधूपयतुविष्णुस्त्वा
धूपयतु ॥ ६० ॥ [११-५] अदितिष्ट्वा। देवीविश्वदेव्यावतीपृ
थिव्याःसुधस्थेऽअङ्गिरस्वत्खनत्त्ववटदेवानान्त्वापत्नीर्देवी
र्विश्वदेव्यावतीःपृथिव्याःसुधस्थेऽअङ्गिरस्वद्धंधतूखेधिषणा

१ अदितिष्ट्वादेवी। इति पदम् अत्र संधिरंशुरदितिः (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन सन्धिः अंशुः अदितिः एतेषां विसर्जनीयसकारस्य षत्वं समानपदे विधीयते। तेनात्र अदितेर्विसर्जनीयस्य षत्वे ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति टकारस्य द्वित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वदुभी
न्धतामुखेवरूत्रीष्ट्वादेवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽ
अङ्गिरस्वच्छ्पयन्तूखेग्नास्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याः
सधस्थेऽअङ्गिरस्वत्पचन्तूखेजनयस्त्वाच्छिन्नपत्रादेवीर्वि
श्वदेव्यावतीः पृथिव्याः सधस्थेऽअङ्गिरस्वत्पचन्तूखे ॥ ६१ ॥
मित्रस्यचर्षणीधृतः ॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि ॥

१ वरूत्रीः त्वा इति पदम् । अत्र मातृभिरर्चिभिःपायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन एकाक्षरे त्वापरे वरूत्रीः इत्यस्य विसर्जनीयस्य षत्वं षात्तथौमूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इति मूर्धन्यत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति द्वित्वे वरूत्रीङ्गा ।

सं. १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्युम्नाश्चित्रश्रवस्तमम् ॥ ६२ ॥ देवस्त्वा । सवितोद्वपतुसुपा
णिःस्वङ्गुरिःसुबाहुरुतशक्त्या ॥ अच्यंथमानापृथिव्यामाशा
दिशऽआपृण ॥ ६३ ॥ उत्त्थायबृहती । भुवोदुतिष्ठद्भुवात्त्वम् ॥
मित्रैतान्तंऽउखाम्परिंददाम्यभित्त्याऽएषामाभेदि ॥ ६४ ॥
वसंवस्त्वा ॥ वसंवस्त्वाच्छृन्दन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्भु
द्रास्त्वाच्छृन्दन्तुत्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्यास्त्वाच्छृ
न्दन्तुजागतेनच्छन्दसाङ्गिरस्वद्विश्वेत्त्वादेवावैश्वानराऽआच्छृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्दुन्त्वानुंष्टुभेनुच्छन्दंसाङ्गिरस्वत् ॥ ६५ ॥ [५-६] आकूंति
मुग्निम् ॥ आकूंतिमुग्निम्प्रयुजुंस्वाहामनोंमेधामुग्निम्प्रयु
जुंस्वाहांचित्तंविज्ञांतमुग्निम्प्रयुजुंस्वाहांवाचोविधृंतिमु
ग्निम्प्रयुजुंस्वाहांप्रजापंतयेमनंवेस्वाहाग्नयेंवैश्वानुरायस्वा
हां ॥ ६६ ॥ विश्वौंदेवस्यं । नेतुर्म्मर्त्तौंवुरीतसुक्रुयम् ॥ वि
श्वौंरायऽइंषुद्युतिद्युम्नंवृंणीतपुष्यसेस्वाहां ॥ ६७ ॥ मासु ।
भिंत्त्यामासुरिषोम्बंधृष्णुवीरयंस्वसु ॥ अग्निश्चेदङ्गंरिष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थꣳ ॥ ६८ ॥ दृꣳहस्वदेवि । पृथिविस्वस्त्तयंऽआसुरीमाया स्वधयाकृतासि ॥ जुष्टन्देवेभ्यंऽइदमस्त्तुहव्यमरिष्टात्त्वमुदि हियज्ञेऽअस्मिन् ॥ ६९ ॥ द्रवन्नꣳसर्प्पिरासुतिꣳ । प्प्रत्क्रोहो तावरेण्यꣳ ॥ सहसस्पुत्रोऽअद्भुतꣳ ॥ ७० ॥ शतम् ॥ ५०० ॥ परस्याऽअधि । संवतोवराँ२॥ऽअभ्यातर ॥ यत्राहमस्मि ताँ२॥ऽअव ॥ ७१ ॥ परमस्याः परावतः ॥ परमस्याः परावतोरोहिदश्वऽइहागहि ॥ पुरीष्यः पुरुप्रियोग्नेत्त्वन्त

१ सहसः पुत्रः इत्यत्र रायः सहसः पोषपुत्रयोः (शु.य.प्रा. ३ अ. २५ सू.) इत्यनेन रायसहसशब्दयोः सकारस्य पोषपुत्रपरयोः परयोः क्रमेण सत्वम्। सहसस्पुत्रः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामृधं॰ ॥ ७२ ॥ यदग्ने ॥ यदग्नेकानिकानिचिदातेदारू
णिदुद्धसि ॥ सर्वन्तदस्तुतेघृतन्तज्जुषस्वयविष्ठ्य ॥ ७३ ॥
यदत्ति ॥ यदत्त्युपजिह्विकायद्धुम्त्रोऽअतिसर्प्पति ॥ सर्वन्त
दस्तुतेघृतन्तज्जुषस्वयविष्ठ्य ॥ ७४ ॥ अहरहरप्प्रयावम् ॥
अहरहरप्प्रयावम्भरन्तोश्वायेवतिष्ठतेघासमस्मै ॥ रायस्पोषे
णसमिषामदन्तोग्नेमातेप्रतिवेशारिषाम ॥ ७५ ॥ नाभापृ
थिव्याः । समिधानेऽअग्नौरायस्पोषायबृहतेहवामहे ॥ इर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्मुदम्बृहदुक्थँ्यजंत्रञ्जेतारमग्निम्पृतनासुसासहिम् ॥७६॥
याश्सेनाः ॥ याश्सेनाऽअभीत्वरीराध्याधिनीरुगणाऽउत ॥
येस्तेनायेचतस्करास्ताँस्तेऽअग्नेपिदधाम्यास्ये ॥ ७७ ॥
द०ष्ट्राभ्याम्मुलिम्लून् ॥ द०ष्ट्राभ्याम्मुलिम्लुञ्जम्भ्यै
स्तस्करा२॥ऽउत ॥ हनुभ्या०स्तेनान्भंगवस्ताँस्त्वङ्गादु
सुखादितान् ॥ ७८ ॥ येजनेषु । मुलिम्लवस्तेनासुस्तस्क

१ तस्काराँऽउत । तत् करांऽउत इति पदे । अत्र तद्बृहतौ करपत्योस्तलोपश्च (शु. य. प्रा. ३ अ. ५२ सू.) इत्यनेन तच्छब्दस्य करशब्दपरे सकारे पूर्वस्य तद्वदिततकारस्य लोपे च कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रावनें ॥ येकक्षेंष्ष्वघायवस्त्ताँस्त्तेंदधामिजम्भंयोः ॥ ७९ ॥
योऽअस्म्मब्भ्यंम् ॥ योऽअस्म्मब्भ्यंमरातीयाद्यश्चंनोद्वेषंतेजनंः ॥ निन्दाद्योऽअस्म्मान्धिप्सांच्चसर्व्वन्तम्मंस्म्मसाकुरु ॥ ८० ॥ सꣳशितम्मे ॥ सꣳशितम्मेब्रह्मसꣳशितंवीर्य्यम्बलंम् ॥ सꣳशितक्षत्रञ्जिष्णुयस्याहमस्म्मिपुरोहितः ॥ ८१ ॥ उदेषाम् ॥ उदेषाम्बाहूऽअतिरमुद्वर्च्चोऽअथोबलंम् ॥ क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वाँ२॥ऽअहम् ॥ ८२ ॥ अन्नंपतेन्नस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोदेह्यनमीवस्यशुष्मिमर्णः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जन्नोधे
हिद्विपदेचतुष्पदे ॥ ८३ ॥ [१८-७] ॥ इतिश्रीवाजसनेय
संहितायाम् एकादशोऽध्यायः ॥ ११ ॥ श्रीवेदपुरुषाय नमः ॥
अनुवाकसूत्रम् ॥ दृशानःसप्तदश, दिवस्परिद्वादश, समिधा
ग्निंपंचदशा, पेतसप्तदशा, सुन्वन्तमयजमानंत्रयोदश, याऽ
ओषधीः सप्तविꣳशति, र्मामाषोडश, सप्तसप्तदशꣳशतम् ॥
[अ. १२ मं. ११७ अनु. ७] हरिः ॐ ॥ दृशानोरुक्म ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृशानोरुक्मऽउर्व्याव्यंद्यौद्दुर्म्मर्षमायुः श्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः ॥ १ ॥ नक्तोषासासमनसा ॥ नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची ॥ द्यावाक्षामारुक्मोऽअन्तर्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ २ ॥ विश्वारूपाणि ॥ विश्वारूपाणि प्रतिमुञ्चतेकविः प्रासावीद्भद्रंद्विपदेचतुष्पदे ॥ विनाकम

---

१ दृशानः । अत्र ऋषरेभ्यः (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन एतैरेव व्यवधानेऽपि । णत्वविधान्नात्र णत्वप्राप्तिः । तथापि शिलिसिवर्गमध्यमव्यवहितोऽपि (शु. य. प्रा. ३ अ. ९५ सू.) इत्यनेन णत्वनिषेधः शिष्यबुद्धिव्युत्पादनार्थो ज्ञेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ख्यत्त्सवितावरेण्योनुंप्प्रयाणंमुषसोविरांजति ॥ ३ ॥ सुपुर्णो
सि । गुरुत्मांस्त्रिवृत्तेशिरोंगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥ स्तोमंऽ
आत्माच्छन्दा ँस्यङ्गानियजूं ँषिनामं ॥ सामंतेतनूर्वामदे
व्यँऽयज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः ॥ सुपुर्णोसिगुरु
त्मान्दिवंङ्गच्छस्वः पत ॥ ४ ॥ विष्णोः क्रमः ॥ विष्णोः
क्रमोसिसपत्क्रहागायत्रञ्छन्दुऽआरोहपृथिवीमनुविक्रमस्व
विष्णोः क्रमोस्यभिमातिहात्रैष्टुंभञ्छन्दुऽआरोहान्तरिक्षम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुविक्रमस्वविष्णोः क्रमोस्यरातीयतोहन्ताजागतञ्छन्दऽआ
रोहदिवमनुविक्रमस्वविष्णोः क्रमोसिशत्रूयतोहन्तानुष्टुभ
ञ्छन्दऽआरोहदिशोनुविक्रमस्व ॥ ५ ॥ अक्रन्ददग्निः ॥ अक्र
न्ददग्निस्तनयन्निवद्यौः क्षामारेरिहद्वीरुधः समञ्जन् ॥ सद्यो
जज्ञानोविहीमिद्धोऽअख्यदारोदसीभानुनाभात्यन्तः ॥ ६ ॥
अग्नेर्भ्यावर्त्तिन् ॥ अग्नेर्भ्यावर्त्तिन्नभिमानिवर्त्तस्वायुषावर्च्चे
साप्रजयाधनेन ॥ सन्यामेधयारय्यापोषेण ॥ ७ ॥ अग्नेऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्गिरः । शतन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः ॥ अधा
पोषस्यपोषेणपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधि ॥ ८ ॥ पुनर्
ऊर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्नःपाह्यꣳहसः ॥९॥
सहरय्या । निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्याविश्वत
स्परि ॥ १० ॥ आत्त्वा । हार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ॥
विशस्त्वासर्वावाञ्छन्तुमात्त्वद्राष्ट्रमधिभ्रशत् ॥ ११ ॥
उदुत्तमम् ॥ उदुत्तमम्वरुणपाशमस्मदवाधमंविमध्यमꣳ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेथाय ॥ अथाव्वयमादित्त्यव्वतेतवानागसोऽअदितयेस्याम ॥ १२ ॥ अग्ग्रेबृहन् ॥ अग्ग्रेबृहन्नुषसामूर्द्धोऽअस्त्थान्निर्ज्जगन्वान्तमसोज्ज्योतिषागात् ॥ अग्निर्भ्भानुनारुशतास्वङ्गऽआजातोव्विश्श्वासद्म्मान्न्यप्प्राः ॥ १३ ॥ हुद्दसःशुचिषत् ॥ हुद्दसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्द्दुरोणसत् ॥ नृषद्व्वरसदृतसद्व्वयोम्मसदब्जागोजाऽऋतजाऽअद्द्रिजाऽऋतम्बृहत्

१ श्रथय इति पदम्। श्रथोदारिथशोचपनयसादयर्जुवृषशत्रुसलक्ष्माघारात्यृतभवत यकारे (सु. य. प्रा. ३ अ. ११३ सू.) इत्यनेन एतेषां यकारे परे दीर्घः। तेन श्रथाय इति पदम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ सीदुत्त्वम् ॥ सीदुत्त्वम्मातुरस्याऽउपस्त्थेविश्वान्य
ग्नेव्वयुनानिविद्वान् ॥ मैनान्तपंसामार्च्चिषाभिशोचीरन्तरं
स्याᳬशुक्रज्ज्योतिर्व्विभाहि ॥ १५ ॥ अन्तरग्ने । रुचात्त्वमु
खायाᳬसदनेस्वे ॥ तस्यास्त्वᳬहरंसातपञ्जातवेदᳬशिवोभव
॥ १६ ॥ शिवोभूत्त्वा । मह्यमग्नेऽअथोसीदशिवस्त्त्वम् ॥
शिवाःकृत्त्वादिशᳬसर्व्वाᳬस्वँयोनिमिहासदᳬ॥१७॥[१७-१]
दिवस्पारि । प्रथमञ्जज्ञेऽअग्निरस्मद्द्वितीयम्परिजातवेदाᳬ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयमुप्सुनृमणाऽअजस्रमिन्धानऽएनञ्जरतेस्वाधीः॥१८॥
विद्म्मातें ॥ विद्म्मातेऽअग्नेत्रेधात्रयाणिविद्म्मातेधामविभृ
तापुरुत्रा ॥ विद्म्मातेनामपरमङ्गुह्यद्विद्म्मातमुत्त्सँ ऽयतऽ
आजगन्थ ॥ १९ ॥ समुद्रेत्त्वा । नृमणाऽअप्स्वन्तर्नृचक्षाऽ
ईधेदिवोऽअग्नऽऊधन् ॥ तृतीयेत्त्वारजसितस्थिवाꣳसमुपा
मुपस्त्थेमहिषाऽअवर्द्धन् ॥ २० ॥ अक्रन्ददग्निः ॥ अक्रन्द

१ नृमणा । अत्र ऋषरेभ्यो नकारो णकारं समानपदे (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वाप्राप्तौ स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ८६ सू.) एतैर्व्यवधानेऽपि ऋषरेभ्यो णत्वविधानात्पवर्गस्य व्यवधानेऽपि णत्वे नृमणा इति रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुग्निस्त्तुनयंन्निवुद्यौ॑क्षामुरोरिंहद्वीरुधं॑ः समुञ्जन् ॥ सुद्योज
ज्ञानोव्विहीमिद्धोऽअक्ख्युदारोदंसीभानुनांभात्त्युन्तः॑ ॥२१॥
श्रीणामुंदारः॑ ॥ श्रीणामुंदारोधरुणोंरयीणाम्मंनीषाणाम्प्रा
र्प्पणः॑सोमंगोपाः॑ ॥ व्वसुं॑ः सूनुः॑सहंसोऽअप्प्सुराजाव्विभात्त्य
ग्रंऽउषसांमिधानः॑ ॥ २२ ॥ व्विश्वंस्यकेतुः॑ ॥ व्विश्वंस्यकेतु
र्भुवंनस्यगर्भ्भंऽआरोदंसीऽअपृणाज्जायंमानः॑ ॥ व्वीडुञ्चिदद्रिं
मभिनत्त्परायञ्जनायदुग्निमयंजन्तुपञ्चं ॥ २३ ॥ उशिक्पां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकः ॥ उशिक्पावकोऽअरतिः सुमेधामर्त्तैष्वग्निरमृतोनि
धायि ॥ इयर्त्तिधूममरुषम्भरिंब्भ्रदुच्छुक्रेणशोचिषाद्यामिनं
क्षन् ॥ २४ ॥ दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्यद्यौद्दु
र्म्मर्षमायुः श्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभिर्यद
देनुन्द्यौरजनयत्सुरेताः ॥ २५ ॥ यस्त्वे ॥ यस्त्वेऽअद्यकृण
वद्भद्रशोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्नयप्प्रतरंवस्योऽअच्छा
भिसुम्नन्देवभक्तँयविष्ठ ॥ २६ ॥ आतम् आतम्भजसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रवसेष्वग्नऽउक्थऽउक्थ्यऽआभजशस्यमाने ॥ प्रियः सूर्ये प्रियोऽअग्नाभवात्त्युज्जातेनभिनदुज्जनित्त्वैः ॥ २७ ॥ त्वामग्ने ॥ त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्याणि ॥ त्वयासहद्रविणमिच्छमानाव्रजङ्गोमन्तमुशिजोविवव्रुः ॥ २८ ॥ अस्त्यग्निः ॥ अस्त्यग्निर्नराँसुशेवोवैश्वानरऽऋषिभिः सोमगोपाः ॥ अद्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्मेसुवीरम् ॥ २९ ॥ [१२-२] समिधाग्निम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम्॥ आस्मिन्हव्याजुहोतन ॥ ३० ॥ उदुत्त्वा ॥ उदुत्त्वाविश्वेदेवाऽअग्नेभरन्तुचित्तिभिः॥ सनोभवशिवस्त्वꣳसुप्रतीकोविभावसुः ॥३१॥ प्रेत् ॥ प्रेदग्नेज्योतिष्मान्याहिशिवेभिरर्चिभिष्ट्वम् ॥ बृहद्भिर्भानुभिर्भासन्माहिꣳसीस्तन्वाप्रजाः ॥ ३२ ॥ अक्रन्द

---

१ अर्चिभिस्त्वम् इति पदम्। अत्र मातृभिरर्चिभिः पायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन मातृभिः अर्चिभिः पायुभिः वरूत्रीः एतेषां पदानां एकाक्षरे प्रत्यये विसर्जनीयसकारस्य षः। तेन सस्य षत्वे, षात्तथौ मूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इत्यनेन त्वमित्यस्य तस्य मूर्धन्ये टकारे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति टस्य द्वित्वे अर्चिभिष्ट्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुग्निः ॥ अक्रन्ददुग्निस्तनयन्निवद्यौः क्षामारेरिहद्वीरुधः ÷ समञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्त्यन्तः ॥ ३३ ॥ प्रप्प्रायम् ॥ प्रप्प्रायमग्निर्भरतस्य शृण्वेविवियत्त्सूर्य्योनरोचतेबृहद्भाः ॥ अभियःपुरुम्पृतनासुतस्थौदीदायदैद्योऽअतिथिःशिवोनः ÷ ॥ ३४ ॥ आपोदेवीः ॥ आपोदेवीःप्रतिगृभ्णीतभस्मैतत्त्स्योनेकृणुद्धꣳसुरभाऽउ लोके ॥ तस्मैनमन्ताञ्जनयःसुपत्नीर्म्मातेवपुत्रम्बिभृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्प्स्वेनत् ॥ ३५ ॥ अुप्प्स्वग्ने ॥ अुप्प्स्वग्नेसधिष्टवसौषधी
रनुरुद्धयसे ॥ गर्भेसञ्जायसेपुनः ॥ ३६ ॥ गर्भोऽअसि ॥
गर्भोऽअस्योषधीनाङ्गर्भोवनस्पतीनाम् ॥ गर्भोविश्वस्य
भूतस्याग्नेगर्भोऽअपामसि ॥ ३७ ॥ प्रसद्यभस्म्मना ॥
प्रसद्यभस्म्मनायोनिमपश्चपृथिवीमग्ने ॥ सृजसृज्यमातृभिष्ट्व

---

१ सधिष्टव । अत्र सधिस्तव इति पदद्वयम् । अत्र विसर्गस्य परसवर्णे, सधिरंशुरदितिः (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन पत्वे ऊष्मान्तस्थाभ्यश्च स्पर्श इत्यनेन टस्य द्वित्वम् । २ सः ओषधीः इति पदद्वयम् । अत्र सऽओषधीमयोः (शु. य. प्रा. ३ अ. १५ सू.) इत्यनेन ओषधीपरे सः पदस्य विसर्जनीयस्य लोपे, सन्ध्यक्षर ऐकारौकारौ (शु. य. प्रा. ४ अ. ५७ सू.) इत्यनेन वृद्धौ सौषधी इति पदम् । ३ मातृभिस्त्वम् इति पदम् । मातृभिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिष्म्मान्पुनरासदꣳ ॥ ३८ ॥ पुनरासद्य ॥ पुनरासद्य सदनमपश्चंपृथिवीमग्ने ॥ शेषेमातुर्य्यथोपस्त्थेन्तरस्याꣳ शिवतमꣳ ॥ ३९ ॥ पुनरूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नꣳपाह्यद्दहंसꣳ ॥ ४० ॥ सहरय्या । निवर्त्तस्वाग्नेपिन्वं स्वधारया ॥ विश्वप्स्न्यांविश्वतस्परि ॥ ४१ ॥ बोधामे । ऽअस्यवचसोयविष्ठमꣳहिष्ठस्यप्रभृतस्यस्वधावꣳ ॥ पीयति

चिंभिः पायुभिर्वरूत्रीः (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन मातृभिः अर्चिभिः पायुभिः वरूत्रीः एतेषां पदानां विसर्जनीयस्य सकारस्य षकार एकाक्षरे प्रत्यये परे इति षत्वे च षात्तथौ मूर्धन्यम् (शु. य. प्रा. ३ अ. ८० सू.) इत्यनेन तस्य मूर्धन्ये टकारे ऊष्मान्त० इत्यनेन टस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्वोऽअनुंत्त्वोगृणातिवृन्दारुंष्टेतुन्वंवृन्देऽअग्ने ॥ ४२ ॥ स
बोधि । सूरिर्म्मघवाद्वसुपतेद्वसुदावन् ॥ युयोध्यस्म्मद्वेषांऽ
सिविश्वकर्म्मणेस्वाहा ॥ ४३ ॥ पुनंस्त्त्वा । दित्त्यारुद्राद्वसंवः
समिन्धताम्पुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनुत्त्वन्तुन्वंवर्द्धय
स्वसुत्त्याःसन्तुयजमानस्यकामाः ॥४४॥ [१५-३] अपेत ॥
अपेतवीतविचसर्प्पतातोयेत्रस्त्थपुराणायेचनूतनाः ॥ अदा

---

१ वृन्दारुष्टे अत्र वृन्दारुः ते इति पदद्वयम् । वृन्दारुर्माकिः (शु. य. प्रा. ३ अ. ७४ सू.) इत्यनेन वृन्दारोः विसर्गस्य परसवर्णे, षात्तथौ मूर्धन्यम् इत्यनेन च ते इत्यस्य मूर्धन्ये टेकारे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति टकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्युमोवसानम्पृथिव्याऽअक्रन्निमम्पितरोलोकमस्मै ॥ ४५ ॥
सँज्ञानमसि । कामधरणम्मयितेकामधरणम्भूयात् ॥ अग्ने
ब्भस्मास्यग्नेः पुरीषमसिचितस्त्थपरिचितंऽऊर्द्धचितं÷श्रय
द्धम् ॥ ४६ ॥ अयꣳसः ॥ अयꣳसोऽअग्निर्यस्मिन्त्सो
मुमिन्द्रं÷सुतन्दुधेजठरेवावशानः ॥ सहस्रियंवाजमत्त्य
न्नसप्तिꣳससवान्त्सन्त्स्तूयसेजातवेदः ॥ ४७ ॥ अग्नेयत् ॥
अग्नेयत्तेदिविवर्च्चं÷पृथिव्याँऽयदोषधीष्वप्स्वायंजत्र ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनान्तरिक्षमुर्व्वातुतन्थंत्त्वेषःसभानुरर्ण्णवोनृचक्षांः[1] ॥४८॥
अग्नेदिवः ॥ अग्नेदिवोऽअर्ण्णमच्छांजिगास्यच्छांदेवाँ२॥
ऽऊंचिषेधिष्ण्याये ॥ यारोचनेपरस्त्तात्त्सूर्य्यस्ययाश्चावस्त्तां
दुपतिष्ठन्तुऽआपः ॥ ४९ ॥ पुरीष्ष्यासोऽअग्नयः । प्रावु
णेभिः[2]सजोषसः ॥ जुषन्ताँय्युज्ञमद्रुहोनमीवाऽइषोमहीः
॥ ५० ॥ इडामग्ने । पुरुदꣳसꣳसनिङ्गोःशश्वत्तमꣳहवंमा

१ यत्र यकारवकाररहितदीर्घस्वरितस्वरात्परो विसर्गस्तत्र कनिष्ठिकाक्षेपः सर्वत्र कार्यः । २ प्रावणेभिः । अत्र प्रवणश्रृङ्गयासेषु (शु. य. प्रा. ३ अ. १०५ सू.) इत्यनेन वन श्रृङ्ग यास इत्येतेषु परेषु प्र इत्येतत्पदस्य ह्रस्वाकारस्य दीर्घाकारो विधीयते । अत्र प्रशब्दाद्वनशब्दः परः । तेन प्रशब्दाकारो दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायसाध ॥ स्यान्नः÷सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ ५१ ॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्नग्नऽआरोहाथानोवर्द्धयारयिम् ॥५२॥ चिदसि ॥ चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ ५३ ॥ लोकम्पृण । च्छिद्रम्पृणाथोसीदध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्पतिरस्मिन्न्योनावसीषदन् ॥ ५४ ॥ ताऽअस्य ॥ ताऽअस्यसूददोहसःसोमं०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीणान्तिपृश्न्नयः ॥ जन्मन्देवानांविशांत्रिषष्वारोचनेदिवः
॥ ५५ ॥ इन्द्रंविश्वा÷ ॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः÷ ॥ रथीतमꣳरथीनांवाजानांसत्पतिम्पतिम् ॥ ५६ ॥ समितम् ॥ समितद्दसङ्कल्पेथाꣳसम्प्रियौरोचिष्णूसुमनस्यमानौ ॥ इषमूर्जमभिसंवसानौ ॥ ५७ ॥ संवाम् ॥ संवा

---

१ रथितमम्। इति पदम्। रथि तकारनकारयोः (शु. य. प्रा. ३ अ. ११२ सू.) इत्यनेन तकारे नकारे च परे रथि इत्येतत्पदं दीर्घं भवति। तेन रथीतमम्। २ उपसर्गात्परो यस्तु स वकारो लघुर्मतः। वो वां वा वै मंत्रपाठे लघवो गुरवः पदे। इति वामित्यस्यात्र लघुत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्मनां७ंसिसंव्रतासमुंचित्तान्याकरम् ॥ अग्नेपुरीष्याधिपा
भवत्त्वन्नऽइषमूर्ज्जँ्यजमानायधेहि ॥ ५८ ॥ अग्नेत्त्वम् ॥
अग्नेत्त्वम्पुरीष्योरयिमान्पुष्टिमाँ२॥ऽअसि ॥ शिवाःकृत्त्वा
दिशःसर्व्वाःस्वँ्योनिमिहासदः ॥ ५९ ॥ भवतन्नः ॥ भव
तन्नःसमनसौसचेतसावरेपसौ ॥ मायुज्ञ६ंहिं६ंसिष्टम्मायुज्ञ
पतिज्ञातवेदसौशिवौभवतमद्यनः ॥६०॥ मातेवपुत्रम् ॥ माते

१ अत्र मकारोच्चारे दक्षिणहस्तेन मुष्ट्याकृतिः कार्या । यत्र यत्रावसानगतो मकारस्तत्र मुष्ट्याकृतिः "मुष्ट्याकृतिर्मकारे स्यात्" इति या. शिक्षायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंपुत्रम्पृथिवीपुरीष्यमग्निꣳस्वेयोनावभारुखा ॥ तांविश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्म्माविमुञ्चतु ॥ ६१ ॥

[१७-४] असुन्वन्तमयंजमानम् ॥ असुन्वन्तमयंजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातंऽइत्त्यानमोदेविनिर्ऋतेतुभ्यंमस्तु ॥ ६२ ॥ नमःसुते ॥ नमःसुतेनिर्ऋतेतिग्मतेजोयुस्मयंविचृतावुन्धमेतम् ॥ यमे

---

१ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः । आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः । यत्र पदादौ वकारस्तत्रोच्चारणं गुरुभूतम् । यत्र पदादेर्मध्ये यदा च पदस्यान्ते वकारस्तदा तु क्रमेण लघु लघूतरं मध्यमवृत्त्योच्चारणम् । अत्र वकारः पदस्य मध्ये वर्तते तेन न गुरुभूतत्वच्चारणश्चेति इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुत्त्वँऽय्युम्म्यासँविदानोत्तुमेनाकेऽअधिरोहयैनम् ॥ ६३ ॥ यस्यास्त्ते। घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्जनाय ॥ या न्त्वाजनोभूमिरितिप्प्रमन्दतेनिर्ऋतिन्त्वाहम्परिवेदद्विश्वतः ॥ ६४ ॥ यन्ते। देवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्त्यम् ॥ तन्तेविष्ष्याम्म्यायुषोनमद्याद्यथैतम्पितुमद्विप्प्रसूतः ॥ नमो भूत्त्यैयेदञ्चकार ॥ ६५ ॥ निवेशनःसङ्गमनः ॥ निवेशनः

१ विष्ष्यामि अत्र विस्यामि इति पदम्। अत्र वेर्युदयः (शु. य. प्रा. ३ अ. ६७ सू.) इत्यनेन वेः उपसर्गात्परस्य यकारोदयस्य सकारस्य षकारे कृते स्वरात्संयोगादिर्द्विरुच्यते (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन षकारस्य द्वित्वे रूपम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुङ्गमंनोवसूनांविश्वांरूपाभिचष्टेशचीभिः ॥ देवऽइवसविता
सत्त्यधर्म्मेन्द्रोनतस्त्थौसमरेपथीनाम् ॥ ६६ ॥ सीरांयुञ्जन्ति ।
कवयोयुगाविततन्वतेपृथक् ॥ धीरादेवेषुसुम्नया ॥ ६७ ॥
युनक्तसीरा ॥ युनक्तसीराविययुगातनुद्धकृतेयोनौवपतेहबी
जम् ॥ गिराचश्रुष्टिःसभराऽअसन्नोनेदीयऽइत्सृण्यः पक्वमे
यात् ॥ ६८ ॥ शुनꣳसु । फालाविकृषन्तुभूमिꣳशुनकीना
शाऽअभियन्तुवाहैः ॥ शुनासीराहविषातोशमानासुपिप्पला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽओषधीः कर्त्तनास्म्मे ॥ ६९ ॥ घृतेनसीता ॥ घृतेनसीतामधु
नासमज्यतांविश्वैर्देवैरनुमतामरुद्भिः ॥ ऊर्ज्जस्वतीपयसापि
न्वमानास्म्मान्त्सीतेपयसाऽभ्यावर्वृत्स्व ॥ ७० ॥ लाङ्गलु
म्पवीरवत् ॥ लाङ्गलुम्पवीरवत्सुशेवंऽसोमुपित्तसरु ॥ तदुद्वप
तिगामविम्प्रफुर्व्यञ्जपीवरीम्प्रस्त्थावद्रथुवाहणम् ॥ ७१ ॥
कामङ्कामदुघे । धुक्क्ष्वमित्रायुवरुणायच ॥ इन्द्रायाश्विभ्यां
म्पूष्णेप्प्रजाभ्युऽओषधीभ्यः ॥ ७२ ॥ विमुञ्चयद्धम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमुंच्यद्धमग्ध्यादेवयानाऽअगंन्मुतमंसस्पारमुस्य ॥ ज्यो
तिंरापाम ॥ ७३ ॥ सुजूरब्दः ॥ सुजूरब्दोऽअयंवोभिः सुजू
रुषाऽअरुणीभिः ॥ सुजोषंसावुश्विनादꣳसोंभिः सुजूः सूरऽ
एतंशेनसुजूर्वैश्वानुरऽइडंयाघृतेनुस्वाहां ॥ ७४ ॥ [१३-५]
याऽओषंधीः ॥ याऽओषंधीः पूर्वांजातादेवेब्भ्यांस्त्रियुगम्पुरा ॥
मनैनुबुभ्रूणांमुहꣳशुतन्धामांनिसुप्तचं ॥ ७५ ॥ शुतंवः ॥

१ तमसस्पारम् । अत्र तमसोऽपरस्मात् (शु. य. प्रा. ३ अ. २६ सू.) इत्यनेन विसर्जनीयः सकारमापद्यतेऽपरस्माच्छब्दे परे । इति तमस इत्यस्य विसर्गस्य सकारे कृते तमसस्पारम् । अन्यथा तमसः पारम् इति स्यात् । अपरस्मात्किम् । आदित्यवर्णन्तमसः परस्तात् (संहिता अ. ३१ मं. १८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतंवोऽअम्बुधामानिसहस्रंमुतवोरुहः ॥ अधाशतक्रत्वोयू
यमिमम्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीःप्रति । मोदध्वम्पु
ष्पवतीःप्रसूवरीः ॥ अश्वाऽइवसजित्वरीर्वीरुधः पारयि
ष्णवः ॥ ७७ ॥ ओषधीरिति । मातरस्तद्वोदेवीरुपब्रुवे ॥
सनेयमश्वङ्गांवासऽआत्कमानन्तवपूरुष ॥ ७८ ॥ अश्वत्थे
वः ॥ अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजऽइ

१ त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ । आदेशाश्च विकल्पार्था ईषत्स्पृष्टास्तु ते स्मृताः । अर्थादेते लघव उच्चारणीयाः (या. शि.) २ वसतिः कृतां इति पदम् । आविनिरिडइडायावसतिर्वीरिवः (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन ककारपकारयोः परयोरेतेषां सस्य षत्वम् । तेन वसतिष्कृता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिकलासथयत्त्सनवंथपूरुषम् ॥ ७९ ॥ यत्रौषधीः । सुम
ग्गमंतुराजानः समिताविव ॥ विप्रः सऽउच्यतेभिषग्रक्षोहा
मीवचातनः ॥ ८० ॥ अश्वावतीं[1] सोमावतीम् ॥ अश्वाव
तीं सोमावतीमूर्ज्जयन्तीमुदोजसम् ॥ आविंत्त्सिसर्व्वाऽओष
धीरस्माऽअरिष्टतातये ॥ ८१ ॥ उच्छुष्मांः ॥ उच्छुष्माऽ
ओषधीनाङ्गावोगोष्ठादिवेरते ॥ धनंः सनिष्यन्तीनामात्क्मा

---

१ अश्ववतीम् । इति पदम् । अत्र अश्वरश्मिसुमति० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अश्वशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । तेन अश्वावतीम् । एवं सोमावतीं रश्मीवतीम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुन्तवंपूरुष ॥ ८२ ॥ इष्कृतिर्न्नाम । वोमाताथोंयूयꣳस्थुनि
ष्कृतीꣳ ॥ सीराꣳपंतत्रिणींस्थनुयदामयंतिनिष्कृथ ॥ ८३ ॥
अतिविश्वांः । परिष्ठास्तेनऽइंवब्रजमंक्रमुꣳ ॥ ओषंधीꣳप्रा
चुंच्यवुर्य्यत्किञ्चतुन्वोरपंः ॥ ८४ ॥ यदिमाꣳ ॥ यदिमाव्वा
जयंन्नहमोषंधीर्हस्तंऽआदुधे ॥ आत्कमायक्ष्मंस्यनश्यतिपु
राजींवगृभोंयथा ॥ ८५ ॥ यस्यौषधीꣳ । प्रसर्प्पथाङ्गंमङ्गु
म्परुष्परुꣳ ॥ ततोयक्ष्मंविबांधद्धऽउग्रोमंध्यमुशीरिंव ॥८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साकँऽयक्ष्म ॥ साकँऽयक्ष्मुप्प्रपतुचाषेणकिकिदीविना ॥ सा
कंवातस्युद्वाज्यासाकन्नंश्श्यनिहाकया ॥ ८७ ॥ अन्यावं÷ ॥
अन्यावोंऽअन्यामवत्त्वन्यान्यस्याऽउपावत ॥ ताः सर्वाँ÷सं
विदानाऽइदम्मेप्प्रावंताव्वचं÷ ॥ ८८ ॥ याः फलिनीं ॥ याः
फलिनीर्य्याऽअफलाऽअपुष्पायाश्चंपुष्पिणीं ॥ बृहस्पतिं
प्रसूतास्त्तानोंमुञ्चन्त्वꣳहसं ॥ ८९ ॥ मुञ्चन्तुमा । शप

१ इदम्मेप्प्रावताव्वचः । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुष्यर्त्तांभ्यवताध्यर्चशक्तिपुरुशचि
वकारे (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वचः इत्यस्य वकारे परे अवत इत्यस्य ह्रस्वाकारस्य दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्थ्यादथोव्वरुण्यादुत ॥ अथोयमस्युपङ्गीशात्सर्वस्म्माद्देवकि
ल्बिषात् ॥ ९० ॥ अवपतन्तीरवदन् ॥ अवपतन्तीरवदन्दि
वऽओषधयस्पारि ॥ यज्जीवमश्न्नवामहैनसरिष्याति पूरुषं
॥ ९१ ॥ याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्बह्वीश्शत
विचक्षणाः ॥ तासामसित्त्वमुत्तमारङ्गामायुशꣳहृदे ॥ ९२ ॥
याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु ॥

१ पूरुषः । अत्र पुरुषोऽवसाने (शु. य. प्रा. ३ अ. १२० सू.) पुरुष इति दीर्घो निपात्यते अवसाने चेत् । अत्र पू इत्यस्य निपातनाद्दीर्घः । अनवसाने पुरुषऽएवेदम् । अत्र ह्रस्व एव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतिप्रसूताऽअस्यैसन्दत्तवीर्य्यम् ॥ ९३ ॥ याश्च ॥
याश्चेदमुपशृण्वन्तियाश्चदूरम्परागताः ॥ सर्वाः सङ्गत्यवी
रुधोस्यैसन्दत्तवीर्य्यम् ॥ ९४ ॥ मावः ॥ मावोरिषत्त्वनि
तायस्मैचाहङ्वनामिवः ॥ द्विपाच्चतुष्पादस्माकहसर्वम
स्त्वनातुरम् ॥ ९५ ॥ ओषधयःसम् ॥ ओषधयःसमवद
न्तसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तꣳराजन्पार
यामसि ॥ ९६ ॥ नाशयित्रीबलासस्य ॥ नाशयित्रीबलास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यार्शसऽउपुचितामसि ॥ अथोशुतस्युयक्ष्माणाम्पाकारोरसि
नाशनी ॥ ९७ ॥ त्वाङ्गन्धुर्वा? ॥ त्वाङ्गन्धुर्वाऽअखनँस्त्वा
मिन्द्रस्त्वाम्बृहुस्पतिः ॥ त्वामोषधेसोमोराजाविद्वान्य
क्ष्मादमुञ्चयत ॥ ९८ ॥ सहस्वमे ॥ सहस्वमेऽअरातीःसहस्व
पृतनायतः ॥ सहस्वुसर्व्वंपाप्मानुः सहमानास्योषधे ॥ ९९ ॥
दीर्घायुस्त्ते ॥ दीर्घायुस्तऽओषधेखनितायस्म्मैचत्त्वाखना
म्यहम् ॥ अथोत्त्वन्दीर्घायुर्भूत्त्वाशुतवल्शाविरोहतात्

१ अत्र लकारशकारयोर्योगे हरितारख्या स्वरभक्तिर्बोध्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १०० ॥ त्वमुत्तमा । स्योषधेतवंवृक्षाऽउपंस्त्तयः ॥ उपं
स्त्तिरस्त्तुसोस्म्माकुँऽयोऽअस्म्माँ२॥ऽअभिदासंति ॥ १०१ ॥
[२७-६] मामां ॥ मामांहिंसीज्जनितायःपृथिव्यायोवा
दिवंसत्त्यधर्म्माव्यानंट् ॥ यश्चापश्चन्द्राःप्रथमोजुजानुक
स्म्मैदेवायंहुविषांविधेम ॥ १०२ ॥ अभ्यावर्त्तस्व । पृथि
वियज्ञेनपयंसासह ॥ वपान्तेंऽअग्निरिंषितोऽअंरोहत् ॥ १०३ ॥
अग्नेयत् ॥ अग्नेयत्तेंशुक्रँऽयच्चन्द्रँऽयत्त्पूतँऽयच्चंयज्ञियंम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्देवेब्भ्योंभरामसि ॥ १०४ ॥ इषमूर्ज्जम् ॥ इषमूर्ज्जमुहमि
तऽआदमृतस्ययोनिम्महिषस्यधाराम् ॥ आमागोषुविशुत्त्वा
तनूषुजहामिसेदिमनिराममीवाम् ॥ १०५ ॥ अग्नेतवं ॥
अग्नेतवश्श्रवोवयोमहिब्भ्राजन्तेऽअर्च्चयोविभावसो ॥ बृहं
द्भानोशवसावाजमुक्थ्युन्दधासिदाशुषेकवे ॥ १०६ ॥
पावकवर्च्चाःशुक्रवर्च्चाः ॥ पावकवर्च्चाःशुक्रवर्च्चाऽअनूनवर्च्चाऽ
उदियर्षिभानुना ॥ पुत्रोमातराविचरन्नुपावसिपृणक्षिरोदसीऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभे ॥ १०७ ॥ ऊर्ज्जोनपात् ॥ ऊर्ज्जोनपाज्जातवेदꣳसुशु
स्तिभिर्म्मन्दस्वधीतिभिर्हितः ॥ त्वेऽइषꣳसन्दधुर्भूरिवर्प्प
सश्चित्रोतयोवामजाताः ॥ १०८ ॥ इरज्यन्नग्ने । प्रथय
स्वजन्तुभिरस्मेरायोऽअमर्त्त्य ॥ सदर्शतस्यवपुषोविराज
सिपृणक्षिसानुसिङ्कतुम् ॥ १०९ ॥ इष्कुर्त्तारमद्धुरस्य ॥
इष्कुर्त्तारमद्धुरस्यप्रचेतसङ्क्षयन्तꣳराधसोमहः ॥ रातिंवामस्य

१ निश्चयेन कर्तारम् निष्कर्तारमिति प्राप्ते निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचिन्नकारमात्रस्य लोपे इष्कर्तारम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुभगाम्महीमिषन्दधासिसानसिꣳरयिम् ॥ ११० ॥ ऋतावा[1]
नम्महिषं। विश्वदर्शतमग्निꣳसुम्नायदधिरेपुरोजनाꣳ॥ श्रुत्क
र्णꣳसुप्रथस्तमन्त्वागिरादैव्युम्मानुषायुगा ॥ १११ ॥ आ
प्यायस्व ॥ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् ॥ भवा[2]
वाजस्यसङ्गथे ॥ ११२ ॥ सन्ते ॥ सन्तेपयाꣳसिसमुयन्तु
वाजाꣳसंवृष्ण्यान्यभिमातिषाहः ॥ आप्यायमानोऽअमृ

१ ऋतावानम्। अत्र अश्वरश्मि० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे ऋतशब्दस्य ह्रस्वाकारस्य दीर्घाकारः। २ भवन्वाजस्य इति पदम्। अत्र वाजस्य परे भव इत्यस्य ह्रस्वाकारस्य स चावरूध्यवाजस्य पायुषु च (शु. य. प्रा. ३ अ. ११० सू.) इत्यनेन दीर्घे भवान्वाजस्य। तथैव भवापायुर्विशोऽअस्याऽअदब्धः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तांयसोमदिविश्श्रवांꣳस्युत्तमानिंधिष्व्व ॥ ११३ ॥ आप्प्यांय
स्व । मदिन्तमसोमुविश्वैंभिरꣳशुभिंः ॥ भवांनꣳसुप्प्रथंस्त्त
मुꣳसखांवृधे ॥ ११४ ॥ आतें । वृत्सोमनौंयमत्त्परमाच्चिं
त्त्सुधस्त्थांत् ॥ अग्नेत्त्वाङ्कांमयागिरा ॥ ११५ ॥ तुब्भ्यु
न्ताः ॥ तुब्भ्युन्ताऽअंङ्गिरस्त्तमुविश्वांः सुक्षितयुꣳपृथंक् ॥
अग्नेकामांययेमिरे ॥ ११६ ॥ अग्निःप्प्रियेषुं ॥ अग्निः

१ भवनः इति पदम् । भव इत्येतस्य ह्रस्वाकारस्य नः परे भव च (शु. य. प्रा. ३ अ. १०९ सू.) इत्यनेन दीर्घाकारे कृते भवानः इति पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियेषुधामसुकामोभूतस्यभव्यस्य ॥ सम्राडेकोविराजति ॥ ११७ ॥ [१६-७] इतिश्रीवाजसनेयसंहितायांद्वादशोऽध्यायः ॥ १२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ मयिगृह्णामिपंचदश, ध्रुवास्येकादश, मधुव्वाताऽएकादश, सम्यक्स्रवंतिनवे, मंमाषड, पांत्वैका, ऽयंपुरःपंच, सप्ताष्टापंचाशत् [अनु. ७ मं. । १३ ॥ हरिःॐ ॥ मयि गृह्णामि ॥ मयिगृह्णाम्यग्रेऽअग्निꣳरायस्पोषायसुप्रजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वायंसुवीर्य्यांय ॥ मामुंदेवतांꣳसचन्ताम् ॥ १ ॥ अपाम्पृ
ष्ठम् ॥ अपाम्पृष्ठमंसियोनिंरग्नेꣳसमुद्रमभितꣳपिन्वंमानम् ॥
वर्द्धमानोमहाँ२॥ऽआचपुष्कंरेदिवोमात्रंयावरिम्णाप्प्रंथस्व
॥ २ ॥ ब्रह्मंयज्ञानम् ॥ ब्रह्मंयज्ञानम्प्रंथमम्पुरस्त्ताद्विसी
मतꣳसुरुचोंवेनऽआंवः ॥ सबुध्न्याऽउपमाऽअंस्यविष्ठाꣳसत
श्चयोनिमसंतश्चविवः÷ ॥ ३ ॥ हिरण्यगुर्ब्भꣳसम् ॥ हिरण्य
गुर्ब्भꣳसमंवर्त्तताग्रेंभूतस्यंजातꣳपतिरेकंऽआसीत् ॥ सदांधार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायंहुविषांविधेम ॥ ४ ॥ द्रुप्प्स श्चंस्कन्द । पृथिवीमनुद्यामिमञ्चयोनिमनुयश्चपूर्वं÷ ॥ समा नँऽयोनिमनुसञ्चरंन्तन्द्रुप्पसञ्जुहोम्यनुसप्तहोत्राँः ॥ ५ ॥ नमोंस्त्तु । सर्प्पेब्भ्योयेकेचंपृथिवीमनुं ॥ येऽअन्तरिंक्षेयेदि वितेब्भ्यं÷सर्प्पेब्भ्योनमं÷ ॥ ६ ॥ याऽइषंवः ॥ याऽइषंवो यातुधानांनाँऽयेवाद्वनस्पतीँ१॥रनु ॥ येवांवटेषुशेरंतेतेब्भ्यं÷ सर्प्पेब्भ्योनमं÷ ॥ ७ ॥ येवां ॥ येवामीरोंचनेदिवोयेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्य्यस्यरश्मिम्षु ॥ येषांमुप्सुसदंस्कृतन्तेब्भ्यं÷सुर्प्पेब्भ्योन
मं÷ ॥ ८ ॥ कृणुष्ष्वपाजं÷ ॥ कृणुष्ष्वपाजुंप्रसितिन्नपृत्थ्वीं
य्याहिराजेवामंवाँ२॥ऽइभेंन ॥ तृष्ष्वीमनुप्प्रसितिन्द्रूणानो
स्त्तांसिविच्चंरक्षसुस्त्तपिंष्ठैं ॥ ९ ॥ तवंब्भ्रमासं÷ ॥ तवंब्भ्र
मासंऽआशुयापंतुन्त्यनुंस्पृशधृषताशोशुंचानं ॥ तपूंष्ष्य

---

१ सदस्कृतम् । अत्र सदोद्यौर्नमस्कृतम्पिता पथेषु (शु. य. प्रा. ३ अ. ३४ सू.) इत्यनेन यथासंख्यं सदः द्यौः नमः एतेषां विसर्जनीयसंबन्धिनः सस्य क्रमेण कृतं पिता पथः एतेषु पदेषु परेषु षकारः । एवं षकारे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वे प्राप्ते ऋवर्णे (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन ककारस्य द्वित्वनिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्नेजुह्वापतङ्गानसन्दितोविसृजविष्वगुल्काः ॥ १० ॥ प्रति
स्पशः ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअ
स्याऽअदब्धः ॥ योनोदूरेऽअघशꣳसोयोऽअन्त्यग्नेमाकिष्टे
व्यथिरादधर्षीत् ॥ ११ ॥ उदग्ने । तिष्ठप्रत्त्यातनुष्वन्यमि
त्राँ२॥ऽओषतात्तिग्महेते ॥ योनोऽअरातिꣳसमिधानच
क्रेनीचातन्धक्ष्यतसन्नशुष्कम् ॥ १२ ॥ ऊर्द्धोभव ॥ ऊर्द्धोभव
प्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने ॥ अवस्थिरा

१ माकिष्टे । अत्र वृन्दारुर्माकिः (शु. य. प्रा. ३ अ. ७४ सू.) इत्यनेन विसर्गस्य सस्य षत्वे द्वित्वे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंनुहियातुजूनांञ्चामिमजांमिम्प्रमृणीहिशत्रून् ॥ अग्नेष्ट्वा
तेजसासादयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा । दिवःकुकुत्पतिः
पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ इन्द्रस्यत्त्वौजं
सासादयामि ॥ १४ ॥ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजसश्चने
तायत्रांनियुद्भिःसचसेशिवाभिः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षा
ञ्जिह्वामग्नेचकृषेहव्यवाहम् ॥ १५ ॥ [१५-१] ध्रुवासि ।
धरुणास्तृताविश्वकर्म्मणा ॥ मात्त्वांसमुद्रऽउद्वधीन्मासुप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णोद्व्यथमानापृथिवीन्दृꣳह ॥ १६ ॥ प्रजापतिष्ट्वा । साद
यत्त्वपाम्पृष्ठेसमुद्रस्येमन् ॥ द्व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथि
व्यसि ॥ १७ ॥ भूरसि ॥ भूरसिभूमिरस्यदितिरसिविश्वधाया
विश्वस्यभुवनस्यधर्त्री ॥ पृथिवीँद्यंच्छपृथिवीन्दृꣳहपृथिवी
म्माहिꣳसीः ॥ १८ ॥ विश्वस्मैप्राणाय ॥ विश्वस्मैप्रा
णायापानायव्यानायोदानायप्रतिष्ठायैचरित्राय ॥ अग्निष्ट्वा

१ प्रजापतिष्ट्वा । सकारपरे च (शु. य. प्रा. ३ अ. ७८ सू.) इत्यनेन सकारः परो यस्मादेकाक्षरात्तस्यैकाक्षरे प्रत्यये विसर्जनीयसकारस्य षत्वम् । अत्र प्रजापतिशब्दे पाधातोः पतिशब्दस्य सस्य षकारे ष्टुत्वे द्वित्वे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिपातुमह्यास्वस्त्याच्छुर्दिषाशन्तमेनुतयादेवतयाङ्गिरस्वद्ध्रु
वासीद ॥ १९ ॥ काण्डात्काण्डात्प्ररोहन्ती ॥ काण्डा
त्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनुस
हस्रेणशतेनच ॥ २० ॥ याशतेन । प्रतनोषिसहस्रेणाविरो
हसि ॥ तस्यास्तेदेवीष्टकेविधेमहविषाविधेम ॥ २१ ॥ यास्ते ॥
यास्तेऽअग्नेसूर्य्येरुचोदिवमातन्वन्तिरश्मिभिः ॥ ताभि

१ परुषः परुषस्परि। अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते न परुषः परुषि (शु. य. प्रा. ३ अ. ३७ सू.) इत्यनेन परुषि परे पूर्वपरुषशब्दघटितविसर्जनीयस्य सकारो निषिध्यते। अतो न सकारः किन्तु विसर्ग एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्नोऽअद्यसर्वाभीरुचेजनायनस्कृधि ॥ २२ ॥ यावः ॥ या
वोदेवाः सूर्य्येरुचोगोष्वश्वेषुयारुचः ॥ इन्द्राग्नीताभिः स
र्वाभीरुचंन्नोधत्तबृहस्पते ॥ २३ ॥ विराड्ज्योतिः ॥ वि
राड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् ॥ प्रजापतिष्ट्वासा
दयतुपृष्ठेपृथिव्याज्योतिष्मतीम् ॥ विश्वस्मैप्राणायापाना
यव्यानायविश्वज्योतिर्य्यच्छ ॥ [1]अग्निष्टेधिपतिस्तयादेवतं

१ अग्निष्टे । अग्निस्ते इति पदम् । अत्र वायुरग्निरग्नेरेकाक्षरे (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे ते पदे परे अग्निशब्दवटितस्य सस्य षत्वे ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन टस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुंश्च ॥ मधुंश्चमाधवश्चवासं
न्तिकावृतूऽअग्नेरंन्तꣳश्लेषोसिकल्पेंतान्द्यावांपृथिवीकल्पं
न्तामापऽओषंधयꣳकल्पंन्तामग्नयꣳ पृथुङ्ममुज्यैष्ठ्यांयुस
ङ्वंताꣳ ॥ येऽअग्नयꣳसमंनसोन्तराद्यावांपृथिवीऽइमे ॥ वासं
न्तिकावृतूऽअंभिकल्पंमानाऽइन्द्रंमिवदेवाऽअंभिसंविंशन्तु
तयांदेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ २५ ॥ अषांढासि ॥ अषां

१ अभिसंविशन्तु । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) अनेन प्राप्तस्य षकारस्य अनुसन्तनोतुबृहस्पतिसुतस्यसुसमिन्द्राय-सुसन्दृशमभिसत्वाऽभिसंविशन्तु० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढासिसहंमानासहस्वारांतीःसहंस्वपृतनायतः ॥ सहस्रंवीर्य्या
सिसामांजिन्व ॥ २६ ॥ [११-२] मधुवाताः ॥ मधुवाताऽऋ
तायतेमधुंक्षरन्तिसिन्धवः ॥ माध्वीर्नःसन्त्वोषधीः ॥ २७ ॥
मधुनक्तम् ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ म
धुद्यौरस्तुनःपिता ॥ २८ ॥ मधुमान्नः ॥ मधुमान्नोवनस्पति
र्मधुमाँ२ऽअस्तुसूर्य्यः ॥ माध्वीर्गावोभवन्तुनः ॥ २९ ॥
अपाङ्गम्भंन् ॥ अपाङ्गम्भंन्त्सीदुमात्त्वासूर्य्योभितांप्सीन्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्निर्वैश्वानरः ॥ अच्छिन्नपत्राꣳप्रजाऽअनुवीक्षस्वानुत्त्वादि
व्यावृष्टिꣳसचताम् ॥ ३० ॥ त्रीन्त्समुद्रान् ॥ त्रीन्त्समुद्रा
न्त्समसृपत्त्स्वर्गानुपाम्पतिर्वृषभऽइष्टकानाम् ॥ पुरीषंवसानꣳ
सुकृतस्यलोकेतत्रंगच्छयत्रपूर्वेपरेताꣳ ॥ ३१ ॥ मुहीद्यौः ।
पृथिवीचनऽइमंयज्ञमिमिक्षताम् ॥ पिपृतान्नोभरीमभिꣳ
॥ ३२ ॥ विष्णोꣳकर्म्माणि । पश्यतयतोव्रतानिपस्पशे ॥
इन्द्रस्ययुज्ज्यꣳसखा ॥ ३३ ॥ ध्रुवासि । धरुणेतोजज्ञेप्रथम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेब्भ्योयोनिंब्भ्योऽअधिंजातवेदाः ॥ सगांयुत्र्यात्रिष्टुभांनुष्टु
भांचदेवेब्भ्योंहुव्यंवहतुप्प्रजानन् ॥ ३४ ॥ इषेराये । रंम
स्वसहंसेद्युम्न्नऽऊर्ज्जेऽअपंत्त्याय ॥ सुम्म्राडंसिस्वराडंसिसार
स्वतौत्त्वोत्त्सौप्प्रावंताम् ॥३५॥ अग्नेंयुक्क्ष्व ॥ अग्नेंयुक्क्ष्वाहि
येतवाश्वांसोदेवसाधवंः ॥ अरंव्वहंन्तिमुन्यवें ॥ ३६ ॥
युक्क्ष्वाहि । देवहूतमाँ२॥ऽअश्श्वाँ२॥ऽअग्नेरथीरिंव ॥ निहोतां
पूर्व्यःसदः ॥ ३७ ॥ [११-३] सुम्म्यक्स्त्रवन्ति । सुरितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नधेनांऽअन्तर्हृदामनंसापूयमांनाः ॥ घृतस्यधारांऽअभिचांक
शीमिहिरण्ययोंवेतसोमद्यौंऽअग्नेः ॥ ३८ ॥ रुचेत्त्वां ।
रुचेत्त्वांभासेत्त्वाज्योतिषेत्त्वा ॥ अभूंदिदंविश्वंस्यभुवंनस्य
ध्वाजिंनमग्नेर्वैश्वानरस्यंच ॥ ३९ ॥ अग्निर्ज्योतिषा ॥
अग्निर्ज्योतिषाज्योतिष्मान्ब्रुह्मोवर्चसावर्चस्वान् ॥ सहस्र
दाऽअंसिसहस्रांयत्त्वा ॥ ४० ॥ आदित्यङ्गर्भम् ॥ आदित्य

१ यत्र रकारपरस्य हकारपरस्य च स्पर्शवर्णस्य द्वित्वं तत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ज्ञेयम्। अस्य परं तु रेफहकाराभ्याम् इत्यनेन विधीयमानस्य द्वित्वस्यापवादभूतत्वात्। यथा संवर्चसा। गर्भम्। पार्थिवम्। चक्षुर्मित्रस्य। अग्निर्ज्योतिषा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गब्भम्पयसासमङ्गिसुहस्त्रंस्यप्प्रतिमांविश्वरूपम् ॥ परिवृङ्गि
हरसामाभिमे७स्थाःशुतायुषङ्कृणुहिचीयमानः ॥४१॥ वात
स्यजूतिं। वरुणस्यनाभिमश्वंजज्ञानं६सरिरस्यमद्ध्ये ॥ शिशुं
नदीनां७हरिमद्रिबुद्ध्नमग्नेमाहिं६सीःपरमेव्योमन् ॥४२॥
अजस्त्रमिन्दुम् ॥ अजस्त्रमिन्दुमरुषम्भुरण्युमग्निमीडे

१ मंस्थाः। अत्र संयोगाद्यश्च यो भवेत्। (या. शि.) यत्र संयोगाद्योऽनुस्वारो मात्रिको द्विमात्रिको वा वर्णो भवेत्तत्र ऋवर्णव्यञ्जनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एव बोध्यः। संयोगात्पूर्वः संयोगपूर्वः इति समासः। अत्र नानुस्वारः (शु. य. प्रा. ४ अ. १०९ सू.) लिङ्गम्। २ वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः। (या. शि.) मात्रिकेऽ (ह्रस्ववर्ण पूर्वे) नुस्वारे सो द्विमात्रिको लेख्यो बोध्य उच्चारणीयश्च। अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रेति (शु. य. प्रा. ४ अ. १४८ सू.) प्रमाणम्। ३ द्विमात्रिके मात्रिकः स्यादिति (या. शि.)। यत्रानुस्वारात्पूर्ववर्णो द्विमात्रिकस्तत्र मात्रिकोऽ (ह्रस्वः ७इत्याकारकः) नुस्वारो विधेयो ह्रस्वोच्चारणीयश्च। अत्र दीर्घादर्द्धमात्रा पूर्वा चाध्यर्धा (शु. य. प्रा. ४ अ. १४९ सू.) लिङ्गम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्व्वचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋतुशः कल्पमानो गाम्माहिः
सीरादितिंविराजम् ॥ ४३ ॥ वरूत्रीन्त्वष्टुः ॥ वरूत्रीन्त्व
ष्टुर्व्वरुणस्य नाभिमविज्ञ ज्ञाना ँरजसः परस्मात् ॥ मही ँ
साहस्रीमसुरस्य मायामग्ने माहिः सीः परमे व्योमन् ॥ ४४ ॥
योऽअग्निः ॥ योऽअग्निरग्नेरध्यजायत शोकात्पृथिव्याऽउत
वादिवस्परि ॥ येनप्रजाविश्वकर्म्माजुजानतमग्ने हेडः परि
तेवृणक्तु ॥ ४५ ॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगाद

सं. २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीकुञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्त
रिक्षुहसूर्य्यंऽआत्क्माजगतस्तुस्थुषश्च ॥ ४६ ॥ [९-४]
इमम्मा। हिंऽसीर्द्विपादम्पशुऽसहस्राक्षोमेधायचीयमानः॥
मयुम्पशुम्मेधमग्नेजुषस्वतेनचिन्वानस्तन्वोनिषीद ॥ मयु
न्तेशुगृच्छतुयन्द्विष्म्मस्तन्तेशुगृच्छतु ॥ ४७ ॥ इमम्मा ।
हिंऽसीरेकंशफम्पशुङ्कनिक्रदंवाजिनंवाजिनेषु ॥ गौरमार

॥ १३३ ॥

१ यत्र स्वरात्परस्य संयोगस्याद्यक्षरस्य द्वित्वं दृश्यते तत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन ज्ञेयम्। चिन्वानः। संव्यय-मानः। जनित्रम्। वरुणस्याग्नेः। परञ्च स संयोगः सजातीयकंठ्यतालव्यदन्त्यमूर्धन्यौष्ठ्यवर्णानां न चेत् तत्र तु द्वित्वाभाव एव यथा इमम्मा। गौरन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यमनुंतेदिशामितेनंचिन्वानस्तुन्वोनिषीद ॥ गौरन्तेशुगृं
च्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४८ ॥ इमꣳसांहस्रम् ॥
इमꣳसांहस्रꣳशतधारमुत्संव्यच्यमानꣳसरिरस्यमद्ध्ये ॥
घृतन्दुहांनामदितिञ्जनायाग्नेमाहिंꣳसीःपरमेव्योमन् ॥ गव
यमारण्यमनुंतेदिशामितेनंचिन्वानस्तुन्वोनिषीद ॥ गवय
न्तेशुगृंच्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४९ ॥ इमम्मूर्ण्णा
युं । वरुणस्यनाभिन्त्वचंम्पशूनान्द्विपदाञ्चतुंष्पदाम् ॥ त्वष्टुंः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्प्रजानाम्प्रथमञ्जनित्रमग्नेमाहिꣳसीःपरमेव्योमन् ॥ उष्ट्रं मारण्यमनुतेदिशामितेनंचिन्वानस्तन्वोनिषीद ॥ उष्ट्रन्ते शुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ५० ॥ अजोहि ॥ अजो ह्यग्नेरजनिष्टशोकात्सोऽअपश्यज्जनितारमग्रे ॥ तेनदेवादेव तामग्रमायँस्तेनरोहमायन्नुपमेद्यांसꣳ ॥ शरभमारण्यमनुते दिशामितेनंचिन्वानस्तन्वोनिषीद ॥ शरभन्तेशुगृच्छतुय न्द्विष्मस्तन्तेशुगृच्छतु ॥ ५१ ॥ त्वँर्यविष्ठ । दाशुषोनॄ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाहिशृणुधीगिरः ॥ रक्षातोकमुतत्कमना ॥ ५२ ॥ [६-५]
अपान्त्वा ॥ अपान्त्वेमन्त्सादयाम्यपान्त्वोद्द्मन्त्सादयाम्य
पान्त्वाभस्म्मन्त्सादयाम्यपान्त्वाज्योतिषिसादयाम्यपा
न्त्वायनेसादयाम्यर्ण्णवेत्त्वासदनेसादयामिसमुद्रेत्त्वासदने
सादयामिसरिरेत्त्वासदनेसादयाम्यपान्त्वाक्षयेसादयाम्य
पान्त्वासधिषिसादयाम्यपान्त्वासदनेसादयाम्यपान्त्वासध
स्थेसादयाम्यपान्त्वायोनौसादयाम्यपान्त्वापुरीषेसादया

१ एमनि इति पदम् । निशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचिन्निकारघटितेकारस्यापि लोपः । एवं लोपे एमन् भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्म्युपान्त्वापार्थसिसादयामिगायत्रेणत्त्वाच्छन्दसासादयामि
त्रैष्टुभेनत्त्वाच्छन्दसासादयामिजागतेनत्त्वाच्छन्दसासादया
म्म्यानुष्टुभेनत्त्वाच्छन्दसासादयामिपाङ्क्तेनत्त्वाच्छन्दसासाद
यामि ॥ ५३ ॥ [१-६] अयम्पुरः ॥ अयम्पुरोभुवस्तस्यं
प्राणोभौवायुनोवंसुन्तःप्राणायुनोगायत्रीवांसुन्तीगायत्र्यै
गायत्रङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतोरथन्तरंवसिष्ठऽ
ऋषिः प्रजापतिगृहीतयात्त्वयाप्राणङ्गृह्णामिप्रजाभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५४ ॥ अयन्दक्षिणा । विश्वकर्म्मातस्यमनोवैश्वकर्म्मणङ्गी
ष्मोमानुसास्त्रिष्टुब्ग्रैष्मीत्रिष्टुभं÷स्वारꣳस्वारादन्तर्य्यामोन्त
र्य्यामात्पञ्चदुशꣳपञ्चदुशाद्बृहद्भरद्वाजऽऋषि÷प्रजापतिगृही
तयात्त्वयामनोगृह्णामिप्रजाभ्यः÷ ॥ ५५ ॥ अयम्पश्चात् ॥
अयम्पश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंवृषाश्चाक्षु
ष्योजगतीवार्षीजगत्त्याऽऋक्सम्मृक्सम्माच्छुक्रꣳशुक्रात्सप्त
दुशꣳसप्तदुशाद्वैरूपञ्जमदग्निर्ऋषि÷प्रजापतिगृहीतयात्त्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षुर्गृह्णामिप्प्रजाभ्यः ॥ ५६ ॥ इदमुत्तरात् ॥ इदमुत्त
रात्त्वस्तस्यश्श्रोत्रꣳसौवꣳशरच्छौत्र्यनुष्टुप्पशारघ्नुष्टुभंऽऐ
डमैडान्मन्थीमन्थिनंऽएकविꣳशऽएकविꣳशाद्वैराजंविश्वामि
त्रऽऋषिः प्रजापतिगृहीतयात्त्वयाश्श्रोत्रङ्गृह्णामिप्प्रजाभ्यः
॥ ५७ ॥ इयमुपरिमतिस्तस्यैवाङ्मात्याहैमन्तोवाच्यꣳप
ङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनंवन्निधनंवतऽआग्ग्रयणऽआग्ग्रयणात्रि

१ विश्वामित्रः । अत्र नरहामित्रेषु च (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन मित्रशब्दपरे विश्वशब्दस्य दीर्घाकारः । २ वाङ्मात्या इति पदम् । पञ्चमेऽपञ्चमम् । (शु. य. प्रा. ४ अ. १२१ सू.) पञ्चमे स्पर्शे प्रत्यये परेऽपञ्चमः पञ्चमम्पद्यते । इत्यनेन ककारस्य पञ्चमे स्वरे पञ्चमः । वाङ्मात्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णवत्रयस्त्रिंशौत्रिंणवत्रयस्त्रिंशाभ्यांँशाक्करैवतेविश्वक
र्म्मऽऋषिः प्रजापतिगृहीतयात्त्वयावाचंङ्गृह्णामिप्रजाभ्यो
लोकन्ताऽइन्द्रम् ॥ ५८ ॥ [५-७] इतिश्रीवाजसनेयसंहि
तायांत्रयोदशोऽध्यायः ॥ १३ ॥ श्रीवेदपुरुषायनमः ॥
अनुवाकसूत्रम् ॥ ध्रुवक्षितिर्षट्, सजूर्ऋतुभिर्द्विका, मूर्द्धाद्वयो
द्विका, इन्द्राग्नीऽअव्यथमानाँषडा, युर्मेषडा, शुस्त्रिवृदेका,

१ अध्यायः १२-लोकंपृण. १ । ताऽअस्य. २ । इंद्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्नेर्भागोसिचतुष्कै, कयाचतुष्का, ष्टावेकत्रिꣳशत् [अ. १४ मं. ३१ अनु. ८] ॥ हरिः ॐ ॥ ध्रुवक्षितिर्ध्रुवयोनिः ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवँ योनिमासीदसाधुया ॥ उक्ख्यं स्यकेतुम्प्रथमञ्जुषाणाश्विनाध्वर्यूसादयतामिहत्त्वा ॥ १ ॥ कुलायिनीघृतवती ॥ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथिव्याः ॥ अभित्त्वारुद्राव्वसवोगृणन्त्विमाब्रह्मपीपि

१ ध्रुवयोनिः ॥ अत्र समानपदे ऋषरेभ्यः स्वरयवहकपैश्च (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन णत्वप्राप्तौ इन्द्राग्नी चित्रभानो० (य. शु. प्रा. ३ अ. ९३ सू.) इत्यनेन णत्वनिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिसौभंगायाश्विनांद्धुर्य्यूसांदयतामिहत्त्वां ॥ २ ॥ स्वैर्द्दक्षैः ॥
स्वैर्द्दक्षैर्द्दक्षंपितेहसींददेवानांॐसुम्नेबृहतेरणांय ॥ पितेवैधि
सूनवऽआसुशेवांस्वावेशातन्वासंविशस्वाश्विनांद्धुर्य्यूसांदयता
मिहत्त्वां ॥ ३ ॥ पृथिव्याःपुरीषम् ॥ पृथिव्याःपुरीषमस्य
प्सोनामतान्त्वाविश्वैऽअभिगृणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवं
तीहसींदप्रजावंदुस्मेद्रविणायंजस्वाश्विनांद्धुर्य्यूसांदयतामि
हत्त्वां ॥ ४ ॥ अदित्यास्त्वा । पृष्ठेसांदयाम्यन्तरिक्षस्यधर्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्टम्भनीन्दिशामधिपत्नीम्भुवनानाम् ॥ ऊर्म्मिर्द्रप्सोऽ
अपामसिविश्वकर्म्मातऽऋषिरश्विनाध्वर्य्यूसादयतामिहत्त्वा
॥ ५ ॥ शुक्रश्च ॥ शुक्रश्चशुचिश्चग्रैष्म्मावृतूऽअग्नेरन्तःश्लेषो
सिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्पन्ता
मग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसो
न्तराद्यावापृथिवीऽइमे ॥ ग्रैष्म्मावृतूऽअभिकल्पमानाऽइन्द्रं
मिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[६-१] सजूर्ऋतुभिः । सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधै
रग्नयेत्त्वावै श्वानरायाश्विनाध्वर्यूसादयतामिहत्त्वा सजूर्ऋतु
भिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैरग्नयेत्त्वावै
श्वानरायाश्विनाध्वर्यूसादयतामिहत्त्वा सजूर्ऋतुभिः सजूर्वि
धाभिः सजूरुद्रैः सजूर्देवैर्वयोनाधैरग्नयेत्त्वावै श्वानरायाश्वि
नाध्वर्यूसादयतामिहत्त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूरा
दित्यैः सजूर्देवैर्वयोनाधैरग्नयेत्त्वावै श्वानरायाश्विनाध्वर्यूसा

सं. २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयतामिहत्त्वासुजूर्ऋतुभिः सुजूर्विधाभिः सुजूर्विश्वैर्देवैः सु
जूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनोर्द्धुर्य्यूसादयतामि
हत्त्वा ॥ ७ ॥ प्राणम्मे । पाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षुं
र्म्मऽउर्व्याविभाहिश्रोत्रम्मेश्लोकय ॥ अपःपिन्वौषधीर्जिन्व
द्विपादवचतुष्पात्त्पाहिदिवोवृष्टिमेरय ॥ ८ ॥ [२-२] मूर्द्धा
वयः । प्रजापतिश्छन्दः क्षत्रंवयोमयन्दुश्छन्दोविष्टम्भो
वयोधिपतिश्छन्दोविश्वकर्म्मावयः परमेष्ठीच्छन्दोबृस्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्वयोंविवलञ्छन्दोवृषिण्वर्व्वयोंविशालञ्छन्दुंपुरुषोव्वयंस्त्तु
न्द्रञ्छन्दोंव्याग्घ्रोव्वयोनांधृष्टञ्छन्दं÷सिंहोव्वयंश्छदिश्छ
न्दं÷पष्ठवाड्व्वयोंबृहतीच्छन्दंऽउक्षाव्वयं÷कुकुप्छन्दंऽऋषभो
व्वयं÷सतोबृंहतीच्छन्दोंनड्वान्व्वयं÷ ॥९॥ अनड्वान्व्वयं÷ । पङ्क्ति
श्छन्दोंधेनुर्व्वयोजगंतीच्छन्दुस्त्र्यविर्व्वयंस्त्रिष्टुप्छन्दोंदित्य
वाड्व्वयोंविराट्छन्दुंपञ्चांविर्व्वयोंगायत्रीच्छन्दंस्त्रिवत्सोव्वयंऽउ
ष्णिणक्छन्दंस्त्तुर्य्यवाड्व्वयोंनुष्टुप्छन्दोंलोकन्ताऽइन्द्रंम् ॥१०॥

१ अध्यायः १२ लोकंपूर्ण. १ ताऽअस्य. २ । इन्द्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[२-३] इन्द्राग्नीऽअध्यथमानाम् ॥ इन्द्राग्नीऽअध्यथमानामिष्टकान्दृꣳहतँऽयुवम् ॥ पृष्ठेनद्यावापृथिवीऽअन्तरिक्षञ्चविबाधसे ॥ ११ ॥ विश्वकर्म्मात्त्वा । सादयत्त्वन्तरिक्षस्यपृष्ठेव्यचस्वतीम्प्रथस्वतीमन्तरिक्षँऽयच्छान्तरिक्षन्दृꣳहान्तरिक्षम्माहिꣳसीः ॥ विश्वस्मैप्प्राणायापानायव्यानायोदानायप्प्रतिष्ठायैचरित्रायं ॥ वायुष्ट्वाभिपातुमह्यास्वस्त्याच्छर्द्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतम् ॥ ७०० ॥ राज्ञ्यसि ॥ राज्ञ्यसिप्राचीदिग्विराडसि दक्षिणादिक्सम्राडसिप्रतीचीदिक्स्वराडुदीचीदिगधिपत्न्यसिबृहतीदिक् ॥ १३ ॥ विश्वकर्म्मात्त्वा । सादयत्त्वन्तरिक्षस्यपृष्ठेज्योतिष्मतीम् ॥ विश्वस्मैप्राणायापानायव्यानायविश्वज्योतिर्यच्छ ॥ वायुष्टेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ १४ ॥ नभश्च । नभस्यश्चवार्षिकावृतूऽ

१ वायुष्टे । अत्र वायुस्ते इति पदम् । "वायुरग्निरग्नेरेकाक्षरे" (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे पदे परे वायुः अग्निः अग्नेः एतेषां विसर्गस्य षत्वं भवति । ततः ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नेरन्तꣳश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओ
षधयꣳकल्पन्तामग्नयꣳपृथुङ्गममज्यैष्ठ्यायसव्रताꣳ ॥ येऽ
अग्नयꣳसमनसोन्तराद्यावापृथिवीऽइमे ॥ द्वार्षिकावृतूऽअं
भिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गि
रस्वद्ध्रुवेसीदतम् ॥ १५ ॥ इषश्च ॥ इषश्चोर्जश्चशारदा
वृतूऽअग्नेरन्तꣳश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामा
पऽओषधयꣳकल्पन्तामग्नयꣳपृथुङ्गममज्यैष्ठ्यायसव्रताꣳ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येऽअग्नयः समनसोन्तराद्यावापृथिवीऽइमे ॥ शारदावृतूऽ
अभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतया
ङ्गिरस्वद्ध्रुवेसीदतम् ॥ १६ ॥ [६-३] आयुर्म्मे । पाहिप्रा
णम्मेपाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षुर्म्मेपाहिश्रोत्रम्मे
पाहिवाचम्मेपिन्वमनोमेजिन्वात्क्मानम्मेपाहिज्योतिर्म्मेय
च्छ ॥ १७ ॥ माच्छन्दः । प्रमाच्छन्दः । प्रतिमाच्छन्दोऽअस्त्री
वयश्छन्दः । पङ्क्तिश्छन्दऽउष्णिक्छन्दोबृहतीच्छन्दोनुष्टु

१ अत्र "अस्त्रीवयश्छन्दः" इत्यत्र "चछयोः शम्" इत्यनेन यकारोत्तरवर्तिनो विसर्जनीयस्य शकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्पच्छन्दोंविराट्छन्दोंगायत्रीच्छन्दंस्त्रिष्टुप्पच्छन्दोजगतीच्छन्दं÷
॥ १८ ॥ पृथिवीच्छन्दं÷ ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दो
द्यौश्च्छन्दुःसमाश्च्छन्दोनक्षत्राणिच्छन्दोवाक्छन्दोमन
श्च्छन्दं÷कृषिश्च्छन्दोहिरण्यञ्छन्दोगौश्च्छन्दोजाच्छन्दो
श्वश्च्छन्दं÷ ॥ १९ ॥ अग्निर्देवता ॥ अग्निर्देवतावातोदेव
तासूर्योदेवतांचन्द्रमादेवतावसवोदेवतारुद्रादेवतांदित्यादेव
तांमरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवता ॥ २० ॥ मूर्द्धासि ॥ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसि धरणी ॥ आयुषेत्त्वावर्च्चसेत्त्वाकृष्ट्यैत्त्वाक्षेमायत्त्वा ॥ २१ ॥ यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसियमनीद्ध्रुवासिधरित्री ॥ इषेत्त्वोर्जेत्त्वारय्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् ॥ २२ ॥ [६-५] आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तः पञ्चदशोव्यौमासप्तदशोधरुणऽएकविंशः प्रतूर्त्तिरष्टादशस्तपोनवदशोभीवर्त्तः सविंशो

१ अध्याय १२–लोकंपृण. ५४ १–ताऽअस्य. ५५ २ । इंद्रंविश्वाः. ३ ५६ ॥ इति प्रतीकानि ॥ २ अभीवर्त्तः । अत्र "अश्वरश्मिमतिसुमतिश्वसुतचारयघृणिसेदिमेन्द्रियधारयचित्रभङ्गुरवयुनाश्वस्यहृदयघुष्यर्त्तोध्यवताभ्यर्चशक्तिपुरुशचि वकारे" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे अभि इत्यस्य ह्रस्वेकारस्य दीर्घेकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्चौद्वाविंशः सम्भरणस्त्रयोविंशोयोनिश्चतुर्विंशोगर्भाः पञ्चविंशऽओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठात्रयस्त्रिंशो बृद्धस्त्रयस्त्रिंशपञ्चतुस्त्रिंशोनाकः षट्त्रिंशोविवर्त्तोष्टाचत्वारिंशोधर्त्रश्चतुष्टोमः ॥ २३ ॥ [१-६] अग्नेर्भागः ॥ अग्नेर्भागोसिदीक्षायाऽआधिपत्यम्ब्रह्मस्पृतन्त्रिवृत्स्तोमऽइन्द्रस्यभा

---

१ बद्धस्य । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् । न त्वत्र धकारोत्तरवर्तिनो नकारस्य स्ववर्गीयत्वेन स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन निषेधः । तस्यानुत्तमे एव स्ववर्गीये वर्णपरे निषेधात् । अत्र तु अनुनासिकाश्चोत्तमाः (य. शु. प्रा. १ अ. ८६ सू.) इत्यनेन वर्गोत्तमा ङञणनमाः (वर्गोत्तमसंज्ञकाः) अनुनासिका भवन्ति । इति धकारत्तरोवर्तिनो नकारस्य वर्गोत्तमत्वात्तदतिरिक्तेषु वर्णपरेषु स्ववर्गीयेष्वेव द्वित्वनिषेधो बोध्यः । एवं तत्तत्स्थलेषु ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोसिविष्णोराधिपत्यङ्गत्रꣳस्पृतम्पञ्चदशस्तोमोनृचक्षं
साम्भागोसिधातुराधिपत्यञ्जनित्रꣳस्पृतꣳसप्तदशस्तोमो
मित्रस्यभागोसिवरुणस्याधिपत्यन्दिवोवृष्टिर्वातंस्पृतऽएक
विꣳशस्तोमोवसूनाम्भागः ॥ २४ ॥ वसूनाम्भागः ॥ वसू
नाम्भागोसिरुद्राणामाधिपत्यञ्चतुष्पात्स्पृतञ्चतुर्विꣳशस्तो
मऽआदित्यानाम्भागोसिमरुतामाधिपत्यङ्गर्भास्पृताःपञ्च
विꣳशस्तोमोदित्यैभागोसिपूष्णऽआधिपत्यमोजस्पृतात्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णुवस्त्तोमोदेवस्यसवितुर्भागोसिबृहस्पतेराधिपत्त्यꣳसमी
चीर्दिशस्पृताश्चतुष्टोमस्त्तोमोयवानाम्भागः ॥ २५ ॥ यवा
नाम्भागः ॥ यवानाम्भागोस्ययवानामाधिपत्त्यम्प्रजास्पृता
श्चतुश्चत्त्वारिꣳशस्त्तोमऽऋभूणाम्भागोसिविश्वेषान्देवानामा
धिपत्त्यम्भूतꣳस्पृतन्त्रयस्त्रिꣳशस्त्तोमुꣳसहश्च ॥ २६ ॥ सह
श्च । सहस्यश्चहेमन्तिकावृतूऽअग्नेरन्तꣳश्लेषोसिकल्पेतान्द्या
वापृथिवीकल्पन्तामापऽओषधयꣳकल्पन्तामुग्नयꣳपृथुङ्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुज्यैष्ठ्यायसब्रंताः॥ येऽअग्न्नयःसमंनसोन्तुराद्यावांपृथिवीऽ
इमे ॥ हैमंन्तिकावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभि
संविशन्तुतयांदेवतयाङ्गिरस्वद्ध्रुवेसींदतम् ॥२७॥ [४-७] एकं
यास्तुवत। प्प्रजाऽअंधीयन्तप्प्रजापंतिरधिंपतिरासीत्तिसृंभिंर
स्तुवतब्रह्मांसृज्यतब्रह्मंणस्प्पतिरधिंपतिरासीत्पञ्चभिंरस्तु
वतभूतान्यंसृज्यन्तभूतानाम्पतिरधिंपतिरासीत्सप्तभिंरस्तु

१ तिसृभिः। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ "ऋकाररेफारुदयश्च" (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन यत्र ऋकारोदयः, रेफोदयः, अरुदयश्च सकारस्तत्र प्रकृत्या स्यात्तेनात्र सस्य ऋकारोदयत्वान्न षत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतसप्तऽऋषयोसृज्यन्तधाताधिपतिरासीन्नवभिरस्तुवत
॥२८॥ नवभिरस्तुवत। पितरोसृज्यन्तादितिरधिपत्न्यासीदे
कादशभिरस्तुवतऽऋतवोसृज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्र
योदशभिरस्तुवतमासाऽअसृज्यन्तसंवत्सरोधिपतिरासीत्प
ञ्चदशभिरस्तुवतक्षुत्रमसृज्यतेन्द्रोधिपतिरासीत्सप्तदशभि
रस्तुवतग्राम्याःपशवोसृज्यन्तबृहस्पतिरधिपतिरासीन्नव
दशभिरस्तुवत॥२९॥नवदशभिरस्तुवत।शूद्राऽर्य्यावसृज्येता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महोरात्रेऽअधिपत्नीऽआस्तामेकाविꣳशत्यास्तुवतैकशफाः
पशवोसृज्यन्तद्वरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवतक्षु
द्राःपशवोसृज्यन्तपूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतार
ण्याःपशवोसृज्यन्तद्वायुरधिपतिरासीत्सप्तविꣳशत्यास्तुव
तद्द्यावापृथिवीभ्यैतांवसवोरुद्राऽआदित्याऽअनुभ्यायँस्तऽए
वाधिपतयऽआसन्नवविꣳशत्यास्तुवत ॥३०॥ नवविꣳशत्या
स्तुवत ॥ नवविꣳशत्यास्तुवतद्वनस्पतयोसृज्यन्तसोमोधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिरासीदेकंत्रिꣳशतास्त्तुवतप्प्रजाऽअंसृज्यन्तुसवाश्चायंवा
श्चाधिपतयऽआसँस्त्रयंस्त्रिꣳशतास्त्तुवतभूतान्यंशाम्म्यन्प्रजा
पतिꣳपरमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥ ३१ ॥ [४-८]
इतिश्रीवाजसनेयसंहितायांचतुर्दशोऽध्यायः ॥ १४ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाकसूत्रम् ॥ अग्नेजातान्पञ्च,रश्मिना
सत्यायचतस्रो,राज्ञ्यसिपञ्चा,यंपुरःपञ्चा,ग्निर्मूर्द्धैकोनत्रिꣳश,

१ अध्यायः १२-लोकंपृण. १-ताऽअस्य. २ । इंद्रविश्वाः. ३ इति प्रतीकानि ॥
॥ मंत्रः ॥ ५४ ५५ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्येनऽऋषयोष्टौ,तपश्चनव,सप्त पञ्चषष्टिः ॥ [अ. १५ मं. ६५ अनु. ७] ॥ हरिः ॐ ॥ अग्नेंजातान् ॥ अग्नेंजातान्प्रणुदा नः सपत्नान्प्रत्यजातान्नुदजातवेदः ॥ अधिनोब्रूहिसुमनाऽअ हेंडुँस्तवंस्यामुशर्म्मंस्त्रिवरूथऽउद्भौ ॥१॥ सहंसाजातान् ॥ सहं साजातान्प्रणुदानः सपत्नान्प्रत्यजाताञ्जातवेदोनुदस्व ॥ अधिं नोब्रूहिसुमनस्यमानोव्वयꣳस्यामुप्प्रणुदानः सपत्नान् ॥ २ ॥

---

१ प्रणुदानः । अत्र प्रनुदान इति पदम् । अत्र समानपदत्वाभावेन "ऋषरेभ्यः" इत्यनेन णत्वाप्राप्तौ "प्रनेत्तिनुदातिहिनोमीनाम्" (शु. य. प्रा. ३ अ. ८९ सू.) इत्यनेन प्रशब्दात्परे स्थितानामेतेषां नकारस्य णत्वविधानादत्र णत्वम् । तथा चात्र प्रनुद नः दकारोत्तरवर्तिनः ह्रस्वाकारस्य नकारे परे "धारयोव०" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशीस्तोमः ॥ षोडशीस्तोमऽओजोद्रविणञ्चतुश्चत्वारिंश
स्तोमोवर्चोद्रविणम् ॥ अग्नेः पुरीषमस्यप्सोनामृतान्त्वा
विश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्रजावं
दुस्मेद्रविणायजस्व ॥ ३ ॥ एवश्छन्दः ॥ एवश्छन्दो
वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽआच्छच्छन्दो
मनुश्छन्दोव्यचुश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः स
रिरञ्छन्दः कुकुप्छन्दस्त्रिकुकुप्छन्दः काव्यञ्छन्दोऽअङ्कुप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्छन्दोक्षरपङ्क्तिश्च्छन्दः÷पदपङ्क्तिश्च्छन्दोविष्टारपङ्क्तिश्च्छ
न्दः÷क्षुरोब्भ्रजश्च्छन्दःऽआच्छच्छन्दः÷प्रच्छच्छन्दः÷ ॥ ४ ॥
आच्छच्छन्दः÷प्रच्छच्छन्दः÷ । सँऽयच्छन्दोव्वियच्छन्दोबृ
हच्छन्दोरथन्तरञ्छन्दोनिकायश्च्छन्दोव्विवधश्च्छन्दोगिर
श्च्छन्दोब्भ्रजश्च्छन्दः÷सꣳस्तुप्छन्दोनुष्टुप्छन्दुऽएवुश्च्छ
न्दोव्वरिवुश्च्छन्दोव्वयुश्च्छन्दोव्वयुस्कृच्छन्दोविष्पर्द्धाश्च्छ
न्दोविशालञ्छन्दःश्च्छदिश्च्छन्दोदूरोहणञ्छन्दःस्तुन्द्रञ्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्दोऽअङ्गाङ्गच्छन्दः ॥ ५ ॥ [५-१] रश्मिमनासत्त्या
यं । सत्त्याञ्जिन्वप्प्रेतिनाधर्म्मणाधर्म्माञ्जिन्वान्वित्त्यादिवादि
वंञ्जिन्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्वप्प्रतिधिनापृथि
व्यापृथिवीञ्जिन्वविष्टम्भेनवृष्ट्याबृष्टिञ्जिन्वप्प्रवयान्हाहर्ज्जि
न्वानुयारात्र्यारात्रीञ्जिन्वोशिजावसुंभ्योवसूञ्जिन्वप्प्रकेते
नादित्त्येभ्यऽआदित्त्याञ्जिन्वतन्तुनारायः ॥ ६ ॥ तन्तु
नारायः ॥ तन्तुनारायस्पोषेणरायस्पोषंञ्जिन्वसꣳसर्पेणंशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तायंश्रुतञ्जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेनतनूभिंस्तनू
र्जिन्ववयोधसाधीतेनाधीतञ्जिन्वाभिजितातेजसातेजोजिन्व
॥ ७ ॥ प्रतिपदसि । प्रतिपदेत्त्वानुपदस्यनुपदेत्त्वासम्पद
सिसम्पदेत्त्वातेजोसितेजसेत्त्वात्रिवृदसि ॥ ८ ॥ त्रिवृद
सि । त्रिवृतेत्त्वाप्रवृदसिप्रवृतेत्त्वाद्विवृदसिद्विवृतेत्त्वासवृदसि
सवृतेत्त्वाक्रमोस्याक्रमायत्त्वासक्रमोसिसक्रमायत्त्वोत्क्रमोस्यु
त्क्रमायत्त्वोत्क्रान्तिरस्युत्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोर्ज्जोञ्जिन्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ [४-२] राज्यंसि ॥ राज्यंसिप्राचीदिग्वसवस्त्ते
देवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्त्ताऽत्रिवृत्त्वास्तोमः पृथि
व्याᳬश्रयत्त्वाज्यमुक्थमद्यंथायैस्तब्भ्नातुरथन्तरᳬसामु
प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथमजादेवेषुदिवोमा
त्रयाद्वरिम्णाप्रथन्तुद्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्वेसंवि
दानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥ १० ॥ विरा
डसि ॥ विराडसिदक्षिणादिग्गुद्रास्त्तेदेवाऽअधिपतयऽइन्द्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतीनाम्प्रतिधुर्त्तापञ्चदुशस्त्वास्तोमं÷पृथिव्याँश्रयतुप्रऽ
उगमुक्थमव्यथायैस्तम्भातुबृहत्सामुप्प्रतिष्ठित्याऽअन्तरि
क्षऽऋषयस्त्वाप्प्रथमुजादेवेषुदिवोमात्रयाद्वारिम्मणाप्प्रथन्तु
विधुर्त्ताचायमधिपतिश्चतेत्त्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गे
लोकेयजमानञ्चसादयन्तु ॥ ११ ॥ सुम्राडसि । प्रतीची
दिगादित्यास्तेदेवाऽअधिपतयोवरुणोहेतीनाम्प्रतिधुर्त्तासप्त
दुशस्त्वास्तोमं÷पृथिव्याँश्रयतुमरुत्वतीयमुक्थमव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थायैस्तब्भ्नातुवैरूपꣳसामुप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथमुजादेवेषुदिवोमात्रंयावरिम्णाप्प्रथन्तुविधुर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ॥१२॥ स्वराडसि ॥ स्वराडुस्युदीचीदिङ्मरुतस्त्वेदेवाऽअधिपतयःसोमोहेतीनाम्प्रतिधर्त्तैकविꣳशस्त्वास्त्तोमः÷पृथिव्याऽश्रयतुनिष्केवल्यमुक्थमव्यंथायैस्तब्भ्नातुवैराजꣳसामुप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्रथमुजादेवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षुंदिवोमात्रंयाव्वरिम्मणाप्प्रथन्तुव्विधुर्त्ताचायमधिंपतिश्चतेत्त्वा
सर्व्वैसंविदुानानाकंस्यपृष्ठेस्वुर्गेलोकेयजंमानञ्चसादयन्तु ।१३।
अधिंपत्क्रयसि। बृहुतीदिग्विश्वेतेदेवाऽअधिंपतयोबृहुस्पतिर्हे
तीनाम्प्रतिधुर्त्तात्रिंणवत्रयस्त्रिंहुशौत्त्वास्तोमौपृथिव्याँश्रय
तांव्वैश्वदेवाग्निमारुतेऽउक्थेऽअर्व्यथायैस्तब्भीताँशाक्ररै
वतेसामंनीप्प्रतिंष्ठित्त्याऽअन्तरिंक्षुऽऋषंयस्त्वाप्प्रथमुजादेवे
षुंदिवोमात्रंयाव्वरिम्मणाप्प्रथन्तुव्विधुर्त्ताचायमधिंपतिश्चतेत्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वैसंविदानानाकंस्यपृष्ठेस्वर्ग्गेलोकेयजंमानञ्चसादयन्तु ।१४।
[५-३] अयम्पुरः ॥ अयम्पुरोहरिकेशः सूर्य्यरश्मिस्तस्य
रथगृत्त्सश्चरथौजाश्चसेनानीग्रामण्यौ ॥ पुञ्जिकस्त्थलाचक्र
तुस्त्थलाचाप्सरसौदुङ्क्षणं ÷ पशवोहेतिः पौरुषेयोवधः प्रहेति
स्तेभ्योनमोऽअस्त्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेददध्मः ॥१५॥ अयन्दक्षिणा । विश्वकर्म्मा
तस्यरथस्वनश्चरथैचित्रश्चसेनानीग्रामण्यौ ॥ मेनकाचसहजु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्याचाप्सुरसौयातुधानाहेतीरक्षांᳬसिप्रहेतिस्तेभ्योन
मोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे
षाञ्जम्भेददध्मः ॥ १६ ॥ अयम्पश्चात् ॥ अयम्पश्चाद्विश्वच्य
चास्तस्यरथप्रोतश्चासमरथश्चसेनानीग्रामण्यौ ॥ प्रम्लो
चन्तीचानुम्लोचन्तीचाप्सुरसौव्याघ्राहेतिःसर्पाःप्रहेति
स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेददध्मः ॥ १७ ॥ अयमुत्तरात् ॥ अयमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तुराक्तसँऽयद्वसुस्तस्युताक्ष्र्यश्चारिष्टनेमिश्चसेनानीग्रामु
ण्यौ ॥ विश्वाचीचघृताचीचाप्सरसावापोहेतिर्वातुःप्रहेति
स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ १८ ॥ अयमुपरि ॥ अयमुपर्य्यर्वा
ग्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानीग्रामुण्यौ ॥ उर्वशीचपू
र्वचित्तिश्चाप्सरसावविस्फूर्जहेतिर्विद्युत्प्रहेतिस्तेभ्योनमोऽ
अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्जम्भैदद्ध्मः ॥ १९ ॥ [५-४] अग्निर्म्मूर्द्धा । दिवःकुकु
त्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ २० ॥
अयमग्निः । सहस्त्रिणोवाजस्यशतिनस्पतिः ॥ मूर्द्धाकवी
रयीणाम् ॥ २१ ॥ त्वामग्ने ॥ त्वामग्नेपुष्करादध्यथर्व्वानिर
मन्थत ॥ मूर्द्धोविश्वस्यवाघतः ॥ २२ ॥ भुवोयज्ञस्य ॥ भुवोय
ज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिः ॥ दिविमूर्द्धा
नन्दधिषेस्वर्षाजिह्वामग्नेचकृषेहव्यवाहम् ॥ २३ ॥ अवोच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्निः । समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ युह्वाऽ
इवप्रवयामुज्जिहानाःप्रभानवः सिस्रतेनाकमच्छ ॥ २४ ॥
अवोचामकवये ॥ अवोचामकवयेमेध्यायवचोवन्दारुवृषभा
यवृष्णे ॥ गविष्ठिरोनमसास्तोममग्नौदिवीवरुक्ममुरुव्यञ्च
मश्रेत् ॥ २५ ॥ अयमिह । प्रथमोधायिधातृभिर्होतायजि
ष्ठोऽअध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रं

१ धेनुमिवायतीमुषासम् । अत्र ईम्शब्दात्परस्य उषशब्दस्य कारस्य "उषमहोभिर्नक्तेमी०" (शु. य. प्रा. ३ अ. ११८ सू.) इत्यनेन दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विब्भ्वंविशेविशे ॥ २६ ॥ जनंस्यगोपाः ॥ जनंस्यगोपाऽअं
जनिष्टजागृविरग्निःसुदक्षं÷सुवितायनव्यंसे ॥ घृतप्रतीको
बृहतादिविस्पृशाद्युमद्विभातिभरतेब्भ्युंशुचिं÷ ॥ २७ ॥
त्वामग्ने ॥ त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रि
याणंवनेवने ॥ सजायसेमथ्यमानुंसहोमहत्त्वामाहुंसहसं

---

१ दिविस्पृशाः । अत्र "भाविभ्यः सः षः समानपदे" इत्यनेन प्राप्तस्य षत्वस्य अनुसंतनोतुबृहस्पतिसुतस्यसुसमिद्धायसुसन्दृशमभिसत्त्वाऽभिसंविशन्तुसुसस्याऽअतिस्थूलम्मुसलेपत्क्रीसंयाजान्क्रतुस्थलाञ्जिसकृथो दिविस्पृशा०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वनिषेधः । २ सः जायसे । अत्र "व्यञ्जने च" (शु. य. प्रा. ३ अ. १६ सू.) इत्यनेन जायसे परे स इत्यस्य विसर्जनीयस्य लोपे सजायसे इति पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पुत्रमङ्गिरः ॥ २८ ॥ सखायुःसम् ॥ सखायुःसंवः÷सुम्म्य
ञ्जमिषꣳस्तोमञ्चाग्नये ॥ वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसहस्व
ते ॥ २९ ॥ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेविश्वान्यर्य
ऽआ ॥ इडस्पदेसमिध्यसेसनोवसून्याभर ॥ ३० ॥ त्वाञ्चि
त्रश्रवस्तम ॥ त्वाञ्चित्रश्रवस्तमहवन्तेविक्षुजन्तवः÷ ॥
शोचिष्केशम्पुरुप्रियाग्नेहव्यायवोढवे ॥ ३१ ॥ एनावः÷ ॥

१ इडः पदे इति पदम् । अत्र "आविनिरिडइडाया वसतिर्वीरिवः" (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन विसर्जनीयस्य ककारपकारपरयोः सकारः-पकारश्च यथायोगं विधीयते । इडस्पदे इति रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एनावोऽअग्निन्नमसोर्ज्जोनपातमाहुवे ॥ प्रियञ्चोतिष्ठमरतिꣳ
स्वध्वरंविश्वस्यदूतममृतम् ॥ ३२ ॥ विश्वस्यदूतम् ॥ विश्वस्य
दूतममृतंविश्वस्यदूतममृतम् ॥ सयोजतेऽअरुषाविश्वभोजसा
सदुद्रवत्त्स्वाहुतꣳ ॥ ३३ ॥ सदुद्रवत् ॥ सदुद्रवत्त्स्वाहुतꣳसदुद्र
वत्त्स्वाहुतꣳ ॥ सुब्रह्मायज्ञ? सुशमीवसूनान्देवꣳराधोजनाना
म् ॥ ३४ ॥ अग्नेवाजस्य ॥ अग्नेवाजस्यगोमतऽईशानꣳसहसो
यहो ॥ अस्मेधेहिजातवेदोमहिश्रवः ॥ ३५ ॥ सऽइधान? ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ पृतनाषाह्याय च अत्र "सहेः पृतनायाः" (शु. य. प्रा. ३ अ. ७५ सू.) इत्यनेन पृतनाशब्दात्परस्य सस्य षत्वं निपात्यते। २ अभिवृत्रम्। अत्र "अश्वरश्मि" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन प्राप्तो अभि इत्यस्य ह्रस्वेकारस्य दीर्घाकारो "अभिविख्येपंवीरविश्ववत्सवृत्रवाजयन्तेषु" (शु. य. प्रा. ३ अ. १०० सू.) इत्यनेन अभेः परेषु एतेषु पदेषु निषिद्ध्यते तेनात्र वकारे परेऽपि दीर्घो न भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांजघन्थ ॥ ६९ ॥ ब्विनं÷ ॥ ब्विनंऽइन्द्रमृधोंजहिनीचायं
च्छपृतन्न्यतः ॥ योऽअस्म्माँ२॥ऽअंभिदासत्त्यधंरङ्गमयात
मं÷ ॥ ७० ॥ मृगोन । भीमःकुंचरोगिंरिष्ठाःपंरावतऽआ
जंगन्थापरंस्याः ॥ सृकंदिःसुहृशायंपविमिंन्द्रतिग्मंविशत्रूंन्ता
द्विविमृधोंनुदस्व ॥ ७१ ॥ वैश्वानरोनं÷ ॥ वैश्वानरोनंऽ
ऊतयऽआप्रयांतुपरावतं÷ ॥ अग्निर्न्नं÷सुष्टुतीरुपं ॥ ७२ ॥
पृष्टोदिवि । पृष्टोऽअग्निःपृंथिव्याम्पृष्टोविश्वाऽओषंधीराविं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेश ॥ वैश्वानरः सहसापृष्टोऽअग्निः सनो दिवा सरिषस्पातु नक्तम् ॥ ७३ ॥ अश्श्यामतम् ॥ अश्श्यामतङ्कामम्मग्नेतवोतीऽअश्श्यामरयिꣳ रयिवꣳसुवीरम् ॥ अश्श्यामवाजमभिवाजयन्तोऽश्श्यामद्युम्नमजराजरन्ते ॥ ७४ ॥ व्वयन्ते ॥ व्वयन्तेऽअद्धरिमाहिकामम्मुत्तानहस्तानमसोपसद्य ॥ यजिष्ठेन मनसायक्षिदेवानस्त्रेधतामन्मनाविप्रोऽअग्ने ॥ ७५ ॥ धा

१ रिषष्पातु इति पदम् । अत्र "अध्वनो रजसो रिषः स्पृशस्पातौ" (शु. य. प्रा. ३ अ. २८ सू.) इत्यनेन रिषः पदस्य विसर्जनीयस्य पातु पदे परे सत्वे षत्वेच "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पातुघटितपकारस्य द्वित्वे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्छदुग्निः ॥ धामुच्छदुग्निरिन्द्रोब्रह्मादेवोबृहस्पतिः ॥
सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनःशुभे ॥ ७६ ॥ त्वँस्यविष्ठ ।
दाशुषोनॄंपाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥ ७७ ॥
[१०-१३] इतिश्रीवाजसनेयसंहितायामष्टादशोऽध्यायः १८ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ स्वाद्वीन्त्वैकादश,
देवायज्ञंविंशतिः, सुरावन्तंसप्तदशो, दीरतान्त्रयोदशा,
च्याजानुर्दश, सोमोराजाष्टौ, सीसेनतन्त्रंषोडश, सप्त पञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवतिः ॥ [अ. १९ मं. ९५ अनु. ७] हरिःॐ ॥ स्वाद्वी
न्त्वा । स्वादुनातीव्रान्तीव्रेणामृतामृतेन ॥ मधुमतीम्मधु
मतासृजामिसꣳसोमेन ॥ सोमोस्यश्विभ्यांम्पच्यस्वसरस्व
त्यैपच्यस्वेन्द्रायसुत्राम्णेपच्यस्व ॥ १ ॥ परीतः ॥ परीतो
षिञ्चतासुतꣳसोमोयऽउत्तमꣳहविः ॥ दधन्वायोनऽर्योऽअ
प्स्वन्तरासुषावसोममद्भिभिः ॥ २ ॥ वायोः पूतः । पवित्रे

१ परीतः सिञ्चता इति पदे । अत्र "उकारमितः सिञ्चता सोपधः" (शु. य. प्रा. ३ अ. ४६ सू.) इत्यनेन इतःसंबन्धिविसर्गस्य सिञ्चतौ परे सोपध उकारो विधीयते परश्च मूर्धन्यो भवति इति । सोपधे ओकारे सकारस्य मूर्धन्यत्वे च परीतोषिञ्चता इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णप्प्रत्त्यङ्ङ्सोमोऽअतिद्रुतꣳ ॥ इन्द्रस्ययुज्ज्यꣳसखा ॥ वायोः
पूतःपवित्रेणप्प्राङ्ङ्सोमोऽअतिद्रुतꣳ ॥ इन्द्रस्ययुज्ज्यꣳसखा
॥ ३ ॥ पुनातिते । परिस्रुतꣳसोमꣳसूर्य्यस्यदुहिता ॥ वारेण
शश्वतातना ॥ ४ ॥ ब्रह्मक्षत्रम् ॥ ब्रह्मक्षत्रम्पवतेतेजऽइन्द्रि
यꣳसुरयासोमꣳसुतऽआसुतोमदाय ॥ शुक्रेणदेवदेवतांꣳपि
पृग्ग्धरसेनान्नँस्यजमानायधेहि ॥ ५ ॥ कुविदङ्ग । यवम

---

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन हकारात्परस्य मकारस्य द्वित्वे प्राप्तेऽपि "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वविधानात्तेनैवात्र स्पर्शवर्णपरे मकारे तस्य द्वित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तोयवंश्चिद्यथादान्त्यंनुपूर्वंवियूयं ॥ इहेहैषाङ्कृणुहिभोजंना
निषेबर्हिषोनमंऽउक्तिँऽयजन्ति ॥ उपयामगृहीतोस्यश्वि
ब्भ्यांन्त्वासरंस्वत्त्यैत्त्वेन्द्रायत्त्वासुत्राम्मणंऽएषतेयोनिस्तेजं
सेत्त्वावीर्य्यायत्त्वाबलायत्त्वा ॥ ६ ॥ नानाहि । वान्देवहिं
तुः सदंस्कृतम्मासः सृक्षाथाम्परमेव्योमन् ॥ सुरात्त्वमसिंशु
ष्मिणीसोमंऽएषमामांहिः सीःस्वाँऽयोनिंमाविशन्तीं ॥ ७ ॥
उपयामगृहीतोसि ॥ उपयामगृहीतोस्याश्विनन्तेजं÷सारस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंवीर्य्यमैन्द्रम्बलम् ॥ एषतेयोनिर्म्मोदायत्त्वानन्दायत्त्वाम
हंसेत्त्वा ॥ ८ ॥ तेजोसि ॥ तेजोसितेजोमयिधेहिवीर्य्यम
सिवीर्य्यम्मयिधेहिबलंमसिबलम्मयिधेह्योजोस्योजोमयिधे
हिमन्युरसिमन्युम्मयिधेहिसहोसिसहोमयिधेहि ॥ ९ ॥
याव्याग्घ्रम् ॥ याव्याग्घ्रंविषूचिकोभौवृकंज्वरक्षंति ॥ श्येन
म्पतत्रिणंऽसिऽहऽसेमम्पात्त्वऽहंसः ॥ १० ॥ यदापि
पेष । मातरम्पुत्रःप्रमुदितोधयन् ॥ एतत्तदग्नेऽअनृणोभवा

१ अत्र "परं तु रेफहकाराभ्याम्" (शु. य. प्रा. अ. सू.) इत्यनेन यकारस्य द्वित्वम् । एवं वीर्य्यमसि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यहंतौपितरौमया ॥ सम्पृचंस्थसम्मांभद्रेणंपृङ्क्ष्विपृचंस्थ
विमांपाप्मनांपृङ्क्ष ॥ ११ ॥ [११-१] देवायज्ञम् ॥ देवाय
ज्ञमंतन्वतभेषजम्भिषजाश्विना ॥ वाचासरंस्वतीभिषगिन्द्रा
येन्द्रियाणिदधंतः ॥ १२ ॥ दीक्षायैरूपम् ॥ दीक्षायैरूपꣳश
प्पांणिप्रायणीयंस्यतोक्ष्मांनि ॥ क्रयस्यंरूपꣳसोमंस्यलाजाः
सोमाꣳशवोमधुं ॥ १३ ॥ आतिथ्यरूपम्मासंरम् ॥ आति
थ्यरूपम्मासंरम्महावीरस्यंनग्नहुः ॥ रूपमुपसदांमेतत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रोरात्रीꣳसुरासुता ॥ १४ ॥ सोमस्यरूपम् ॥ सोमस्यरूप
ङ्क्रीतस्यपरिस्रुत्परिषिच्यते ॥ अश्विभ्यान्दुग्धम्भेषजमि
न्द्रायैन्द्रꣳसरस्वत्या ॥ १५ ॥ आसन्दीरूपम् ॥ आसन्दी
रूपꣳराजासन्द्यैवेद्यैकुम्भीसुराधानी ॥ अन्तरऽउत्तरवेद्यारू
पङ्गारोतुरोभिषक् ॥ १६ ॥ वेद्यावेदिः ॥ वेद्यावेदिꣳसमा
प्यतेबर्हिषाबर्हिरिन्द्रियम् ॥ यूपेनयूपऽआप्यतेप्रणीतोऽ
अग्निरग्निना ॥ १७ ॥ हविर्द्धानँऽयत् ॥ हविर्द्धानँऽयद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्विनाग्नीद्रुँ्यत्त्सरस्वती ॥ इन्द्रायैन्द्रꣳसदस्कृतम्पत्क्रीशा
लुङ्गार्हपत्त्यꣳ ॥ १८ ॥ प्रैषेभिः प्प्रैषान् ॥ प्रैषेभिः प्प्रैषा
नाप्नोत्त्याप्रीभिराप्रीर्य्यज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्
कारेभिराहुतीꣳ ॥ १९ ॥ पशुभिः पशून् ॥ पशुभिः पशूनां
प्नोतिपुरोडाशैर्हवीꣳष्या ॥ छन्दोभिꣳसामिधेनीर्य्या
ज्याभिर्व्वषट्कारान् ॥ २० ॥ धानाः करम्भः । सक्तवꣳपरी

१ पुरः दाशैः इति पदम् । अत्र "पुरोदाशे" (शु. य. प्रा. ३ अ. ४४ सू.) इत्यनेन पुरशब्दघटितविसर्गस्य उकारे दाशशब्दघटितस्य दकारस्य मूर्धन्ये डकारे "उवर्ण ओकारम्" (शु. य. प्रा. ४ अ. ५४ सू.) इत्यनेन कंठ्यादकारादुत्तरे उवर्णे उभयो रकारोकारयोरोकारे पुरोडाशैः इति पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वापः पयोदधि ॥ सोमस्यरूपꣳ हविषऽआमिक्षा वाजिनम्म
धु ॥ २१ ॥ धानानाꣳरूपम् ॥ धानानाꣳरूपङ्वलम्परी
वापस्यगोधूमाः ॥ सक्तूनाꣳरूपम्बदरमुपवाकाःकरम्भस्य
॥ २२ ॥ पयसोरूपम् ॥ पयसोरूपँ ऽस्यद्यवादुध्नोरूपङ्कर्कन्धू
नि ॥ सोमस्यरूपंवाजिनꣳसौम्यस्यरूपमामिक्षा ॥ २३ ॥
आश्रावय ॥ आश्रावयेतिस्तोत्रियाःप्रत्याश्रावोऽअनु
रूपः ॥ यजेतिधाऽयारूपम्प्रगाथायैयजामहाः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्द्धऽऋचैरुक्थानाम् ॥ अर्द्धऽऋचैरुक्थानाꣳरूपम्पदैराप्नोतिनिविदः ॥ प्रणवैःशस्त्राणाꣳरूपम्पयसासोमऽआप्यते ॥ २५ ॥ अश्विभ्याम्प्रातःसवनम् ॥ अश्विभ्याम्प्रातःसवनमिन्द्रेणैन्द्रम्माध्यन्दिनम् ॥ वैश्वदेवꣳसरस्वत्यातृतीयमाप्तꣳसवनम् ॥ २६ ॥ वायव्यैर्वायव्यानि ॥ वायव्यैर्वायव्यान्याप्नोतिसतेनद्रोणकलशम् ॥ कुम्भीभ्यामम्भृणौसुतेस्थालीभिस्थालीराप्नोति ॥ २७ ॥ यजुर्भिराप्यन्ते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजुर्भिराप्प्यन्तेग्रहाग्रहैस्त्तोमांश्चविष्टुतीः ॥ छन्दोभिरुक्थाशस्त्राणिसाम्नांवभृथऽआप्प्यते ॥ २८ ॥ इडाभिर्भक्षान् ॥ इडाभिर्भक्षानाप्नोतिसूक्तवाकेनाशिषः ॥ शुँस्युनांपत्क्रीसँय्याजान्त्संमिष्टयजुषांसꣳस्त्थाम् ॥ २९ ॥ व्रतेनदीक्षाम् ॥ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्त्यमाप्प्यते ॥ ३० ॥ एतावं

---

१ पत्क्री संय्याजान् । अत्र "भाविभ्यः सः पं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन प्राप्तस्य षस्य "अनुसन्तनोतु°" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषेधे न षत्वम् । ततः "अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम् । (शु. य. प्रा. ४ अ. १० सू.) इत्यनेन समः मकारस्य अन्तस्थे याजान्पदे अन्तस्थामनुनासिकामापद्यते । इति पस्य यकारे अनुनासिके रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रूपम् ॥ एतावद्रूपँय्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ तदेतत्सर्व्वमाप्नोतियज्ञेसौत्रामणीसुते ॥ ३१ ॥ [२०-२] सुरावन्तम्बर्हिषदम् ॥ सुरावन्तम्बर्हिषदꣳसुवीरँय्यज्ञꣳहिन्वन्तिमहिषानमोभिः ॥ दधानाꣳसोमन्दिविदेवतासुमदेमेन्द्रँय्यजमानाꣳस्वर्क्काः ॥ ३२ ॥ यस्त्ते ॥ यस्त्तेरसꣳसम्भृतऽओषधीषुसोमस्यशुष्मꣳसुरयासुतस्य ॥ तेनजिन्वयजमानम्मदेनसरस्वतीमश्विनाविन्द्रमग्निम् ॥ ३३ ॥ यमश्विना ॥ यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्विनानमुंचेरासुरादधिसरंस्वुत्त्यसुंनोदिन्द्रियाय ॥ इमन्तꣳ
शुक्रम्मधुंमन्तमिन्दुꣳसोमꣳराजानमिहभंक्षयामि ॥ ३४ ॥
यदत्र । रिप्तꣳरसिनं÷सुतस्ययदिन्द्रोऽअपिंबच्छचींभिः ॥
अहन्तदंस्युमनंसाशिवेनसोमꣳराजानमिहभंक्षयामि ॥ ३५ ॥
पितृब्भ्यं÷स्वधायिब्भ्यं÷ । स्वधानमं÷पितामहेब्भ्यं÷स्वधा
यिब्भ्यं÷स्वधानमः÷प्रपितामहेब्भ्यः÷स्वधायिब्भ्यं÷स्वधान
मं÷ ॥ अक्षंन्पितरोमीमदन्तपितरोतीतृपन्तपितरः÷पितरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुन्धध्वम् ॥ ३६ ॥ पुनन्तुमा । पितरः सोम्यासः पुनन्तु
मापितामहाः पुनन्तुप्रपितामहाः ॥ पवित्रेणशतायुषा ॥
पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥ पवित्रेणशतायु
षाविश्वमायुर्व्यश्नवै ॥ ३७ ॥ अग्नऽआयूꣳषि । पवसऽ
आसुवोर्जमिषञ्चनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ३८ ॥
पुनन्तुमा । देवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुविश्वा
भूतानिजातवेदःपुनीहिमा ॥ ३९ ॥ पवित्रेणपुनीहि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतुँ१॥ऽरनु ॥ ४० ॥
यत्ते । पवित्रमर्चिष्यग्नेवितंतमन्तरा ॥ ब्रह्मतेनपुनातुमा
॥ ४१ ॥ पवमानःसः ॥ पवमानःसोऽअद्यनः÷पवित्रेण
विचर्षणिः ॥ यःपोतासपुनातुमा ॥ ४२ ॥ उभाभ्यान्देव ।
सवितःपवित्रेणसवेनच ॥ माम्पुनीहिविश्वतः÷ ॥ ४३ ॥
वैश्वदेवीपुनती । देव्यागाद्यस्यामिमाबह्वयस्तन्वोवीतपृष्ठाः॥
तयामदन्तःसधमादेषुवयꣳस्यामपतयोरयीणाम् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येसंमाना: । समंनसःपितरोयमराज्ये ॥ तेषाँल्लोकःस्वधा
नमोयज्ञोदेवेषुकल्पताम् ॥ ४५ ॥ येसंमाना: । समंनसो
जीवाजीवेषुमामकाः ॥ तेषाꣳश्रीर्म्मयिकल्पतामस्मिँल्लो
केशतꣳसमाः ॥ ४६ ॥ द्वेसृती ॥ द्वेसृतीऽअंशृणवम्पित
णामहन्देवानामुतमर्त्यानाम् ॥ ताभ्यांमिदंविश्वमेजत्समे
तियदंन्तरापितरंम्मातरंञ्च ॥ ४७ ॥ इदꣳहविः ॥ इदꣳह
विःप्रजनंनम्मेऽअस्तुदशंवीरꣳसर्व्वंगणꣳस्वस्तये ॥ आत्कम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनिंप्प्रजासनिंपशुसनिंलोकसन्त्यंभयसनिं ॥ अग्निः प्प्रजाम्बं
हुलाम्मेंकरोत्त्वन्नम्पयोरेतोंऽअस्म्मासुंधत्त ॥४८॥ [१७-३]
उदीरताम् ॥ उदीरतामवरऽउत्त्परांसऽउन्मंद्युमाः पितरं÷सो
म्म्यासं÷ ॥ असुँऽयऽईयुरंवृकाऽऋतुज्ञास्त्तेनोंवन्तुपितरोह
वेषु ॥ ४९ ॥ अङ्गिरसोनः । पितरोनवंग्ग्वाऽअथर्वाणोभृगं
वः सोम्म्यासं÷ ॥ तेषांवयꣳसुमतौयज्ञियानामपिंभद्रेसौमन

१-२ प्रजासनि पशुसनि "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षकारप्राप्तौ "अनुसन्तनोतु०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन निषिद्ध्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेस्याम ॥ ५० ॥ येन ॥ येनः पूर्व्वेपितरः सोम्यासोनूहि
रेसोमपीथंव्वसिष्ठाः ॥ तेभिर्य्यमः संरराणोहवीꣳष्युशन्नु
शद्भिः प्रतिकाममत्तु ॥ ५१ ॥ त्वꣳसोम ॥ त्वꣳसोमप्र
चिकितोमनीषात्त्वꣳरजिष्ठमनुनेषिपन्थाम् ॥ तवप्रणीती
पितरोनऽइन्दोदेवेषुरत्नमभजन्तधीराः ॥ ५२ ॥ त्वयाहि ॥
त्वयाहिनः पितरः सोमपूर्व्वेकर्म्माणिचक्रुः पवमानधीराः ॥
व्वन्वन्नवातःपरिधीँ१॥रपोर्ण्णुव्वीरेभिरश्वैर्म्मघवाभवानः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५३ ॥ त्वꣳसोम । पितृभिः संविदानोनुद्यावापृथिवीऽ
आततन्थ ॥ तस्मैतऽइन्दोहविषाविधेमवयꣳस्यामपतयो
रयीणाम् ॥ ५४ ॥ बर्हिषदꣳपितरꣳ ॥ बर्हिषदꣳपितरऽऊत्त्य
र्वागिमावोहुव्याचकृमाजुषद्ध्वम् ॥ तऽआगतावसाशन्तमेना
थानꣳशँय्योरपोदधात ॥ ५५ ॥ आहम् ॥ आहम्पितृन्त्सु
विदत्राँ२॥ऽअवित्सिनपातञ्चविक्रमणञ्चविष्णोः ॥ बर्हिष
दोयेस्वधयासुतस्यभजन्तपित्त्वस्तऽइहागमिष्ठाः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपहूताः पितरः । सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ॥
तऽआगमन्तु तऽइह श्रुवन्त्वधि ब्रुवन्तु ते वन्त्वस्मान् ॥ ५७ ॥
आयन्तु । नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्नद्य ज्ञे स्वधया मदन्तोधि ब्रुवन्तु ते वन्त्वस्मान्
॥ ५८ ॥ अग्निष्वात्ताः पितरः ॥ अग्निष्वात्ताः पितरऽ
एहगच्छत सदः सदः सदत सुप्रणीतयः ॥ अत्ता हवीꣳषि
प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरन्दधातन ॥ ५९ ॥ येऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निष्ष्वात्ताः ॥ येऽअग्निष्ष्वात्तायेऽअनग्निष्ष्वात्ताम
द्यौर्दिवःस्वधयामादयन्ते ॥ तेभ्यः स्वराडसुनीतिमेताँ यं
थावशन्तन्वङ्कल्पयाति ॥ ६० ॥ अग्निष्ष्वात्तानृतुम
तः ॥ अग्निष्ष्वात्तानृतुमतोहवामहेनाराशꣳसेसोमपीथँ
यऽआशुः ॥ तेनोविष्प्रासꣳसुहवाभवन्तुवयꣳस्यामपतयो
रयीणाम् ॥ ६१ ॥ [१३-४] आञ्ज्याजानु । दक्षिण
तोनिषद्येमँयज्ञमभिगृणीतविश्वे ॥ माहिꣳसिष्टपितरꣳकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिन्नोयद्वडआगं÷पुरुषताकरांम ॥ ६२ ॥ आसींनासोऽअरु
णीनांम् ॥ आसींनासोऽअरुणीनांमुपस्त्थेरयिन्धत्तदाशुषेम
र्त्यांय ॥ पुत्रेब्भ्यं÷पितरस्तस्यवस्वꣳप्रयच्छतुतऽइहोर्ज्जन्द
धात ॥ ६३ ॥ यमंग्ने । कव्यवाहनत्त्वञ्चिन्मन्यंसेरयिम् ॥
तन्नोंगीर्ब्भिश्श्रवाय्यंन्देवत्रापंनयायुजंम् ॥ ६४ ॥ योऽअ
ग्निश्। कंव्यवाहंनꣳपितृन्यक्षंदृतावृधं÷ ॥ प्रेदुंहव्यानिंवोच
तिदेवेब्भ्यंश्चपितृब्भ्यऽआ ॥ ६५ ॥ त्वमंग्ने ॥ त्वमंग्नऽई

१ पनय युजम् इति पदम्। अत्र "अथोदारिथपनय०" (शु. य. प्रा. ३ अ. ११३ सू.) इत्यनेन सूत्रोक्तपदानां यकारे परे दीर्घो विधीयते। तेन पनयायुजम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी ॥ प्रादाः पितृ
भ्यः स्वधया ते अक्षन्नद्धि त्वन्देवप्रयता हवीꣳषि ॥ ६६ ॥
ये चं ॥ ये चेह पितरो ये च नेह याँश्च विद्म याँ२॥ऽउ च न प्र वि
द्म ॥ त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व
॥६७॥ इदम्पितृभ्यः ॥ इदम्पितृभ्यो नमोऽअस्त्वद्य ये पूर्वासो
यऽउपरासऽईयुः ॥ ये पार्थिवे रजस्यानिषत्ता ये वा नूनꣳ सुवृ
जनासु विक्षु ॥६८॥ अधा यथा । नः पितरः परासः प्रत्कासोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नऽऋतमाशुषाणा॒ ॥ शुचीद॑यन्दीधि॑तिमुक्थशा॒सꣳक्षामा॑
भिन्दन्तो॑ऽअरुणीरप॑व्रन् ॥ ६९॥ उशन्तस्त्वा ॥ उशन्तस्त्वा
निधी॑महयुशन्तꣳसमि॑धीमहि ॥ उशन्नु॑शतऽआव॑हपितॄ॒न्हवि
षे॒ऽअत्त॑वे ॥ ७० ॥ अपाम्फेने॑न ॥ अपाम्फेने॑नुनमु॑चेꣳशिरं॑ऽ
इन्द्रोद॑वर्त्तयꣳ ॥ विश्वा॒यदज॑यस्पृधः॑ ॥ ७१ ॥ [१०-५]
सोमो॒राजा॑ ॥ सोमो॒राजा॒मृतꣳसुतऽऋ॑जीषेणा॑जहान्मृ॒त्युम् ॥

॥२१४॥

---

१ पितृ॒ह्वविषे । अत्र पितृन् पदस्य नस्य "ऋषरेभ्यः" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे विधीयमानं णत्वं प्राप्तम् । परञ्च "प्रकृत्या पदान्तीयः" (शु. य. प्रा. ३ अ. ९० सू.) इत्यनेन पदान्तीयस्य नकारस्य णत्वं नोपपद्यते । इति निषेधान्न णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिद
म्पयोमृतम्मधु ॥ ७२ ॥ अद्भ्यः क्षीरम् ॥ अद्भ्यः क्षीरंघ्यं
पिबत्कुङ्गाङ्गिरसोधिया ॥ ऋतेनसत्त्यमिन्द्रियंविपानꣳ
शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७३ ॥ सो
मम्मद्भ्यः ॥ सोममद्भ्योघ्यंपिबच्छन्दसाहंसःशुचिषत् ॥
ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमि
दम्पयोमृतम्मधु ॥ ७४ ॥ शतम् ॥ ११०० ॥ अन्नात्परिस्रु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं ॥ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्र
जापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस ऽइन्द्र
स्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७५ ॥ रेतो मूत्रम् ॥ रेतो मूत्रं
विजहाति योनिम्प्रविशदिन्द्रियम् ॥ गर्भो जरायुणावृत ऽउ
ल्बꣳ जहाति जन्मना ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रम
न्धस ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७६ ॥ द्रष्ट्वा रूपे।
व्याकरोत्सत्यानृते प्रजापतिः ॥ अश्रद्धामनृते दधाच्छ्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धा७ंसुत्त्येप्प्रजापतिः॥ ऋतेनंसुत्त्यमिंन्द्रियंव्विपानंꣳशुक्क्रम
न्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७७ ॥ व्वेदेंनरू
पे । ध्यंपिबत्त्सुतासुतौप्प्रजापतिः ॥ ऋतेनंसुत्त्यमिंन्द्रियंव्वि
पानंꣳशुक्क्रमन्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं॥७८॥
दृष्ट्वापरिंतंस्रुतं÷ ॥ दृष्ट्वापरितंस्रुतोरसंꣳशुक्क्रेणंशुक्क्रंध्यंपिबु
त्त्पयःसोमंम्प्रजापतिः॥ ऋतेनंसुत्त्यमिंन्द्रियंव्विपानंꣳशुक्क्रम
न्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७९ ॥ [८-६]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीसेनतन्त्रम् ॥ [1]सीसेनतन्त्रम्मनसामनीषिणऽऊर्ण्णासूत्रेणकु
वयोव्वयन्ति ॥ अश्विनायज्ञꣳसवितासरस्वतीन्द्रस्यरूपंवरुणो
भिषज्यन् ॥ ८० ॥ तदस्य । रूपममृतꣳशचीभिस्तिस्रोद
धुर्द्देवताꣳसꣳरराणाः ॥ लोमानिशष्पैर्ब्बहुधानतोक्मभि
स्त्वगस्यमाꣳसमभवन्नलाजाः ॥ ८१ ॥ तदश्विना । भिष
जारुद्रवर्त्तनीसरस्वतीव्वयतिपेशोऽअन्तरम् ॥ अस्थिमज्जान

१ सीसेन तत्रम् । अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वापत्तौ "अनुसन्तनोतु°" । (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन निषिध्यते । अतो न षकार इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्मासंरैंकारोतुरेणुदधंतोगवांन्त्वुचि ॥ ८२ ॥ सरंस्वतीम
नंसा । पेशुलंब्वसुनासंत्त्याब्भ्यांव्वयतिदर्शतंव्वपुं÷ ॥ रसंम्प
रिस्रुतानरोहितन्नुग्नहुर्द्धीरस्तसंरन्नवेमं ॥ ८३ ॥ पयंसाशुक्क्र
म् ॥ पयंसाशुक्क्रमुमृतंञ्जनित्रुहुसुरंयामूत्रांज्जनयन्तुरेतं÷ ॥
अपामंतिन्दुर्म्मतिम्बाधंमानाऽऊवंध्यंव्वातंꣳसुर्व्वन्तदुरात्
॥ ८४ ॥ इन्द्रं÷सुत्रामां ॥ इन्द्रं÷सुत्रामाहृदंयेनसत्त्यम्पुंरो
डाशेंनसवितांजंजान ॥ यकृंत्क्लोमानंव्वरुणोभिषज्यन्नमतंस्न्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायुर्घ्यैर्न्नमिनातिपित्तम् ॥ ८५ ॥ आन्त्राणिस्थाली? ॥ आन्त्रा
णिस्थालीर्म्मधुपिन्वमानागुदाःपात्राणिसुदुघानधेनु? ॥ श्ये
नस्यपत्रन्नप्लीहाशचींभिरासुन्दीनाभिरुदरन्नमाता ॥८६॥ कु
म्भोवंनिष्ठु? ॥ कुम्भोवंनिष्ठुर्ज्जनिताशचींभिर्य्यस्मिन्नग्नेयो
न्याङ्गब्भौऽअन्त? ॥ प्लाशिर्व्यक्तःशतधारऽउत्सोदुहेनकु
म्भीस्वधाम्पितृब्भ्यः ॥८७॥ मुखꣳसत् ॥ मुखꣳसदस्यशिरऽ
इत्सतेनजिह्वापवित्रंमश्विनासन्त्सरस्वती ॥ चप्पन्नपायुर्ब्भि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षगंस्यव्वालोंव्वस्त्तिर्न्नशोपोहरंसातरस्वी ॥ ८८ ॥ अश्विब्भ्या
ञ्चक्षुः ॥ अश्विब्भ्याञ्चक्षुरमृतङ्ग्रहांब्भ्याञ्छागेंनतेजोंहविषांशृतेनं ॥ पक्ष्मांणिगोधूमैंकुवंलैरुतानिपेशोनशुक्क्रमसितं
व्वसाते ॥ ८९ ॥ अविर्न्न । मेषोनसिव्वीर्य्यायप्प्राणस्यपन्थांऽ
अमृतोग्ग्रहांब्भ्याम् ॥ सरंस्वत्त्युपवाकैर्व्यानन्नस्यांनिबर्हिर्ब्ब
दंरैर्ज्जजान ॥ ९० ॥ इन्द्रंस्यरूपम् ॥ इन्द्रंस्यरूपमृषभोब
लांयकर्णांब्भ्याꣳश्रोत्रंममृतङ्ग्रहांब्भ्याम् ॥ यवानबर्हिर्ब्भ्रु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकेसंराणिकुर्क्कन्धुंजज्ञेमधुंसारघम्मुखात् ॥ ९१ ॥ आत्क्म
न्नुपस्त्थे ॥ आत्क्मन्नुपस्त्थेनवृकस्युलोमुमुखेश्म्मश्श्रूणिन
व्यांग्घ्रलोम ॥ केशानशीर्षन्यशंसेश्रियैशिखांसिद्दहस्युलोमु
त्त्विषिंरिन्द्रियाणिं ॥ ९२ ॥ अङ्गांन्यात्क्मन् ॥ अङ्गांन्या
त्क्मन्भिषजातदुश्विनात्क्मानुमङ्गैंसमंधात्त्सरंस्वती ॥ इन्द्रं
स्यरूपꣳशतमांनुमायुंश्चन्द्रेणुज्योतिंरमृतुन्दधांनाः ॥ ९३ ॥
सरंस्वतीयोन्यांम् ॥ सरंस्वतीयोन्याङ्गर्भमुन्तरश्विभ्याम्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्क्रीसुकृतम्बिभर्त्ति ॥ अपा॑ँरसेनुव्वरुणोनसाम्नेन्द्रँश्रियै
जनयन्नप्सुराजा ॥ ९४ ॥ तेजः॑ पशूनाम् ॥ तेजः॑ पशू
नाँहविरिन्द्रियावत्पारिस्रुतापयसासारघम्मधुं ॥ अश्वि
भ्यान्दुग्धम्भिषजासरस्वत्यासुतासुताभ्यांमृतꣳसोमऽइ
न्दुः॑ ॥ ९५ ॥ [१६-७] इतिश्रीवाजसनेयसंहितायामेकोन
विंशतितमोऽध्यायः ॥ १९ ॥ श्रीवेदपुरुषायनमः ॥ अनु

१ अपाँरसेन । अत्र "ऋषरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन विधीयमानं "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेन एतैर्व्यवधानेऽप्यत्र णत्वं सकारस्य तदतिरिक्तवर्णस्य व्यवधानेनाप्राप्तमपि "शिलिसिमध्य०" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन णत्वमेतेषु व्यवहितेषु निषिद्ध्यते तच्छिष्यबुद्धिव्युत्पत्त्यर्थम् । स्वरयवहकपातिरिक्तवर्णव्यवधाने ऋषरेभ्यो णत्वप्राप्त्यभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाकसूत्रम् ॥ क्षत्रस्ययोनिस्त्रयोदश, यद्देवादशा, भ्यादधा
म्यष्टौ, योभूतानाञ्चतस्रः, समिद्धऽइन्द्रऽएकादश, ऽआया
त्वष्टौ, समिद्धोऽअग्निर्द्वादशा, श्विनाहविस्त्रयोदशा, श्विना
तेजसैकादश, नव नवतिः ॥ [अ. २० मं. ९० अ. ९]
हरिः ॐ ॥ क्षत्रस्ययोनिः ॥ क्षत्रस्ययोनिरसिक्षत्रस्यनाभि
रसि ॥ मात्त्वाहिꣳसीन्मामाहिꣳसीः ॥ १ ॥ निषसाद ।
धृतव्रतोवरुणःपस्त्यास्वा ॥ साम्राज्यायसुक्रतुः ॥ मृत्योः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पांहिविद्योत्पांहि ॥ २ ॥ देवस्यंत्त्वा । सवितुःप्प्रंसवेश्विनों
र्बाहुब्भ्यांम्पूष्णोहस्तांब्भ्याम् ॥ अश्विनोब्भैषंज्येनतेजंसे
ब्रह्मवर्च्चसायाभिषिंञ्चामिसरंस्वत्त्यैभैषंज्येनवीर्य्यायान्नाद्यां
याभिषिंञ्चामीन्द्रंस्येन्द्रियेणबलांयश्रियैयशंसेभिषिंञ्चामि
॥ ३ ॥ कोंसि । कतमोसिकस्म्मैत्त्वाकायंत्त्वा ॥ सुश्लोंकु
सुमंङ्गलुसत्त्यंराजन् ॥ ४ ॥ शिरोंमे ॥ शिरोंमेश्रीर्य्यशोमु
खन्त्विषिंकेशांश्चश्म्मश्रूंणि ॥ राजांमेप्प्राणोऽअमृतंꣳसम्म्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ट्चक्षुर्विराट्श्रोत्रम् ॥ ५ ॥ जिह्वामे । भद्रंवाङ्महोमनोम्
न्यु३स्वराट्भामं÷ ॥ मोदाःप्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मे
सहः÷ ॥ ६ ॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मं
वीर्य्यम् ॥ आत्क्माक्षत्रमुरोममः ॥ ७ ॥ पृष्टीम्मे । राष्ट्रमु
दरमꣳसौग्रीवाश्चश्रोणी । ऊरूऽअरत्क्नीजानुनीविशोमेङ्गा
निसर्व्वतः÷ ॥ ८ ॥ नाभिम्मे । चित्तंविज्ञानम्पायुर्म्मेपचिति
र्भसत् ॥ आनन्दुनन्दावाण्डौमेभगꣳसौभाग्यम्पसः÷ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मिद्विशिराजाप्प्रतिष्ठितः ॥ ९ ॥
प्रतिक्षत्रे । प्प्रतितिष्ठामिराष्ट्रेप्प्रत्यश्वेषुप्प्रतितिष्ठामिगोषु ॥
प्रत्यङ्गेषुप्प्रतितिष्ठाम्यात्कमन्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टे
प्प्रतिद्यावापृथिव्योः प्प्रतितिष्ठामियज्ञे ॥ १० ॥ त्रयादेवाः ॥
त्रयादेवाऽएकादशत्रयस्त्रिंशाः सुराधसः ॥ बृहस्पतिपुरोहि
तादेवस्यसवितुः सवे ॥ देवादेवैरवन्तुमा ॥ ११ ॥ प्रथमाद्वि
तीयैः ॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाःसत्त्येनस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्यँऽयुज्ञेनयुज्ञोयजुर्ब्भिर्ऽयजूँषिसामभिः सामान्यृग्भिर्ऋ
चं÷पुरोनुवाक्याभिःपुरोनुवाक्यायाज्याभिर्ऽयाज्याव्वषट्कारै
र्व्वषट्कारा ऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूः स्वा
हा ॥ १२ ॥ लोमानिप्प्रयंतिः ॥ लोमानिप्प्रयंतिर्म्ममुत्त्वङ्मुऽ
आनंतिरागंतिः ॥ माँसम्मुऽउपंनतिर्व्वस्वस्थिमज्जामुऽआ
नंतिः ॥ १३ ॥ [१३-१] यद्देवाः ॥ यद्देवादेवहेडंनुन्देवां

१ पुरोनुवाक्याभिः । अत्र समानपदे "ऋषरेभ्यो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन णत्वप्राप्तौ "इन्द्राग्नी चित्रमान्ते°" (शु. य. प्रा. ३ अ. ९३ सू.) इत्यनेन निषेधान्न णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सश्चकृमाव्वयम् अग्निर्म्मातस्म्मादेनंसोविश्वान्मुञ्चत्त्वꣳहं
सꣳ ॥ १४ ॥ यदिदिवा ॥ यदिदिवायदिनक्तमेनांꣳसिचकृ
माव्वयम् ॥ व्वायुर्म्मातस्म्मादेनंसोविश्वान्मुञ्चत्त्वꣳहंसꣳ
॥ १५ ॥ यदिजाग्रत् ॥ यदिजाग्रद्यदिस्वप्नꣳएनांꣳ
सिचकृमाव्वयम् ॥ सूर्य्योमातस्म्मादेनंसोविश्वान्मुञ्चत्त्वꣳ
हंसꣳ ॥ १६ ॥ यद्ग्रामे ॥ यद्ग्रामेयदरण्येयत्त्सभायाँ
ऽयदिन्द्रिये ॥ यच्छूद्रेयदर्य्येयदेनंश्चकृमाव्वयँऽयदेकस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिधर्म्मणितस्यावयजनमसि ॥ १७ ॥ यदापः ॥ यदा
पोऽअग्ध्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च ॥ अव
भृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमेनोय
क्ष्यवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ॥ १८ ॥ समु
द्रेते ॥ समुद्रेतेहृदयमप्स्वन्तःसन्त्वाविशन्त्वोषधीरुतापः ॥
सुमित्रियानऽआपऽओषधयः सन्तुदुर्म्मित्रियास्तस्मैस
न्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ १९ ॥ द्रुपदादिवमुमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चानः । स्विन्नःस्नातोमलादिव ॥ पूतम्पवित्रेणेवाज्यमापः
शुन्धन्तुमैनसः ॥ २० ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः
पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम्
॥ २१ ॥ अपोऽअद्य ॥ अपोऽअद्यान्वचारिषꣳरसेनसमसृ
क्ष्महि ॥ पयस्वानग्नऽआगमन्तम्मासꣳसृजवर्च्चसाप्रजया
चधनेनच ॥ २२ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसि
तेजोसितेजोमयिधेहि ॥ समावर्त्तिपृथिवीसमुषाःसमुसू

सं. ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्य्यः ॥ समुविश्वमिदञ्जगत् ॥ वैश्वानरज्योतिर्भूयासंविभून्कामान्व्यश्नवैभूः स्वाहा ॥ २३ ॥ [१०-२] ॥ अब्भ्यादधामि । समिधमग्नेव्रतपतेत्त्वयि ॥ व्रतञ्च श्रद्धाञ्चोपैमीन्धेत्त्वादीक्षितोऽअहम् ॥ २४ ॥ यत्र ब्रह्म । चक्षुत्रञ्च सम्म्यञ्चौचरतः सह ॥ तँल्लोकम्पुण्यम्प्रज्ञेषँ यत्र देवाः सहाग्निना ॥ २५ ॥ यत्रेन्द्रः ॥ यत्रेन्द्रश्च वायुश्च सम्म्यञ्चौचरतः सह ॥ तँल्लोकम्पुण्यम्प्रज्ञेषँ यत्र सेदिर्न्न विद्यते ॥ २६ ॥ अद्भुशुना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ॥ अद्दशुनांतेऽअद्दशुः पृंच्यतांम्परुषापरुः ॥ गन्धस्त्तेसो
मंमवतुमदांयरसोऽअच्युतः ॥ २७ ॥ सिञ्चन्तिपारिं । षिञ्च
न्त्युर्त्तिसञ्चन्तिपुनन्तिंच ॥ सुरांयैबुब्भ्रवैमदेंकिन्त्वोवंदतिकि
न्त्वः ॥ २८ ॥ धानावंन्तङ्करम्भिणंम् ॥ धानावंन्तङ्करम्भि
णंमपूपवंन्तमुक्थिनंम् ॥ इन्द्रंप्रातर्जुषस्वनः ॥ २९ ॥ बृह
दिन्द्रांय । गायतमरुंतोवृत्रहन्तंमम् ॥ येनुज्योतिरजंनयन्नृ
तावृधोंदेवन्देवायुजागृंवि ॥ ३० ॥ अद्धंर्य्योऽअद्रिंभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतꣳसोमंम्पवित्रऽआनय ॥ पुनाहीन्द्रायपातवे ॥ ३१ ॥
[८-३] योभूतानाम् ॥ योभूतानामधिपतिर्य्यस्मिँल्लोकाऽ
अधिश्रिताः ॥ यऽईशेमहतोमहाँस्तेनगृह्णामित्त्वामहम्म
यिगृह्णामित्त्वामहम् ॥ ३२ ॥ उपयामगृहीतोसि ॥ उपयाम
गृहीतोस्यश्विभ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्णऽएष
तेयोनिरश्विभ्यान्त्वासरस्वत्यैत्त्वेन्द्रायत्त्वासुत्राम्णे ॥ ३३ ॥
प्राणपामे ॥ प्राणपामेऽअपानपाश्चक्षुष्पाःश्रोत्रपाश्चमे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्वाचोमेंविश्वभेषजोमनंसोसिव्विलायंकः ॥ ३४ ॥ अश्विनं
कृतस्यते ॥ अश्विनंकृतस्यतेसरंस्वतिकृतस्येन्द्रेंणसुत्राम्म्णांकृ
तस्यं ॥ उपंहूतऽउपंहूतस्यभक्षयामि ॥ ३५ ॥ [४-४]
समिंद्धऽइन्द्रं ॥ समिंद्धऽइंन्द्रंऽउषसामनींकेपुरोरुचांपूर्व्वकृ
द्वांवृधानः ॥ त्रिभिर्द्देवैस्त्रिंदशाव्वज्रंबाहुर्ज्जघानंव्वृत्रंव्विदु
रोंव्ववार ॥३६॥ नराशꣳसंप्प्रतिं ॥ नराशꣳसंप्प्रतिशूरोमि

१ इन्द्रऽउषसा । अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेनास्मिन्परिगणितेभ्यः परेभ्य एव उषशब्दाकारस्य दीर्घविधानान्नात्र दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानुस्तनूनपात्प्रतियज्ञस्यधामं ॥ गोभिर्वपावान्मधुनासमु
ञ्जन्हिरण्यैश्चन्द्रीयंजतिप्प्रचेताः ॥ ३७ ॥ ईडितोदेवैः ॥
ईडितोदेवैर्हरिवाँ२॥ऽअभिष्टिराजुह्वानोहविषाशर्द्धमानः ॥
पुरन्दुरोगोत्रभिद्वज्रबाहुरायातुयज्ञमुपनोजुषाणः ॥ ३८ ॥
जुषाणोबर्हिः ॥ जुषाणोबर्हिर्हरिवान्नऽइन्द्र÷प्राचीनꣳसीद
त्प्रदिशापृथिव्याः ॥ उरुप्रथाःप्रथमानꣳस्योनमादित्यैर
क्तंवसुभिःसजोषाः ॥ ३९ ॥ इन्द्रन्दुर÷ । कवुष्ष्योधावमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाव्वृषाणँय्यन्तुजनयꣳसुपत्नीꣳ ॥ द्वारोदेवीरभितोविश्रयन्ताꣳसुवीरावीरम्प्रथमानामहोभिः ॥ ४० ॥ उषासानक्ता । बृहतीबृहन्तम्पयस्वतीसुदुघेशूरभिन्द्रम् ॥ तन्तुन्ततम्पेशसा संवयन्तीदेवानान्देवँय्यजतꣳसुरुक्मे ॥ ४१ ॥ दैव्यामिमानामनुषꣳपुरुत्राहोतारविन्द्रम्प्रथमासुवाचा ॥ मूर्द्धन्यज्ञस्यमधुनादधानाप्प्राचीनज्योतिर्हविषावृधा

१ प्रथमानामहोभिः उषासा । अत्र "उषमहोभिः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन उष इत्ययं ह्रस्वो दीर्घमापद्यते महोभिः नक्त इम् इकार-एकारौकारनकारेभ्यः परश्चेत् । तेन महोभिः परस्य उषशब्दाकारस्य दीर्घाकारः । अत्र महोभिःशब्दात्पर उषशब्दो वर्तते । २ प्राचीनज्योतिः । अत्र "स्वर-यवहकपैश्च" इत्यनेनैतैरेवव्यवधाने समानपदे "ऋपरेभ्यो नकारो णकारं समानपदे" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन विधीयमानस्य णत्वस्यात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तꣳ ॥ ४२ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्हविषाव्वर्द्धमानाऽइ
न्द्रञ्जुषाणाजनयोनपत्कीꣳ ॥ अच्छिन्नन्तन्तुम्पयसासरस्व
तीडादेवीभारतीव्विश्वतूर्त्तिꣳ ॥ ४३ ॥ त्वष्टादधत् ॥ त्वष्टाद
धच्छुष्म्मुमिन्द्रायव्वृष्णेपाकोचिष्टुर्य्यशसेपुरूणि ॥ वृषाय
जन्व्वृषणम्भूरिरेतामूर्द्धन्यज्ञस्यसमनक्तुदेवान् ॥ ४४ ॥ व्वन
स्पतिरवसृष्टꣳ ॥ व्वनस्पतिरवसृष्टोनपाशैस्त्मन्यासमञ्ज

व्यवधानोक्तातिरिक्तचवर्गस्य व्यवधानेनाप्राप्तं णत्वं "शिलिसिवर्गमध्यमव्यवहितोऽपि०" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन शकार-लकार-सकार-व्यवहितो मध्यमवर्गैश्चटतवर्गैर्व्यवहित ऋषरेभ्य उत्तरो नकारः प्रकृत्या भवति । इति णकारो निषिद्ध्यते तच्छिष्यबुद्धिव्युत्पत्त्यर्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्छमितानदेवः ॥ इन्द्रस्यहृद्यैर्जठरम्पृणानःस्वदातियज्ञ
म्मधुनाघृतेन ॥ ४५ ॥ स्तोकानामिन्दुम् ॥ स्तोकाना
मिन्दुम्प्रतिशूरऽइन्द्रोवृषायमाणोवृषभस्तुराषाट् ॥ घृतप्पु
षामनसामोदमानाःस्वाहादेवाऽअमृतामादयन्ताम् ॥ ४६ ॥
[११-५] आयातु ॥ आयात्विन्द्रोवसुऽउपनऽइहस्तु
तःसंधुमादस्तुशूरः ॥ वावृधानस्तविषीर्यस्यपूर्वीद्यौर्न
क्षत्रमभिभूतिपुष्यात् ॥ ४७ ॥ आनः ॥ आनऽइन्द्रो

१ वृषायमाणः । अत्र यकारे परे वृषशब्दाकारस्य "श्रथोदारिथ" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरादानऽआसादभिष्टिकृदवसेयासदुग्रः ॥ ओजिष्ठेभिर्नृपति
र्वज्रबाहुःसङ्गेसमत्सुतुर्वणिः पृतन्यून् ॥ ४८ ॥ आनः ॥
आनऽइन्द्रोहरिभिर्याह्यर्वाक्छावाचीनोवसेराधसेच ॥ तिष्ठा
तिवज्रीमघवाविरप्शीमँश्युज्ञमनुनोवाजसातौ ॥ ४९ ॥
त्रातारमिन्द्रम् ॥ त्रातारमिन्द्रमवितारमिन्द्रहवेहवेसुहवꣳ
शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवा
धात्विन्द्रः ॥ ५० ॥ इन्द्रः सुत्रामा ॥ इन्द्रः सुत्रामास्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाँ२॥ऽअवोभिः सुमृडीको भवतु विश्ववेदाः ॥ बाधंतान्द्वेषोऽ
अभयङ्कृणोतु सुवीर्य्यस्य पतयः स्याम ॥ ५१ ॥ तस्य वयम् ॥
तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ससुत्रा
मा स्ववाँऽइन्द्रोऽअस्मेऽआराच्चिद्द्वेषः सनुतर्य्युयोतु ॥ ५२ ॥
आमुन्द्रैः ॥ आमुन्द्रैरिन्द्र हरिभिर्य्याहि मयूररोमभिः ॥
मा त्वा केचिन्नियमन्विन्नपाशिनो ति धन्वेवताँ२॥ऽईहि॥ ५३ ॥
एवेत् ॥ एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासोऽअभ्यर्चन्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रैः ॥ सनंस्त्तुतोवीरवंद्धातुगोमंद्द्युयम्पांतस्वस्त्तिभिःसदांनः ॥ ५४ ॥ [८-६] समिंद्धोऽअग्निः ॥ समिंद्धोऽअग्निरंश्विनातप्तोघर्म्मोंविराट्सुतः ॥ दुहेधेनुःसरंस्वतीसोमंꣳशुक्रमिहेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजांसुतेश्विनोभासरंस्वती ॥ मद्धारजांꣳसीन्द्रियमिन्द्रांयपथिभिर्वहान् ॥ ५६ ॥ इन्द्रायेन्दुंम् ॥ इन्द्रायेन्दुꣳसरंस्वतीनराशꣳसेंनन्ग्नहुंम् ॥ अधांतामश्विनामधुंभेषजम्भिषजांसुते ॥ ५७ ॥ आजुह्वांनासरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वती ॥ आजुह्वानासरस्वतीन्द्रायेन्द्रियाणिवीर्य्यम् ॥ इडा
भिराश्विनाविषद्दसमूर्ज्जद्दसद्दरयिन्दधुः ॥ ५८ ॥ अश्विनान
मुंचेः । सुतद्दसोमद्दशुक्रम्पारिस्रुता ॥ सरस्वतीतमाभरद्द्व
र्हिषेन्द्रायपातवे ॥ ५९ ॥ कुवष्ष्योन । घ्यचंस्वतीराश्विभ्यान्न
दुरोदिशः ॥ इन्द्रोनरोदसीऽउभेदुहेकामान्त्सरस्वती ॥ ६० ॥
उषासानक्तम् ॥ उषासानक्तमाश्विनादिवेन्द्रद्दसायमिन्द्रि
यैः ॥ सञ्ज्ञानानेसुपेशसासमञ्ज्ञातेसरस्वत्या ॥ ६१ ॥ पातन्नः ॥

सं. ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातन्नोऽअश्विनादिवापाहिनक्तꣳसरस्वति ॥ दैव्यांहोतारा
भिषजापातमिन्द्रꣳसचासुते ॥ ६२ ॥ तिस्रस्त्रेधा । सरस्वत्य्य
श्विनाभारतीडा ॥ तीव्रम्परिस्रुतासोममिन्द्रायसुषुवुर्म्मदम्
॥ ६३ ॥ अश्विनाभेषजम् ॥ अश्विनाभेषजम्मधुभेषजन्नꣳ
सरस्वती ॥ इन्द्रेत्त्वष्ट्रायशꣳश्रियꣳरूपꣳरूपमधुꣳसुते ॥६४॥
ऋतुथेन्द्रः ॥ ऋतुथेन्द्रोवनस्पतिः शशमानःपरिस्रुता ॥
कीलालम्मश्विभ्याम्मधुदुहेधेनुःसरस्वती ॥ ६५ ॥ गोभिर्न्न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमंमश्विनामासरेणपरिस्रुतां ॥ समंधातुद्दसरंस्वत्त्यास्वाहे
न्द्रेसुतम्मधुं ॥ ६६ ॥ [१२-७] अश्विनांहुविः ॥ अश्वि
नांहुविरिन्द्रियन्नमुचेर्द्धियासरंस्वती ॥ आशुक्रमांसुराद्वसुंमु
घमिन्द्रायजब्भिरे ॥ ६७ ॥ यमश्विनां ॥ यमश्विनासरं
स्वतीहुविषेन्द्रमवर्द्धयन् ॥ सबिंभेदबुलम्मुघन्नमुचावासुरेस
चां ॥ ६८ ॥ तमिन्द्रम् ॥ तमिन्द्रम्पशवःसचाश्विनोभासरं
स्वती ॥ दधानाऽअब्भ्यूनूषतहुविषांयज्ञऽइन्द्रियैः ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यऽइन्द्रे ॥ यऽइन्द्रऽइन्द्रियन्दधुः सविताव्वरुणो भगः ॥ ससु
त्रामाहविष्पतिर्य्यजमानायसश्चत ॥७०॥ सविताव्वरुणः ॥
सविताव्वरुणोदधद्यजमानायदाशुषे ॥ आदत्तनमुचेर्व्वसुसुत्रा
मा बलमिन्द्रियम् ॥ ७१ ॥ व्वरुणः क्षत्रम् ॥ व्वरुणः क्षत्रमिं
न्द्रियम्भगेनसविताश्रियम् ॥ सुत्रामा यशसा बलन्दधानायु
ज्ञमाशत ॥ ७२ ॥ अश्विनागोभिः ॥ अश्विनागोभिरिन्द्रि
यमश्वेभिर्व्वीर्य्यम्बलम् ॥ हविषेन्द्रꣳसरस्वतीयजमानमवर्द्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन् ॥ ७३ ॥ तानासंत्त्या । सुपेशंसाहिरंण्यवर्त्तनीनरां ॥
सरंस्वतीहुविष्म्मतीन्द्रकर्म्मंसुनोवत ॥ ७४ ॥ ताभिषजां ।
सुकर्म्मंणासासुदुघासरंस्वती ॥ सवृंत्रहाशुतक्क्रंतुरिन्द्रांयदधु
रिन्द्रियम् ॥ ७५ ॥ युवꣳसुरामंम् ॥ युवꣳसुरामंम
श्विनानमुंचावासुरेसचां ॥ ब्विपिपानाःसंरस्वतीन्द्रङ्कर्म्मं
स्वावत ॥ ७६ ॥ पुत्रमिंवपितरौं ॥ पुत्रमिंवपितरांव
श्विनोभेन्द्रावथुःकाव्यैर्द्दंसनांभिः ॥ यत्त्सुरामंव्यपिंबःश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चींभिः सरस्वतीत्त्वामघवन्नभिष्णक् ॥ ७७ ॥ यस्मिन्न श्वांसः ॥ यस्मिन्नश्वांसऽऋषभासऽउक्षणोव्वशामेषाऽअवसृष्टासऽआहुताः ॥ कीलालपेसोमपृष्ठायवेधसेहृदामतिञ्जनयचारुमग्नये ॥ ७८ ॥ अहाव्यग्ने । हविरास्येतेस्रुचीवघृतञ्चम्वीवसोमः ॥ वाजसनिंरयिमस्मेसुवीरम्प्रशस्तन्धेहियशसम्बृहन्तम् ॥ ७९ ॥ [१३-८] शतम् १२०० ॥ अश्विनातेजसा ॥ अश्विनातेजसाचक्षुः प्राणेनसरस्वतीवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्य्यम् ॥ वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ ८० ॥ गोमं
दूषुणासत्त्या ॥ गोमंदूषुणासत्त्याश्वावद्यातमश्विना ॥ वर्त्ती
रुद्रानृपाय्यम् ॥ ८१ ॥ नयत् ॥ नयत्परोनान्तरऽआदुध
र्षद्धृषण्वसू ॥ दुःशꣳसोमत्त्यौरिपुः ॥ ८२ ॥ तानः ॥
तानऽआवोढमश्विनारयिम्पिशङ्गꣳसन्दृशम् ॥ धिष्ण्यांवरि
वोविदम् ॥ ८३ ॥ पावकानः ॥ पावकानःसरस्वतीवाजे

१ गोमदूषु णासत्या । अत्र समानपदत्वाभावेन णत्वाप्राप्तौ "निषण्णाय०" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वस्य निपातः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिर्व्वाजिनीवती ॥ युज्ञंव्वष्टुधियावसुꣳ ॥ ८४ ॥ चोदयित्री सूनृतानाम् ॥ चोदयित्रीसूनृतानाञ्चेतन्तीसुमतीनाम् ॥ युज्ञन्दधेसरस्वती ॥ ८५ ॥ महोऽअर्ण्णः ॥ महोऽअर्ण्णꣳ सरस्वतीप्रचेतयतिकेतुना ॥ धियोव्विश्वाविराजति ॥ ८६ ॥ इन्द्रायाहि । चित्रभानोसुताऽइमेत्त्वायवः ॥ अण्वीभिस्तनापूतासः ॥ ८७ ॥ इन्द्रायाहि । धियेषितोव्विप्रजूतꣳ

१ चित्रभानो । अत्र समानपदे "ऋषरेभ्यः" इत्यनेन भस्य व्यवधानेनाप्राप्तौ "स्वरयवहकपैश्च" इत्यनेन पवर्गव्यवधानेऽपि णत्वप्रतिप्रसवेन पुनर्णत्वप्राप्तौ "इन्द्राग्नी चित्रभानो०" (शु. य. प्रा. ३ अ. ९३ सू.) इत्यनेन निषिद्ध्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतावतः ॥ उपब्रह्माणिवाघतः ॥ ८८ ॥ इन्द्रायाहि ॥ इन्द्रायाहितूतुजानऽउपब्रह्माणिहरिवः ॥ सुतेदधिष्ष्वनश्चनः ॥ ८९ ॥ अश्विनापिबताम् ॥ अश्विनापिबताम्मधुसरं स्वत्त्यासजोषसा ॥ इन्द्रः सुत्रामावृत्रहाजुषतांसोम्म्यम्मधुं ॥ ९० ॥ [११-९] इतिश्रीवाजसनेयसंहितायांविंशतितमोऽध्यायः ॥ २० ॥ पूर्वविंशतौ मंत्रसंख्या १२११ ॥

१ सुतावतः । अत्र "अश्वरश्मिममतिसुमतिश्वसुत°" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे सुतस्याकारस्य दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीवाजसनेयसंहितायां पूर्वविंशतिः समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीवाजसनेयसंहितोत्तरविंशतिप्रारम्भः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशायनमः ॥ अनुवाकसूत्रम् ॥ इमम्मे, समिद्धोऽ अग्निरेकादशकौ, ॥वसन्तेनऽऋतुना षड्, होतायक्षत्त्समिधा ग्निन्द्वादशा, श्विनौछागस्य सप्त, देवम्बर्हिश्चतुर्दश, षडेक षष्टिः [अ. २१ मं. ६१ अनु. ६] ॥ हरिःॐ ॥ इमम्मे। वरु णश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १ ॥ तत्त्वा। यामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ २ ॥

॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वन्नः ॥ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासि
सीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांᳬसिप्रमुमु
ग्ध्यस्मत् ॥ ३ ॥ सत्त्वम् ॥ सत्त्वन्नोऽअग्नेवमोभवोतीनेदि
ष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणरराणोवीहिमृ
डीकᳬसुहवोनऽएधि ॥ ४ ॥ मुहीमूषु । मातरᳬसुव्रतानामृत

---

१ अवयासिसीष्ठाः । अत्र "भाविभ्यः स षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन षत्वप्राप्तौ "पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः" (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन प्रकृतिभावे न षत्वम् । २ मातरसुव्रतानाम् । वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः । या. शि. । मात्रिके ह्रस्ववर्णपूर्वेऽनुस्वारो द्विमात्रिको दीर्घऽइत्याकारको ज्ञेयः । अत्र "अनुस्वारे ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्धमात्रा" (शु. य. प्रा. ४ अ. १४८ सू.) इति लिङ्गम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्युपत्क्रीमवंसेहुवेम ॥ तुविक्षत्रामुजरंन्तीमुरूचीꣳसुशर्म्मा
णमदितिꣳसुप्रणीतिम् ॥ ५ ॥ सुत्रामांणम्पृथिवीम् ॥ सुत्रा
मांणम्पृथिवीन्द्यामनेहसंꣳसुशर्म्माणमदितिꣳसुप्रणीतिम् ॥
दैवीन्नावंꣳस्वरित्रामनांगसमस्त्रवन्तीमारुहेमास्वस्तयें ॥ ६ ॥
सुनावमारुहेयम् ॥ सुनावमारुहेयमस्त्रवन्तीमनांगसम् ॥
शतारित्रांꣳस्वस्तयें ॥ ७ ॥ आनः ॥ आनोमित्रावरुणाघृ

१-२ संयोगाद्यश्च यो भवेत्। या. शि.। यत्र संयोगाद्यो मात्रिको द्विमात्रिको वा वर्णः सोऽपि ऋवर्णव्यञ्जनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एकमात्रिको भवति न तु गुरुभूतः। तत्र ह्रस्वोच्चारणप्रदर्शकं ꣳ इत्याकारकं चिह्नं ज्ञेयम्। दीर्घस्य ꣳ इत्याकारकं चिह्नम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैर्ग्गघ्यूतिमुक्क्षतम् ॥ मद्वारजांᳬसिसुक्क्रतू ॥ ८ ॥ प्रबाहवां ।
सिसृतञ्जीवसेनऽआनोगघ्यूतिमुक्क्षतङ्कृतेनं ॥ आमाजनेश्च
वयतँय्युवानाश्चुतम्मेमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः ॥
शन्नोभवन्तुवाजिनोहवेषुदेवतातामितद्दवःस्वर्क्का ॥ जम्भय
न्तोहिंवृकंरक्षांᳬसिसनेम्म्यस्म्मद्युयवन्नमीवाः ॥ १० ॥
वाजेवाजेवत । वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥

---

१ रक्षाᳬसि । द्विमात्रे मात्रिकः स्यात् । या. शि. । यत्र द्विमात्रिकः पूर्ववर्णस्तत्र मात्रिको ह्रस्वोऽनुस्वारः ᳬ इत्याकारकः । अत्र "दीर्घादर्द्धमात्रा पूर्वा चाद्ध्यर्धा" (शु. य. प्रा. ४ अ. १४९ सू.) लिङ्गम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यमद्वः पिबतमादयध्वन्तृप्तायातपथिभिर्देवयानैः ॥ ११ ॥

[११-१] समिद्धोऽअग्निः । समिधासुसमिद्धो वरेण्यः ॥ गायत्रीच्छन्दऽइन्द्रियन्त्र्यविर्गौर्वयोदधुः ॥ १२ ॥ तनूनपाच्छुचिव्रतः ॥ तनूनपाच्छुचिव्रतस्तनूपाश्चसरस्वती ॥ उष्णिहाच्छन्दऽइन्द्रियन्दित्यवाड्गौर्वयोदधुः ॥ १३ ॥ इडाभिरग्निः ॥ इडाभिरग्निरीड्यःसोमोदेवोऽअमर्त्त्यः ॥ अनुष्टुप्छन्दऽइन्द्रियम्पञ्चाविर्गौर्वयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दधुः ॥१४॥ सुबर्हिरग्निः । पूषण्वान्त्स्तीर्णबर्हिरमर्त्त्यः ॥
बृहतीच्छन्दऽइन्द्रियन्त्रिवत्सोगौर्वयोदधुः ॥ १५ ॥ दुरो
देवीः ॥ दुरोदेवीर्दिशोमहीर्ब्रह्मादेवोबृहस्पतिः ॥ पङ्क्तिश्छ
न्दऽइहेन्द्रियन्तुर्य्यवाड्गौर्वयोदधुः ॥ १६ ॥ उषेयह्वी ॥
उषेयह्वीसुपेशसाविश्वेदेवाऽअमर्त्त्याः ॥ त्रिष्टुप्छन्दऽइहेन्द्रि
यम्पंष्ठवाड्गौर्वयोदधुः ॥ १७ ॥ दैव्याहोतारा । भिषजेन्द्रे
णसयुजायुजा ॥ जगतीच्छन्दऽइन्द्रियमनुड्वान्गौर्वयोदधुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽइडासरस्वतीभारतीमुरुतो विशः ॥ विराट्छन्दऽइहेन्द्रियन्धेनुर्गौर्न्नव्ययोदधुः ॥ १९ ॥ त्वष्टातुरीपः ॥ त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥ द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्न्नव्ययोदधुः ॥ २० ॥ शमितानः ॥ शमितानोवनस्पतिः ॥ सविताप्रसुवन्नभगम् ॥ कुकुप्छन्दऽइहेन्द्रियंवशावेहद्व्ययोदधुः ॥ २१ ॥ स्वाहायज्ञम् ॥ स्वाहायज्ञंवरुणःसुक्षत्रोभेषजङ्करत् ॥ अतिच्छन्दाऽइन्द्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंबृहद्दृषभोगौर्व्वयोंदधुः ॥ २२ ॥ [११-२] व्वसुन्तेनंऽऋतुनां । देवाव्वसंवस्त्रिवृतांस्त्तुताः ॥ रथुन्तुरेणुतेजंसाहुविरिन्द्रेव्वयोंदधुः ॥ २३ ॥ ग्रीष्म्मेणंऽऋतुनां । देवारुद्राःपंञ्चदशेस्त्तुताः ॥ बृहुतायशंसाबलंꣳहुविरिन्द्रेव्वयोंदधुः ॥२४॥ व्वर्षाभिर्ऋतुनां । दित्त्यास्त्तोमेंसप्त्तदशेस्त्तुताः ॥ व्वैरूपेणं व्विशौजंसाहुविरिन्द्रेव्वयोंदधुः ॥ २५ ॥ शारदेनंऽऋतुनां । देवाऽएकविꣳशऽऋभवंस्त्तुताः ॥ व्वैराजेनंश्रियाश्रियंꣳहुवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिन्द्रेव्वयोंदधुः ॥ २६ ॥ हेमन्तेनंऽऋतुना । देवास्त्रिणवेमरुतं स्तुता? ॥ बलेनशक्क्करीःसहोंहविरिन्द्रेव्वयोंदधुः ॥ २७ ॥ शैशिरेणंऽऋतुना । देवास्त्रयस्त्रिंशेमृतांस्तुता? ॥ सत्त्येनंरेवतींःक्षत्रꣳहविरिन्द्रेव्वयोंदधुः ॥ २८ ॥ [६-३] होतांयक्षत् । होतांयक्षत्समिधाग्निमिडस्पदेश्विनेन्द्रꣳसरंस्वतीमजोधूम्म्रोनगोधूमैःकुवंलैर्भेषजम्मधुशष्पैर्न्नतेजंऽइन्द्रियम्पयःसोमः÷परिस्रुतांघृतम्मधुव्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ २९ ॥ होतांयंक्षत्त

१ पादादौ च पदादौ च संयोगावग्रहेषु यः । जशब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः । या. शि. । अत्र पदादौ यकारस्य सत्वाज्जकारोच्चारणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नूनपात्त्सरस्वतीम् ॥ होतायक्षत्तनूनपात्त्सरस्वतीमविम्मे
षोनभेषजम्पथामधुमताभरन्नश्विनेन्द्रायवीर्य्यम्बदरैरुपवा
काभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुताघृतम्मधुव्य
न्त्वाज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराशꣳसन्न ।
नग्नहुम्पतिꣳसुरयाभेषजम्मेषꣳसरस्वतीभिषग्ग्रथोनचन्द्रयु
श्विनोर्व्वपाऽइन्द्रस्यवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिः
पयः सोमः परिस्रुताघृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥ ३१ ॥

१ अत्र रकारयकारयोः संयोगाज्जकारोच्चारणम् । एवं होतर्य्यजेत्यादौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होतायक्षदिडेडितः ॥ होतायक्षदिडेडितऽआजुह्वानुꣳसरं
स्वतीमिन्द्रम्बलेनबृद्धयन्नृषभेणगवेन्द्रियमश्विनेन्द्रायभेषजँ
ऽयवैः कुर्क्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयुꣳसोमः परिस्रुतांघृत
म्मधुघ्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ३२ ॥ होतायक्षद्बर्हि
रूर्णम्रदाः ॥ होतायक्षद्बर्हिरूर्णम्रदाभिषङ्ङासत्त्या
भिषजाश्विनाश्वाशिशुमतीभिषग्गधेनुःसरस्वतीभिषग्गदुहऽइ
न्द्रायभेषजम्पयुꣳसोमः परिस्रुतांघृतम्मधुघ्यन्त्वाज्यंस्यहोतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्य्यजं ॥ ३३ ॥ होतायक्षद्दुरोदिशः । कवुष्ष्योनध्यचंस्व
तीरश्विभ्यान्नदुरोदिशऽइन्द्रोनरोदसीदुघेदुहेधेनुःसरंस्वत्त्य
श्विनेन्द्रायभेषजꣳशुक्रन्नज्योतिरिन्द्रियम्पयꣳसोमः परिस्रु
तांघृतम्मधुव्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ३४ ॥ होतायक्ष
त्सुपेशंसोषे । नक्तन्दिवाश्विनासमंञ्जातेसरंस्वत्त्यात्त्विषिमि
न्द्रेनभेषजꣳश्येनोनरजंसाहृदाश्रियानमासंरम्पयꣳसोमः
परिस्रुतांघृतम्मधुव्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ३५ ॥ होतांय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुद्दैव्याहोतारा । भिषजाश्विनेन्द्रन्नजागृविदिवानक्तुन्नभे
षजैः शूषहुसरस्वतीभिषक्सीसेनदुहऽइन्द्रियम्पयः सोमः परि
स्रुतांघृतम्मधुव्यन्त्वाज्यंस्यहोतुर्यजं ॥ ३६ ॥ होतायक्ष
त्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्नभेषजन्त्रयस्त्रिधातं
वोपसोरूपमिन्द्रेहिरण्ययमश्विनेडानभारतीवाचासरस्वती
महऽइन्द्रायदुहऽइन्द्रियम्पयः सोमः परिस्रुतांघृतम्मधुव्य
न्त्वाज्यंस्यहोतुर्यजं ॥ ३७ ॥ होतायक्षत्सुरेतंसमृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षुभम् ॥ होतायक्षत्सुरेतसमृषभन्नर्य्यापसुन्त्वष्टारमिन्द्रं
मश्विनाभिषजुन्नसरस्वतीमोजोनजूतिरिन्द्रियंवृकोनरभसो
भिषग्यशुःसुरयाभेषुजꣳश्रियानमासरम्पयुःसोमः÷परिस्रु
तांघृतम्मधुघ्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ३८ ॥ होतायक्षद्वृ
नस्पतिꣳशमितारम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳश
तक्रतुम्भीमन्नमन्न्युꣳराजानंघ्याग्घन्नमंसाश्विनाभामुदसरं

१ "वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः" या. शि. । मात्रिके (ह्रस्ववर्णपूर्वे) अनुस्वारो द्विमात्रिकः ꣳ इत्याकारको दीर्घो ज्ञेयो लेख्यश्च । अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्द्धमात्रा पूर्वा चार्धमात्रा (शु. य. प्रा. ४ अ. १४८ सू.) इत्यनेन चोक्तम् । अत्र मन्न्युं राजानम् इत्यत्रानुस्वारस्य ह्रस्ववर्णपूर्वत्वं वर्त्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतीभिषगिन्द्रायदुहऽइन्द्रियम्पयः सोमः परिस्रुतांघृतम्मधु
व्यन्त्वाज्यंस्यहोतुर्य्यज ॥ ३९ ॥ होतांयक्षदग्निꣳस्वाहा ॥
होतांयक्षदग्निꣳस्वाहाज्यंस्यस्तोकानाꣳस्वाहामेदसाम्पृथु
क्स्वाहाछागंमश्विभ्याꣳस्वाहामेषꣳसरस्वत्यैस्वाहाऽऋषभ
मिन्द्रायसिंहायसहसऽइन्द्रियꣳस्वाहाग्निन्नभेषजꣳस्वाहा
सोमंमिन्द्रियꣳस्वाहेन्द्रꣳसुत्रामाणꣳसवितारंवरुणम्भिषजा
म्पतिꣳस्वाहावनस्पतिंम्प्रियम्पाथोनभेषजꣳस्वाहादेवाऽआ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यपाजुंषाणोऽअग्निर्भैषजम्पयः सोमः परिस्रुतां घृतम्मधुघ्य
न्त्वाज्यंस्यहोतर्य्यज ॥४०॥ [१२-४] होतांयक्षदुश्विनौ
छागंस्य। वपायामेदंसोजुषेतां ँ हविर्होतर्य्यज ॥ होतांयक्ष
त्सरंस्वतीम्मेषस्यंवपायामेदंसोजुषतां ँ हविर्होतर्य्यज ॥ हो
तांयक्षदिन्द्रंमृषभस्यंवपायामेदंसोजुषतां ँ हविर्होतर्य्यज
॥४१॥ होतांयक्षदुश्विनौसरंस्वतीम् ॥ होतांयक्षदुश्विनौसरं

---

१ "द्विमात्रिके मात्रिकः स्यात्" या. शि.। यत्र द्विमात्रिकः पूर्ववर्णः (दीर्घस्वरः) तत्रानुस्वारो ह्रस्वः ँ इत्याकारको ज्ञेयो लेख्य उच्चारणीयश्च। अत्र "दीर्घादर्द्धमात्रा पूर्वा चाद्ध्यर्धा" (शु. य. प्रा. ४ अ. १४९ सू.) प्रमाणम्। अत्र "जुषतां ँ हविः" इति पदे दीर्घवर्णपूर्वोऽनुस्वारो वर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतीमिन्द्रꣳ सुत्रामाणमिमेसोमाꣳसुरामाणꣳच्छागैर्न्नमेषैर्ऋ
षभैः सुताः शष्पैर्न्नतोक्मभिर्ल्लाजैर्म्महꣳस्वन्तोमदामासरेणपरि
ष्कृताꣳशुक्राः पयस्वन्तोमृताꣳप्रस्थितावोमधुश्चुतस्तानश्वि
नासरस्वतीन्द्रः सुत्रामावृत्रहाजुषन्तां सोम्यम्मधुपिबन्तुम
दन्तुव्यन्तुहोतुर्य्यजं ॥ ४२ ॥ होतायक्षदश्विनौच्छागस्य । हवि
षऽआत्तामुद्यमंद्युतोमेदुऽउद्धृतम्पुराद्वेषोभ्यꣳपुरापौरुषेय्या

१ परिष्कृता । अत्र "परिकृते षकारेण" (शु. य. प्रा. ३ अ. ५३ सू.) इत्यनेन परिपदं कृते परे षकारेण व्यवधीयते । ततोऽत्र "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्त्वं प्राप्तं परञ्च "ऋवर्णे च" (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन कृतघटितकारे परे द्वित्त्वस्य निषेधात् द्वित्त्वं न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृभोघस्त्तांन्नूनङ्घासेऽअंज्ज्राणाँऽय्यवंसप्प्रथमानाꣳसुमत्क्षंरा
णाꣳशतरुद्रियांणामग्निष्ष्वात्तानाम्पीवोपवसनानाम्पार्श्व्व
तः श्रोणितः शितामतऽउत्त्सादुतोङ्गादङ्गादवत्तानाङ्करंतऽए
वाश्विनांजुषेतांꣳहविर्होतुर्य्यजं ॥ ४३ ॥ होतांयक्क्षु
त्त्सरंस्वतीम्मेषस्यं । हविषऽआवंयदुद्यमंच्छतोमेदुऽउद्गृत
म्पुराद्वेषोंब्भ्यःपुरापौरुषेय्यागृभोघसंन्नूनङ्घासेऽअंज्ज्राणाँऽय्य
वंसप्प्रथमानाꣳसुमत्क्षंराणाꣳशतरुद्रियांणामग्निष्ष्वात्ता

१ पीवः उपवसनानाम् इत्यत्र "उपवसने पीवः" (शु. य. प्रा. ३ अ. १४ सू.) इत्यनेन उपवसने परे विसर्जनीयस्य लोपे "उवर्ण ओकारम्"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शिताम्तऽउत्सादुतो
ङ्गादङ्गादवत्तानाङ्करदेवꣳसरस्वतीजुषतांꣳहविर्होतुर्यजं
॥ ४४ ॥ होतायक्षदिन्द्रमृषभस्य । हविषऽआवयदुद्यमंद्यु
तोमेदुऽउद्धृतम्पुराद्वेषोब्भ्यःपुरापौरुषेय्यागृभोघसंन्नूनङ्घासेऽ
अंज्ज्राणाँय्यवसप्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणा
मग्निष्ष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शिताम्

(शु. य. प्रा. ४ अ. ५३ सू.) इति गुणे रूपं भवति। १ अत्र स्वरात्संयोगादिर्द्विरुच्यते इति सूत्रेण शकारस्य द्वित्वे प्राप्तेऽपि "नास्वरपूर्वा०" इति सूत्रस्य वृत्तौ विसर्जनीयाद्व्यञ्जनपरस्य द्वित्वञ्चेत्स्पर्शवर्णस्यैवेति नियमात्स्पर्शातिरिक्तशकारस्य द्वित्वं न भवति। तेन न द्वित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तऽउत्त्सादुतोङ्गादङ्गादवत्तानाङ्करदेवमिन्द्रोजुषतांᳬहविर्हो
तुर्यजं ॥ ४५ ॥ होतायक्षद्वनस्पतिंमभि । हिपिष्टतमया
रभिष्ठयारशनयाधित ॥ यत्राश्विनोश्छागस्यहविषः प्रिया
धामानियत्रसरस्वत्यामेषस्यहविषः प्रियाधामानियत्रेन्द्रस्य
ऽऋषभस्यहविषः प्रियाधामानियत्राग्नेः प्रियाधामानियत्र
सोमस्यप्रियाधामानियत्रेन्द्रस्यसुत्राम्णः प्रियाधामानियत्रे
सवितुः प्रियाधामानियत्रवरुणस्यप्रियाधामानियत्रवनस्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेंऽप्रियापाथांꣳसियत्रंदेवानांमाज्यपानांम्प्रियाधामांनिय
त्राग्नेर्होतुं÷प्रियाधामांनितत्रैतान्प्रस्तुत्त्यैवोपस्तुत्त्यैवोपावं
स्त्रक्षद्रभींयसऽइवकृत्त्वीकरंदेवन्देवोव्वनस्पतिर्ज्जुषतांꣳहुवि
र्होतुर्य्यजं॥४६॥ होतांयक्षदुग्निंꣳस्विष्टकृतम्॥ होतांयक्षदु
ग्निꣳस्विष्टकृतमयांडुग्निरश्विनोश्छागंस्यहुविषं÷प्रियाधा
मान्ययाट्टरंस्वत्त्यामेषस्यंहुविषं÷प्रियाधामान्ययाडिन्द्रंस्यऽ

१ "संयोगाद्यश्च यो भवेत्" या. शि.। यद्यनुस्वारस्य पूर्वो वर्णो दीर्घो वा ह्रस्वः संयोगाद्यश्चेत्तदाऽनुस्वारो मात्रिकोꣳइत्याकारको ह्रस्वो ज्ञेयो लेख्य उच्चारणीयश्च सर्वत्र। परञ्च यत्र संयोगाद्य ऋवर्णव्यञ्जनादिगो दीर्घो वा ह्रस्वो वर्णस्तत्र तु ꣳइत्याकारकोऽनुस्वारो दीर्घो ज्ञेयो बोद्धव्यः। यथा देवानां हृदयेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषभस्यहविषः प्रियाधामान्ययाऽग्नेः प्रियाधामान्ययाट्टो
मस्यप्रियाधामान्ययाऽइन्द्रस्यसुत्राम्णः प्रियाधामान्ययाऽ
ट्टवितुः प्रियाधामान्ययाऽ ट्टवरुणस्यप्रियाधामान्ययाऽ ट्टवन
स्पतेः प्रियापाथाऽ ऽस्ययाऽ ट्टदेवानामाज्यपानाम्प्रियाधामानि
यक्षदग्नेर्होतुः प्रियाधामानियक्षत्स्वम्महिमानमायजता
मेज्याऽइषः कृणोतुसोऽअद्धराजातवेदाजुषताऽ हविर्होतुर्य्य
जं॥४७॥ [७-५] देवम्बर्हिः। सरस्वतीसुदेवमिन्द्रेऽअश्विना॥

१ रकारहकारयोगेऽत्र करिण्यादीनां पंचस्वरभक्तीनां मध्ये "करिणी रहयोर्योगे" (या. शि.) इत्यनेन करिणी स्वरभक्तिर्ज्ञेया। एवं सर्वत्र।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेजोनचक्षुरक्ष्योर्ब्बर्हिषादधुरिन्द्रियंव्वसुवनेव्वसुधेयंस्यघ्यन्तु
यजं ॥ ४८ ॥ देवीर्द्वारः ॥ देवीर्द्वारोऽअश्विनाभिषजे
न्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नासिद्वारोदधुरिन्द्रियंव्वसुवनेव्वसु
धेयंस्यघ्यन्तुयजं ॥ ४९ ॥ देवीऽउषासौ ॥ देवीऽउषासावु
श्विनासुत्रामेन्द्रेसरस्वती ॥ बलन्नवाचमास्यऽउषाभ्यान्दधुरि
न्द्रियंव्वसुवनेव्वसुधेयंस्यघ्यन्तुयजं ॥ ५० ॥ देवीजोष्ट्रीं ॥
देवीजोष्ट्रीसरस्वत्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्नकर्णयोर्य्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोजोष्ट्रीब्भ्यान्दधुरिन्द्रियंव्वसुवनेव्वसुधेयस्यघ्यन्तुयजं ॥५१॥
देवीऽऊर्ज्जाहुंती ॥ देवीऽऊर्ज्जाहुंतीदुघेसुदुघेन्द्रेसरस्वत्यश्वि
नांभिषजांवतः ॥ शुक्रन्नज्योतिस्तनयोराहुंतीधत्तऽइन्द्रियं
व्वसुवनेव्वसुधेयस्यघ्यन्तुयजं ॥ ५२ ॥ देवादेवानांम् ॥ देवा
देवानांम्भिषजाहोतारविन्द्रंमश्विनां ॥ व्वषट्कारैःसरस्वती
त्विषिन्नहृदयेमतिंहोतृब्भ्यान्दधुरिन्द्रियंव्वसुवनेव्वसुधेयस्य
घ्यन्तुयजं ॥ ५३ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरश्विनेडासरस्वती ॥ शूषन्नमध्येनाब्भ्यामिन्द्रायदधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयजं ॥ ५४ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसंत्रिवरूथꣳसरस्वत्याश्विब्भ्यांमीयतेरथः॥ रेतोनरूपममृतंञ्जनित्रमिन्द्रायत्त्वष्टादधदिन्द्रियाणिवसुवनेवसुधेयस्यव्यन्तुयजं ॥ ५५ ॥ देवोदेवैः ॥ देवोदेवैर्वनस्पतिर्हिरण्यपर्णोऽअश्विब्भ्याꣳसरस्वत्यासुपिप्पलऽइन्द्रायपच्यतेमधु ॥ ओजोनजूतिर्ऋषभोनभामंवनस्पतिर्न्नोदधदिन्द्रि

र्द्धाऽअस्य, पीवोऽअन्नाद्वादशका, वभित्त्वैकादश, चत्त्वारः
पंचचत्त्वारिꣳशत् [अ. २७ मं. ४५ अनु. ४] ॥ हरिःॐ॥
समांस्त्वा ॥ समांस्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयो
यानिसत्त्या ॥ सन्दिद्यनदीदिहिरोचनेनविश्वाऽआभाहिप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिशुश्चतंस्रः ॥ १ ॥ सञ्चं ॥ सञ्चेद्धस्वाग्नेप्रचंबोधयैनुमुच्चं
तिष्ठमहुतेसौभंगाय ॥ मार्चंरिषदुपसुत्तातेंऽअग्नेब्रह्माणंस्त्ते
युशसं÷सन्तुमान्ये ॥ २ ॥ त्वामंग्ने ॥ त्वामंग्नेवृणतेब्राह्म
णाऽइमेशिवोऽअंग्नेसंवरंणेभवानः ॥ सुपुत्रहानोंऽअभिमा
तिजिच्चस्वेगयेंजागृह्यप्प्रंयुच्छन् ॥३॥ इहैव ॥ इहैवाग्नेऽअ
धिंधारयारयिम्मात्त्वानिक्कंन्पूर्व्वचितोंनिकारिणं÷ ॥ क्षत्रमं
ग्नेसुयमंमस्त्तुतुब्भ्यंमुपसुत्तार्व्वर्द्धतान्तेऽअनिंष्टृतः ॥४॥ क्षत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णांग्ने ॥ क्षत्रेणांग्नेस्वायुꣳसꣳरभस्वमित्रेणांग्नेमित्रधेयेंयत
स्व ॥ सजातानांम्मद्यमस्त्थाऽएंधिराज्ज्ञांमग्नेविहुव्योदीदि
हीह ॥ ५ ॥ अतिनिहंः ॥ अतिनिहोऽअतिस्त्रिधोत्त्यचिं
त्तिमत्त्यरांतिमग्ने ॥ विश्वाह्यग्नेदुरितासहस्वाथास्म्मभ्यꣳ
सहवीराꣳरयिन्दांः ॥ ६ ॥ अनाधृष्ट्योजातवेदाः ॥ अनाधृ
ष्ट्योजातवेदाऽअनिष्टृतोविराडंग्नेक्षत्रभृद्दीदिहीह ॥ विश्वा
ऽआशांःप्रमुञ्चन्मानुषीभिर्यशशिवेभिरद्यपरिपाहिनोवृधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७ ॥ बृहस्पतेसवितः ॥ बृहस्पतेसवितर्बोधयैनꣳसꣳशि
तञ्चित्सन्तराꣳसꣳशिशाधि ॥ बुद्धयैनम्महतेसौभगायविश्वꣳएनमनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूयादधं ॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेऽअभिशस्तेरमुञ्चः ॥ प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्नेभिषजाशचीभिः ॥ ९ ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ १० ॥ [१०-१] ऊर्द्धाऽअं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यसमिधोभवन्त्यूर्द्धाशुक्राशोचीꣳष्यग्नेः ॥ द्युमत्तमासुप्र
तीकस्यसूनोः ॥ ११ ॥ तनूनपादसुरꣳ ॥ तनूनपादसुरोविं
श्ववेदादेवोदेवेषुदेवः ॥ पथोऽअनक्तुमद्धाघृतेन ॥ १२ ॥
मद्धायज्ञम् ॥ मद्धायज्ञन्नक्षसेप्रीणानोनराशꣳसोऽअग्ने ॥
सुकृद्देवःसविताविश्ववारꣳ ॥ १३ ॥ अच्छायम् ॥ अच्छाय
मेतिशवसाघृतेनेडानोवन्हिर्नमसा ॥ अग्निꣳस्रुचोऽअध्वरे
षुप्रयत्सु ॥ १४ ॥ सयक्षत् ॥ सयक्षदस्यमहिमानमग्नेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सऽईम्मुन्द्रासुंप्प्रयसं÷ ॥ वसुश्चेतिंष्ठोवसुधातंमश्च ॥१५॥ द्वारौं
देवीः ॥ द्वारोंदेवीरन्वंस्यविश्वैंव्रतादंदन्तेऽअग्नेः ॥ उरुव्यचंसौ
धाम्नापत्त्यंमानाः॥१६॥ शतम् १६०० ॥ तेऽअंस्य ॥ तेऽअंस्य
योषंणेदिव्येनंयोनांऽउषासानक्तां ॥ इमँऽयुज्ज्ञमंवतामध्वर
न्नं÷ ॥ १७ ॥ दैव्यांहोतारा ॥ दैव्यांहोताराऽऊर्द्धमंध्वरन्नो
ग्नेर्जिह्वामभिगृंणीतम् ॥ कृणुतन्नंःस्विष्टिम् ॥ १८ ॥ तिस्रो

१ योनाऽउषासा । अत्र ओकारात्परस्य उष इत्यस्य "उष महोभिर्नक्तेमीकारैकारौकारनकारेभ्यः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन उष इत्ययं ह्रस्वो दीर्घत्वमापद्यते महोभि इत्यादिपरेषु सत्सु । तेनात्र ह्रस्वाकारस्य दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवीः ॥ तिस्रोदेवीर्बर्हिरेदꣳसदन्त्विडासरस्वतीभारती ॥ महीगृणाना ॥१९॥ तन्नः ॥ तन्नस्त्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टा सुवीर्य्यम् ॥ रायस्पोषंविष्यतुनाभिमस्म्मे ॥ २० ॥ वनस्प्पतेव ॥ वनस्प्पतेवसृजाराणस्त्मनादेवेषु ॥ अग्निर्हुव्यꣳ शमितासूदयाति ॥ २१ ॥ अग्नेस्वाहा । कृणुहिजातवेदऽ इन्द्रायहुव्यम् ॥ विश्वेदेवाहविरिदञ्जुषन्ताम् ॥ २२ ॥ [१२-२] पीवोऽअन्नारायिवृधः । सुमेधाः श्वेतः सिषक्तिनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युतांमभिश्श्रीः ॥ तेवायवेसमनसोवितंस्तथुर्विश्वेन्नरः स्वप
त्यानिचक्रुः ॥ २३ ॥ रायेनु । यज्ञुज्ज्ञतुरोदसीमेरायेदेवीधि
षणांधातिदेवम् ॥ अधंवायुन्नियुतः सश्चतस्वाऽउतश्वेतंवसुंधि
तिन्निरेके ॥ २४ ॥ आपोंह ॥ आपोंहयद्बृहतीर्विश्वमायन्ग
र्भन्दधांनाजनयंन्तीरग्निम् ॥ ततोंदेवानाꣳसमंवर्त्ततासुरे
कुंकस्मैंदेवायंहविषांविधेम ॥ २५ ॥ यश्चित् ॥ यश्चिदापो
महिनापर्य्यपश्यद्दक्षन्दधांनाजनयंन्तीर्यज्ञम् ॥ योदेवे

सं. ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ष्वधिदेवऽएकऽआसीत्कस्मैदेवायहविषाविधेम ॥ २६ ॥
प्रयाभिः ॥ प्रयाभिर्यासिदाश्वाꣳसमच्छानियुद्भिर्वायविष्ट
येदुरोणे ॥ निनोरयिꣳसुभोजसँय्युवस्वनिवीरङ्गव्यमश्व्यञ्च
राधः ॥ २७ ॥ आनः ॥ आनोनियुद्भिः शतिनीभिरध्वरꣳ
सहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादय
स्वयूयम्पातस्वस्तिभिः सदानः ॥ २८ ॥ नियुत्वान्वायो ॥
नियुत्वान्वायवागह्ययꣳशुक्रोऽअयामिते ॥ गन्तासिसुन्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोगृहम् ॥ २९ ॥ वायोंशुक्क्र ॥ वायोंशुक्क्रोऽअंयामितेम
द्धोऽअग्ग्रन्दिविंष्टिषु ॥ आयांहिसोमंपीतयेस्प्पार्होदेंवनियुत्त्वं
ता ॥ ३० ॥ वायुरंग्ग्रेगा ॥ वायुरंग्ग्रेगायंज्ज्ञप्प्री ॥ साकङ्गन्म
नंसायुज्ज्ञम् ॥ शिवोनियुद्भिः शिवाभिः ॥ ३१ ॥ वायोये । तेंस
हस्त्रिणोरथांसुस्त्तेभिरागंहि ॥ नियुत्त्वान्त्सोमंपीतये ॥ ३२ ॥
एकंयाच । दुशभिंश्चस्वभूतेद्वाब्भ्यांमिष्टयेंविंशतीचं ॥
तिसृभिंश्चवहंसेत्रिंशतांचनियुद्भिंर्वायविहताविमुंञ्च ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवंवायो ॥ तवंवायवृतस्पतेत्त्वष्टुर्जामातरद्भुत ॥ अवा॒ꣳ स्यावृणीमहे॥३४॥ [१२-३] अ॒भित्त्वा। शूरनोनुमोदुंग्गधाऽ इवधेनवं÷॥ ईशानमस्यजगतंस्वर्दृशमीशानमिन्द्रतस्थुषं÷ ॥ ३५ ॥ नह्वावान् ॥ नह्वावाँ२॥ ऽअन्योदिव्योनपार्थिवोनजातोनजनिष्यते ॥ अश्वायन्तोमघवन्निन्द्रवाजिनोंग व्यन्तस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवामहे

१ ऋतस्पते अत्र । "प्रकृत्या कपयोः खफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इति प्रकृतिभावे प्राप्ते "ऋतावरौ च परयोः" (शु. य. प्रा. ३ अ. ५१ सू.) ऋतः अवरश्च यथासंख्यं पतिपरयोः सकारेण व्यवधीयते। इति सकारे तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सातौवाजस्यकारवः ॥ त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्गा
ष्टास्वर्वतः ॥ ३७ ॥ सत्त्वम् ॥ सत्त्वन्नश्चित्रवज्रहस्तधृ
ष्णुयामहस्तवानोऽअद्रिवः ॥ गामश्वं रथ्यमिन्द्रसङ्किर
सत्रावाजन्नजिग्युषे ॥ ३८ ॥ कयानः ॥ कयानश्चित्रऽ
आभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ ३९ ॥
कस्त्वा । सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिदा
रुजेवसु ॥ ४० ॥ अभीषुणः ॥ अभीषुणःसखीनामविता

१ अभीषुणः । अत्र अभीषुनः । अत्र समानपदत्वाभावेन णत्वाप्राप्तौ "निषणाय०" (ऋ. य. प्रा. ३ अ. ८१ सू.) इत्यनेन णत्वं निपात्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जरितॄणाम् ॥ शुतम्भवास्युतये ॥ ४१ ॥ युज्ज्ञायंज्ज्ञावꣳ ॥ युज्ज्ञायंज्ज्ञावोऽअग्नयेंगिरागिराचुदक्षसे ॥ प्रप्रंवयमुमृतं ज्ञातवेंदसम्प्रियम्मित्रन्नशंꣳसिषम् ॥४२॥ पाहिनंः ॥ पाहि नोंऽअग्नुऽएकंयापाह्युतद्वितीयंया ॥ पाहिगीर्भिस्तिसृभिं रूर्ज्जाम्पतेपाहिचंतसृभिर्व्वसो ॥ ४३ ॥ ऊर्ज्जोनपांतम् ॥ ऊर्ज्जोनपांतुहसहिनायमंस्म्मयुर्द्दाशेमहुव्यदांतये ॥ भुवद्वा जेष्वविताभुवंद्वृधऽउतत्रातातुनूनांम् ॥ ४४ ॥ संवुत्सरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि । परिवत्सरोसीदावत्सरोसीद्वत्सरोसिवत्सरोसि ॥ उष
संस्तेकल्पन्तामहोरात्रास्तेकल्पन्तामर्द्धमासास्तेकल्पन्ता
म्मासास्तेकल्पन्तामृतवस्तेकल्पन्ता७संवत्सरस्तेकल्प
ताम् ॥ प्रेत्याऽएत्यैसञ्चाञ्चुप्प्रचसारय ॥ सुपुर्णचिदसितयां
देवतयाङ्गिरस्वद्ध्रुवःसीद ॥ ४५ ॥ [११-४] इति श्रीवाज-
सनेयसंहितायां सप्तविंशोऽध्यायः ॥ २७॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ होतायक्षदेकादश, देवंबर्हिर्द्वादश,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरप्येवं, चत्त्वारः षट्चत्त्वारिꣳशत् [अ. २८ मं. ४६ अनु. ४] हरिः ॐ ॥ होतायक्षत् ॥ होतायक्षत्त्समिधेन्द्रं मिडस्पदेनाभापृथिव्याऽअधि ॥ दिवोवष्मन्त्समिद्धयतऽ ओजिष्ठश्चर्षणीसहांवेत्त्वाज्यस्यहोतुर्य्यज ॥ १ ॥ होतायक्षत्तनूनपातमृतिभिः ॥ होतायक्षत्तनूनपातमृतिभिर्ज्जेतारमपराजितम् ॥ इन्द्रन्देवꣳस्वर्व्विदम्पृथिभिर्म्मधुमत्त

१ चर्षणीसहांवेत्तु । अत्र "भाविभ्य सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन चर्षणीशब्दात्परस्य सस्य षत्वापत्तौ "पृथिवीदिव्युपरिचर्षणि शकुनियासिभ्यः" (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन तत्तपरस्य सस्य प्रकृतिभावे न षत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैर्न्नराशꣳसेनतेजसाव्वेत्त्वाज्यंस्यहोतुर्य्यजं ॥ २ ॥ होतां
यक्षदिडाभिरिन्द्रम् ॥ होतांयक्षदिडाभिरिन्द्रंमीडितमाजु
ह्वानममर्त्त्यम् ॥ देवोदेवैःसवीर्य्योव्वज्रहस्तꣳपुरन्दरोव्वेत्त्वा
ज्यंस्यहोतुर्य्यजं ॥ ३ ॥ होतांयक्षद्बर्हिषीन्द्रम् ॥ होतां
यक्षद्बर्हिषीन्द्रंन्निषद्वरंवृषभन्नर्य्यापसम् ॥ व्वसुभीरुद्रैरादि
त्यैःसयुग्भिर्ब्बर्हिरासदद्वेत्त्वाज्यंस्यहोतुर्य्यजं ॥ ४ ॥ होतां
यक्षदोजोन ॥ होतांयक्षदोजोनव्वीर्य्यꣳसहोद्वारऽइन्द्रम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्द्धयन् ॥ सुप्प्रायणाऽअस्मिन्न्युज्ज्ञेविश्श्रयन्तामृतावृधो
द्वारऽइन्द्रायमीढुषेव्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ५ ॥ होतां
यक्षदुषेऽइन्द्रस्य । धेनूसुदुघेमातरामुही ॥ सुवातरौनते
जंसाव्वृत्त्समिन्द्रंमवर्द्धतांव्वीतामाज्यंस्यहोतुर्य्यजं ॥ ६ ॥ होतां
यक्षद्दैव्याहोतारा । भिषजासखांयाहुविषेन्द्रंम्भिषज्यतः ॥
कुवीदेवौप्प्रचेतसाविन्द्रांयधत्तऽइन्द्रियंव्वीतामाज्यंस्यहोतु
र्य्यजं ॥७॥ होतांयक्षत्तिस्रोदेवीः ॥ होतांयक्षत्तिस्रोदेवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्न्नभेषजन्त्रयंस्त्रिधातंवोपसऽइडासरंस्वतीभारंतीमुहीः ॥ इन्द्रं
पत्नीर्हविष्म्मंतीर्य्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ८ ॥ होतांयक्षु
त्त्वष्टांरमिन्द्रंम् ॥ होतांयक्षुत्त्वष्टांरमिन्द्रंन्देवम्भिषजंꣳसुय
जंघृतुश्रियंम् ॥ पुरुरूपंꣳसुरेतंसम्मुघोनुमिन्द्रांयुत्त्वष्टादधांदि
न्द्रियाणिवेत्त्वाज्यंस्यहोतुर्य्यजं ॥९॥ होतांयक्षुद्वनुस्पतिंꣳ
शमितारंम् ॥ होतांयक्षुद्वनुष्पतिंꣳशमितारंꣳशतक्रतुन्धि
योजोष्टारंमिन्द्रियम् ॥ मद्धांसमुञ्जन्पुथिभिंः सुगेभिंः स्वदांति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युज्ज्ञम्मधुनाघृतेनुव्वेत्त्वाज्यस्यहोतुर्य्यजं ॥१०॥ होतायक्षु
दिन्द्रꣳस्वाहा ॥ होतायक्षुदिन्द्रꣳस्वाहाज्यस्यस्वाहामेदसꣳ
स्वाहास्तोकानाꣳस्वाहास्वाहाकृतीनाꣳस्वाहाहुव्यसूक्तीना
म् ॥ स्वाहादेवाऽआज्यपाजुषाणाऽइन्द्रऽआज्यस्यव्यन्तुहो
तुर्य्यजं ॥ ११ ॥ [११-१] देवम्बर्हिरिन्द्रम् ॥ देवम्बर्हि
रिन्द्रꣳसुदेवन्देवैर्व्वीरवत्तस्तीर्णंव्वेद्यामवर्द्धयत् ॥ व्वस्तोर्वृत
म्प्राक्तोर्भृतꣳरायाबर्हिष्मतोत्त्यंगाद्वसुवनेव्वसुधेयस्यव्वेतुय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जं ॥ १२ ॥ देवीर्द्वारः ॥ देवीर्द्वारऽइद्रं सङ्घातेवीड्वीड्यां मंन्नवर्द्धयन् ॥ आवृत्सेनतरुणेनकुमारेणंचमीवतापार्वाणं रेणुकंकाटन्नुदन्तांवसुवनेंवसुधेयंस्यघ्यन्तुयजं ॥ १३ ॥ देवीऽ उषासानक्तां ॥ देवीऽउषासानक्तेन्द्रंऽयुज्ञेप्रंयुत्त्यह्वेताम् ॥ देवीर्विशःप्रायांसिष्टाꣳसुप्रीतेवसुधितेवसुवनेंवसुधेयंस्यवी ताँऽयजं ॥ १४ ॥ देवीजोष्ट्रीं ॥ देवीजोष्ट्रीवसुंधितीदेवमि

१ देवी उषासा। अत्र "उषमहोभिर्नक्तमीकारैकारौकारनकारेभ्यः" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन देवीशब्दस्थेकारात्परस्य उष इत्यस्य ह्रस्वाकारस्य दीर्घाकारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रमवर्द्धताम् ॥ अयाँ ध्यन्न्याघाद्वेषाꣳस्यान्न्याव्वंक्षुद्वसुव्वाऽर्य्यां
णियजमानायशिक्षितेव्वंसुवनेंव्वसुधेयंस्यव्वीताँऽयजं ॥ १५ ॥
देवीऽऊर्ज्जाहुंती ॥ देवीऽऊर्ज्जाहुंतीदुघेंसुदुघेपयसेन्द्रंमवर्द्धता
म् ॥ इषमूर्ज्जमुन्न्याव्वंक्षुत्सग्घिद्वसपींतिमुन्न्यानवेंनुपूर्व्वन्दयं
मानेपुराणेनुनवमधांतामूर्ज्जमूर्ज्जाहुंतीऽऊर्ज्जयंमानेव्वसुव्वाऽर्य्यां
णियजमानायशिक्षितेव्वंसुवनेंव्वसुधेयंस्यव्वीताँऽयजं ॥ १६ ॥
देवादैव्यां ॥ देवादैव्याहोतांरादेवमिन्द्रंमवर्द्धताम् ॥ हुताघं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शꣳसावाभांष्ट्वांवसुवाऽर्य्याणियजंमानायशिक्षितौवंसुवनेंवसु
धेयंस्यवीताँऽयजं ॥ १७ ॥ देवीस्तिस्रः ॥ देवीस्तिस्रास्ति
स्रोदेवीःपतिमिन्द्रंमवर्द्धयन् ॥ अस्पृक्षद्भारतीदिवंꣳरुद्रैर्य्यु
ज्ञꣳसरंस्वतीडावसुंमतीगृहान्वंसुवनेंवसुधेयंस्यव्यन्तुयजं
॥ १८ ॥ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसांस्त्रिवरूथस्त्रिब
न्धुरोदेवमिन्द्रंमवर्द्धयत् ॥ शतेनांशितिपृष्ठानामाहितंसहस्रेण
प्रवर्त्ततेमित्रावरुणेदंस्यहोत्रमर्हतोबृहस्पतिंस्तोत्रमश्विना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धर्य्यवंव्वसुवनेंव्वसुधेयंस्यव्वेतुयजं ॥ १९ ॥ देवोदेवैः ॥ देवो
देवैर्व्वनस्पतिर्हिरंण्यपर्ण्णोमधुंशाखंसुपिप्पलोदेवमिन्द्रंमव
र्द्धयत् ॥ दिवमग्रेंणास्पृक्षुदान्तरिंक्षम्पृथिवीमंदृंहीद्वसुव
नेंव्वसुधेयंस्यव्वेतुयजं ॥ २० ॥ देवम्बर्हिः ॥ देवम्बर्हिर्व्वारिंती
नान्देवमिन्द्रंमवर्द्धयत् ॥ स्वासस्त्थमिन्द्रेणासंन्नमुन्न्याबु
हीं॑ष्ष्युब्भ्यभूद्वसुवनेंव्वसुधेयंस्यव्वेतुयजं ॥ २१ ॥ देवोऽ
अग्निः ॥ देवोऽअग्निःस्विंष्टकृद्देवमिन्द्रंमवर्द्धयत् ॥ स्विंष्टकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वन्तिस्वष्टृकृत्तिंस्वष्टृमुद्यकंरोतुनोवसुवनेंवसुधेयंस्यवेतुयजं
॥ २२ ॥ अग्निमुद्य । होतारमवृणीतायँऽयजंमानुंपचुन्प
क्तींपचंन्पुरोडाशंम्बध्नन्निन्द्रांयुच्छागंम् ॥ सुपुस्त्थाऽअद्यदे
वोवनुस्पतिंरभवदिन्द्रांयुच्छागेंन ॥ अद्युत्तम्मेंदुस्तःप्रतिंपचु
ताग्रंभीदवींवृधत्तपुरोडाशेंन ॥ त्वामुद्यऽऋषे ॥२३॥[१२-२]
होतांयक्षत्समिधानम्मुहत् ॥ होतांयक्षत्समिधानम्मुहद्य
शुंसुसंमिद्धंवरेंण्यमग्निमिन्द्रंवयोधसंम् ॥ गायत्रीञ्छन्दंऽ

१. अ. २१, मं. ६१—त्वामद्यऽऋषऽ आ० ॥ १ ॥ इति प्रतीकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रियꣳविङ्गांवयोदधद्वेत्त्वाज्यंस्यहोतुर्यजं ॥ २४ ॥ होतां
यक्षत्तनूनपातमुद्भिदम् ॥ होतांयक्षत्तनूनपातमुद्भिदुँऽय
ङ्गर्भमदितिर्दधेशुचिमिन्द्रंवयोधसम् ॥ उष्णिहुञ्छन्दऽ
इन्द्रियन्दित्त्यवाहुङ्गांवयोदधद्वेत्त्वाज्यंस्यहोतुर्यजं ॥ २५ ॥
होतांयक्षदीडेन्यंमीडितम् ॥ होतांयक्षदीडेन्यंमीडितंवृत्रह
न्तमुमिडांभिरीड्यहुसहुंसोमुमिन्द्रंवयोधसम् ॥ अनुष्टुभुञ्छ
न्दऽइन्द्रियम्पञ्चांविङ्गांवयोदधद्वेत्त्वाज्यंस्यहोतुर्यजं ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होतायक्षत्सुबर्हिषम्पूषण्वन्तम् ॥ होतायक्षत्सुबर्हिषम्पू
षण्वन्तममर्त्यमुसीदन्तम्बर्हिषिप्रियेमृतेन्द्रंव्वयोधसम् ॥
बृहतीञ्छन्दऽइन्द्रियन्त्रिवृत्सङ्गंव्वयोदधद्वेत्वाज्यस्यहोतर्य्य
जं ॥२७॥ होतायक्षद्द्व्यचस्वतीःसुप्रायणाः ॥ होतायक्ष
द्द्व्यचस्वतीःसुप्रायणाऽऋतावृधोद्वारोदेवीर्हिरण्ययीर्ब्रह्मा
णमिन्द्रंव्वयोधसम् ॥ पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गंव्व
योदधद्व्यन्त्वाज्यस्यहोतर्य्यजं ॥ २८ ॥ होतायक्षत्सुपेशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सासुशिल्पे। बृहतीऽउभेनक्तोषासानदंश्शतेविश्वमिन्द्रंवयो
धसम् ॥ त्रिष्टुभञ्छन्दंऽइहेन्द्रियम्पंष्ठवाहङ्गावयोदधंद्वीता
माज्यंस्यहोतुर्य्यजं ॥२९॥ होतायक्षत्प्रचेतसादेवानाम् ॥
होतायक्षत्प्रचेतसादेवानामुत्तमँय्यशोहोतारादैव्यांकवीसु
युजेन्द्रंवयोधसम्॥ जगतिञ्छन्दंऽइन्द्रियमनुष्ठाहङ्गांवयोदधं
द्वीतामाज्यंस्यहोतुर्य्यजं ॥३०॥ होतायक्षत्पेशंस्वतीस्तिस्त्रः ॥ होतायक्षत्पेशंस्वतीस्तिस्त्रोदेवीर्हिरण्ययीर्भारती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्बृहतीर्म्महीः पतिमिन्द्रं वयोधसम् ॥ विराजुञ्छन्दऽइहेन्द्रि
यन्धेनुङ्गान्नवयोदधद्द्यन्त्वाज्यस्य होतुर्य्यजं ॥ ३१ ॥ होतां
यक्षत्त्सुरेतसन्त्वष्टारम् ॥ होतायक्षत्त्सुरेतसन्त्वष्टारम्पुष्टिव
र्द्धनꣳ रूपाणिबिभ्रतम्पृथक्पुष्टिमिन्द्रं वयोधसम् ॥ द्विपदुञ्छ
न्दऽइन्द्रियमुक्षाणङ्गान्नवयोदधद्वेत्त्वाज्यस्य होतुर्य्यजं ३२ ॥
होतायक्षद्वनस्पतिꣳ शमितारम् ॥ होतायक्षद्वनस्पतिꣳ श
मितारꣳ शतक्रतुहिरण्यपर्णमुक्थिनꣳ रशनाम्बिभ्रतंवु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिम्भगमिन्द्रंव्वयोधसंम् ॥ कुकुभुञ्छन्दंऽइहेन्द्रियंव्वेहतङ्गांव्व
योदधद्वेत्त्वाज्यंस्यहोतुर्य्यजं ॥ ३३ ॥ होतांयक्षत्स्वाहांकृती
रग्निम् ॥ होतांयक्षत्स्वाहांकृतीरग्निङ्गृहपंतिम्पृथुग्गवरुंणम्भे
षजङ्कुविङ्कुत्रमिन्द्रंव्वयोधसंम् ॥ अतिंच्छन्दसुच्छन्दंऽइन्द्रि
यम्बृहद्दृषभङ्गांव्वयोदधद्द्यन्त्वाज्यंस्यहोतुर्य्यजं ॥ ३४ ॥
[११-३] देवम्बर्हिः ॥ देवम्बर्हिर्व्वयोधसंन्देवमिन्द्रंमवर्द्ध
यत् ॥ गायत्र्याच्छन्दंसेन्द्रियञ्चक्षुरिन्द्रेव्वयोदधंद्वसुवनेंव्वसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धेयंस्यव्वेतुयजं ॥ ३५ ॥ देवीर्द्वारः ॥ देवीर्द्वारोव्वयोधसꣳ
शुचिमिन्द्रंमवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रे
व्वयोदधंद्वसुवनेव्वसुधेयंस्यव्यन्तुयजं ॥ ३६ ॥ देवीऽउषासा
नक्ता । देवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ अनुष्टुभा
च्छन्दसेन्द्रियम्बलमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्वीताँयजं
॥ ३७ ॥ देवीजोष्ट्रीं ॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रंव्वयो
धसंन्देवीदेवमंवर्द्धताम् ॥ बृहत्याच्छन्दसेन्द्रियꣳश्रोत्रमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीताँऽयजं ॥ ३८ ॥ देवीऽऊ
र्जाहुंती ॥ देवीऽऊर्ज्जाहुंतीदुघेंसुदुघेपयसेन्द्रंम्व्वयोधसंन्देवी
देवमंवर्द्धताम् ॥ पङ्क्त्याच्छन्दंसेन्द्रियꣳशुक्रमिन्द्रेव्वयोद
धंद्वसुवनेंव्वसुधेयंस्यव्वीताँऽयजं ॥ ३९ ॥ देवादैव्यां ॥ देवा
दैव्याहोतांरादेवमिन्द्रंव्वयोधसंन्देवौदेवमंवर्द्धताम् ॥ त्रिष्टुभा
च्छन्दंसेन्द्रियन्त्विषिमिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीताँ
ऽयजं ॥ ४० ॥ देवीस्तिस्रः ॥ देवीस्तिस्रस्तिस्रोदेवीर्व्वयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धसम्पतिमिन्द्रंमवर्द्धयन् ॥ जगत्त्याच्छन्दसेन्द्रियꣳशूषमि
न्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ४१ ॥ देवोनराशꣳ
सं÷ ॥ देवोनराशꣳसोंदेवमिन्द्रंव्वयोधसंन्देवोदेवमंवर्द्धयत् ॥
व्विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधंद्वसुवनेंद्वसुधेयंस्य
व्वेतुयजं ४२ ॥ देवोव्वनस्पतिं÷ ॥ देवोव्वनस्पतिर्देवमिन्द्रं
व्वयोधसंन्देवोदेवमंवर्द्धयत् ॥ द्विपंदाच्छन्दसेन्द्रियम्भगमि
न्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वेतुयजं ॥ ४३ ॥ देवम्बर्हि? ॥

सं. ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवम्बर्हिर्व्वारितीनान्देवमिन्द्रंव्वयोधसन्देवन्देवमंवर्द्धयत् ॥
कुकुभाच्छन्दसेन्द्रियँय्यशऽइन्द्रेव्वयोदधद्वसुवनेंव्वसुधेयस्यव्वे
तुयजं ॥ ४४ ॥ देवोऽअग्निः । त्रिष्टुकृद्देवमिन्द्रंव्वयोधसन्दे
वोदेवमंवर्द्धयत् ॥ अतिच्छन्दसाच्छन्दसेन्द्रियङ्क्षत्रमिन्द्रेव्व
योदधद्वसुवनेंव्वसुवधेयस्यव्वेतुयजं ॥ ४५ ॥ अग्निमद्य ।
होतारमवृणीतायँय्यजमानꣳपचन्पक्तीꣳपचंन्पुरोडाशंम्बध्न
न्निन्द्रायव्वयोधसेच्छागम् ॥ सूपस्त्थाऽअद्यदेवोव्वनस्पतिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवदिन्द्रायवयोधसेच्छागेन ॥ अघत्तम्मेदुस्तः प्रतिपचता
ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥ ४६ ॥ [१२-४]
इतिश्रीवाजसनेयसंहितायाम् अष्टाविंशोऽध्यायः ॥ २८ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ समिद्धोऽअञ्जन्ने
कादश, यदक्क्रन्दस्त्रयोदश, समिद्धोऽअद्यद्वादश, केतुंकृण्वँ
श्चतुर्विंशति, श्चत्वारःषष्टिः [अ. २९ मं. ६० अनु. ४] ॥
हरिः ॐ ॥ समिद्धोऽअञ्जन् ॥ समिद्धोऽअञ्जन्कृदरम्मती

१. अ. २१ ॥ मं. ६१ ॥ त्वामद्यऽऋषऽ० १ ॥ इति प्रतीकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाङ्घृतमंग्ग्नेमधुंमुत्त्विपन्न्वंमानंः ॥ व्वाजीव्वहंन्न्वाजिनंञ्जातवे
दोदेवानांव्वक्षिप्प्रियमासधस्त्थंम् ॥१॥ घृतेनाञ्जन् ॥ घृते
नाञ्जन्त्सम्पथोदेवयानांन्प्रजानन्न्वाज्यप्प्येतुदेवान् ॥ अनुं
त्त्वासप्तेप्प्रदिशंः सचन्ताऽस्वधामस्म्मैयजंमानायधेहि॥२॥
ईड्यंश्च ॥ ईड्यश्चासिव्वन्द्यंश्चव्वाजिन्नाशुश्चासिमेध्यंश्चसप्ते ॥
अग्निष्ट्वांदेवैर्व्वसुंभिःसजोषांःप्प्रीतंव्वह्निंव्वहतुजातवेदाः ॥ ३ ॥
स्त्तीर्णम्बर्हिः। सुष्टरींमाजुषाणोरुपृथुप्प्रथंमानम्पृथिव्यांम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेभिर्युक्तमदितिः सजोषाः स्योनङ्कृण्वानासुवितेदधातु
॥ ४ ॥ एताऽउवः । सुभगाविश्वरूपाविपक्षोभिः श्रयमाणाऽ
उदातैः ॥ ऋष्वाःसतीःकुवषःशुम्भमानाद्वारोदेवीःसुप्प्राय
णाभवन्तु ॥ ५ ॥ अन्तरामित्रावरुणा ॥ अन्तरामित्रावरु
णाचरन्तीमुखँयज्ञानामभिसंविदाने ॥ उषासावाꣳसुहिर
ण्येसुशिल्पेऽऋतस्ययोनाविहसादयामि ॥ ६ ॥ प्रथमावा
म् ॥ प्रथमावाꣳसरथिनासुवर्णादेवौपश्यन्तौभुवनानिवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वा ॥ अपिप्रयुञ्चोदनावाम्मिमानाहोतारावृज्योतिः प्रदिशां
दिशन्ता ॥ ७ ॥ आदित्यैर्नः ॥ आदित्यैर्नोभारतीवष्टुयु
ज्ञ ँ सरस्वतीसहरुद्रैर्नऽआवीत् ॥ इडोपहूतावसुभिः सजोषा
युज्ञन्नोदेवीरमृतेषुधत्त ॥८॥ त्वष्टावीरम् ॥ त्वष्टावीरन्देवकाम
मञ्जजानुत्त्वष्टुरर्वाजायतऽआशुरश्वः ॥ त्वष्टेदंविश्वम्भुवनञ्ज
जानबहोः कुर्त्तारमिहयक्षिहोतः ॥९॥ अश्वोघृतेन ॥ अश्वोघृ
तेनुत्त्मन्न्यासमक्तुऽउपदेवाँ २॥ऽऋतुशःपाथऽएतु ॥ वनुस्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिर्द्दैवलोकम्प्रजानन्नग्निनाहुध्यास्वंदितानिंवक्षत् ॥ १० ॥
प्रजापतेस्तपसा । वावृधानःसद्योजातोदंधिषेयज्ञमंग्ने ॥
स्वाहांकृतेनहविषांपुरोगायाहिसाद्याहविरंदन्तुदेवाः ॥ ११ ॥
[११-१] यदक्रन्दः । प्रथमञ्जायंमानऽउद्यन्त्समुद्राद्
तवापुरीषात् ॥ श्येनस्यंपक्षाहंरिणस्यंबाहूऽउंपस्तुत्त्यम्महि
जातन्तेंऽअर्वन् ॥ १२ ॥ यमेनंदत्तम् ॥ यमेनंदत्तन्त्रितऽ
एंनमायुनगिन्द्रंऽएणम्प्रथमोऽअध्यंतिष्ठत् ॥ गन्धर्वोऽअस्य

१ इन्द्रऽएणम् । अत्र असमानपदत्वेनाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्०" (शु. य. प्रा. ३ अ. ८७ सू.) इत्यनेन णत्वं निपात्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रशनामंगृब्भ्णात्त्सूरादश्वंवसवोनिरंतष्ट ॥ १३ ॥ असिंयु
मः ॥ असिंयमोऽअस्यांदित्योऽअंर्वन्नसिंत्रितोगुह्येनव्रतेनं ॥
असिसोमेंनसमयाविपृंक्तऽआहुस्तेत्रीणिंदिविबन्धंनानि
॥ १४ ॥ त्रीणिंते ॥ त्रीणिंतऽआहुर्द्दिविबन्धंनानित्रीण्यप्प्सु
त्रीण्यन्तःसंमुद्रे ॥ उतेवंमेवरुंणश्छन्त्स्यर्वन्यत्रांतऽआहुः
पंरमञ्जनित्रंम् ॥ १५ ॥ इमातेंवाजिन् ॥ इमातेंवाजिन्नव
मार्ज्जनानीमाशफानांꣳसनितुर्न्निधानां ॥ अत्रांतेभद्रारंश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाऽअंपश्श्यमृतस्ययाऽअंभिरक्षंन्तिगोपाः ॥ १६ ॥ आत्क्मा
नंन्ते ॥ आत्क्मानंन्तेमनंसारादंजानामवोदिवापतयंन्तम्प
तङ्गम् ॥ शिरोंऽअपश्श्यम्पथिभिः सुगेभिंररेणुभिर्जेहंमान
म्पतत्रि ॥ १७ ॥ अंत्रांते । रूपमुत्तममंपश्श्यञ्जिगींषमा
णमिषऽआपदेगोः ॥ यदातेमर्त्तोऽअनुभोगमानडादिद्वसिं
ष्ठऽओषंधीरजीगः ॥ १८ ॥ अनुंत्त्वा ॥ अनुंत्त्वारथोऽअनु
मर्य्योंऽअर्व्वन्ननुगावोऽनुभगंः कुनीनांम् ॥ अनुव्रातांसस्त्तवं

१ अत्राते । अत्र ते परे अत्रशब्दस्य ह्रस्वाकारस्य "पूष्णो जहीमस्तेष्वत्र" (शु. य. प्रा. ३ अ. १२१ सू.) इत्यनेन दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुक्ख्यमीयुरनुदेवामंमिरेवीर्य्यन्ते ॥ १९ ॥ हिरंण्यशृङ्गो
यं÷ ॥ हिरंण्यशृङ्गोयोंऽअस्यपादामनोंजवाऽअवंरऽइन्द्रंऽ
आसीत् ॥ देवाऽइदंस्यहविरद्यंमायुन्योऽअर्वन्तम्प्रथमोऽअ
द्यतिंष्ठत् ॥ २० ॥ ईर्म्मान्तांसुंसिलिंकमद्यमासंꣳ ॥ ईर्म्मा
न्तांसुंसिलिंकमद्यमासुंसꣳशूरंणासोदिद्यासोऽअत्त्यां÷ ॥
हꣳसाऽइवश्रेणिशोयंतन्तेयदाक्षिषुर्द्दिव्यमज्ज्मुमश्वां÷
॥ २१ ॥ तवशरीरम् ॥ तवशरीरम्पतयिष्णवर्व्वन्तवंचित्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वातऽइवद्रंजीमान् ॥ तवशृङ्गाणिविष्ठितापुरुत्रारण्येषुजर्भुराणाचरन्ति ॥२२॥ उपप्र ॥ उपप्रागाच्छसनंवाज्यर्वादेवद्रीचामनसादीद्यानः ॥ अजःपुरोनीयतेनाभिरस्यानुपश्चात्कवयोयन्तिरेभाः ॥२३॥ उपप्र ॥ उपप्रागात्परमँस्यत्सधस्थमर्वाँ २॥ऽअच्छापितरंम्मातरंञ्च ॥ अद्यादेवाञ्जुष्टंतमोहिगम्याऽअथाशास्तेदाशुषेवार्य्याणि ॥२४॥ [१३-२] समिद्धोऽअद्य ।

---

१ ध्रजिमान् । अत्र "शृणुतत्विषिध्रजिभयत पिबेतस्मतिष्ठरक्षा मकारे" (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति तेन दीर्घे अजीमान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुषोदुरोणेदेवोदेवान्यंजसिजातवेदः ॥ आचुवहंमित्रमह
श्चिकित्वान्त्वन्दूतःकविरंसिप्रचेताः ॥२५॥ तनूनपात्पथः ॥
तनूनपात्पथऽऋतस्ययानान्मध्वांसमञ्जन्त्स्वदयासुजिह्व ॥ म
न्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरन्नः ॥२६॥ नरा
शꣳसंस्यमहिमानम् ॥ नराशꣳसंस्यमहिमानमेषामुपस्तोषा
मयजतस्ययज्ञैः ॥ येसुक्रतवःशुचयोधियन्धाःस्वदन्तिदेवा
ऽउभयानिहव्या ॥ २७॥ आजुह्वानऽईड्यः ॥ आजुह्वानऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईड्योवन्द्यश्चायाह्यग्नेवसुभिःसुजोषाः॥ त्वन्देवानामसियह्व
होतासऽएनान्यक्षीषितोयजीयान्॥२८॥ प्राचीनम्बर्हिः प्र
दिशापृथिव्यावस्तोरस्यावृज्यतेऽअग्रेऽअह्नाम्॥ व्युष्प्रथतेवि
तरंवरीयोदेवेभ्योऽअदितयेस्योनम्॥२९॥ व्यचस्वतीरुर्विया।
श्रयन्तामपतिभ्योनजनयःशुम्भमानाः॥ देवीर्द्वारोबृहतीर्वि
श्वमिन्वादेवेभ्योभवतसुप्रायणाः॥३०॥ आसुष्वयन्तीय
जतेऽउपाकेऽउषासानक्तासदतान्नियोनौ॥ दिव्येयोषणेबृहती

सं. ५३

१ उपाकेऽउषासा। अत्र एकारात्परस्य उष इत्यस्य ह्रस्वाकारस्य "उषमहोभिर्नक्ते°" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन दीर्घाकारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरुक्मेऽअधिश्रियं शुक्रपिशन्दधाने ॥ ३१ ॥ दैव्या होतारा । प्रथमा सुवाचा मिमाना यज्ञम्मनुषो यजध्यै ॥ प्रचोदयन्ता विदथेषु कारू प्राचीनज्योतिः प्रदिशा दिशन्ता ॥ ३२ ॥ आनः ॥ आनो यज्ञम्भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ॥ तिस्रो देवीर्बर्हिरेदꣳ स्योनꣳ सरस्वती स्वपसः सदन्तु ॥ ३३ ॥ यऽइमे । द्यावापृथिवी जनित्री रूपैरपिꣳशद्भुवनानि विश्वा ॥ तमद्य होत

१ अद्यहोतरि । अत्र "अद्य तं हकारचकारभवतवृणीमहेदेवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन हकारे परे दीर्घे प्राप्ते "नहोतरि" (शु. य. प्रा. ३ अ. ११६ सू.) इत्यनेन निषेधान्न दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिषितोयजींयान्देवन्त्वष्टारमिहयक्षिविद्वान् ॥ ३४॥ उपावसृजत्क्मन्यां । समञ्जन्देवानाम्पाथऽऋतुथाहवीꣳषि ॥ वनस्पतिः[1]शमितादेवोऽअग्निःस्वदन्तुहव्यम्मधुनाघृतेन॥३५॥ सुद्योजातः॥सुद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुःप्रदिशऽऋतस्यवाचिस्वाहाकृतꣳहविरदन्तुदेवाः ॥३६॥ [१२-३] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नकेत

१ वनस्पतिः । अत्र "पत्यौ च सकारेण" (शु. य. प्रा. ३ अ. ५० सू.) इत्यनेन पतिशब्दे परे वनशब्दः सकारेण व्यवधीयते । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वे रूपम् । "प्रकृत्या कपयोः खफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इत्यस्यापवादोऽयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥३७॥ जीमूत
स्येवभवति ॥ जीमूतस्येवभवतिप्रतीकंयद्वर्म्मीयातिसमदा
मुपस्थे ॥ अनाविद्धयातन्वाजयत्त्वꣳसत्त्वाव्वर्म्मणोमहिमा
पिपर्त्तु ॥ ३८ ॥ धन्वनागाः ॥ धन्वनागाधन्वनाजिञ्जयेमध
न्वनातीव्राःसमदोजयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्व
नासर्व्वाःप्रदिशोजयेम ॥ ३९ ॥ व्वक्ष्यन्तीवेत् ॥ व्वक्ष्यन्ती
वेदागनीगन्तिकर्णम्प्रियꣳसखायम्परिषस्वजाना ॥ योषेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिङ्क्षेवितुताधिधन्वज्याऽइयꣳसमंनेपारयंन्ती ॥ ४० ॥ तेऽ
आचरंन्ती ॥ तेऽआचरंन्तीसमंनेवयोषांमातेवंपुत्रम्बिभृता
मुपस्त्थें ॥ अपशत्रूंन्विद्ध्यताꣳसंविदानेऽआत्कींऽइमेविं
ष्फुरन्तींऽअमित्रांन् ॥ ४१ ॥ बुह्वीनाम्पिता । बुहुरंस्यपुत्र
श्चिश्चाकृणोतिसमंनावगत्त्यं ॥ इषुधिःसङ्काःपृतंनाश्चसर्वाः
पृष्ठेनिनंद्धोजयतिप्रसूतः ॥ ४२ ॥ रथेतिष्ठंन् ॥ रथेतिष्ठंन्नय
तिवाजिनंः पुरोयत्रंयत्रकामयंतेसुषारथिः ॥ अभीशूंनाम्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिमानम्पनायतुमनं÷पश्चादनुयच्छन्तिरश्मयं÷ ॥ ४३ ॥ तीव्रान्घोषान् ॥ तीव्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिः सहवाजयन्तः ॥ अवक्रामन्तःप्रपदैरमित्रान्क्षिणन्तिशत्रूँ १॥ऽरनपव्ययन्तः ॥४४॥ रथवाहणꣳहविः ॥ रथवाहणꣳहविरस्यनामयत्रायुधन्निहितमस्यवर्म्म ॥ तत्रारथमुपशग्गमꣳसदेमविश्वाहावयꣳसुमनस्यमानाः ॥ ४५ ॥ स्वादुषद्वसदः÷

१ रथवाहणः । अत्र थकारेण व्यवधानाण्णत्वाप्राप्तौ "निषण्णाय रथवाहणमिन्द्रऽएणम्परिणीयते समिन्द्रणऽउरुष्याणो रक्षाणः पूणःपुणःपूणासत्या स्वर्णास्थूरिणौप्रणऽआयूंषि" (शु. य. प्रा. ३ अ. ८७ क.) इत्यनेन णत्वं निपात्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितरः ॥ स्वादुषद्वसदः पितरो वयोधाः कृच्छ्रश्रितः शक्तीवन्तो गभीराः ॥ चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ४६ ॥ ब्राह्मणासः पितरः ॥ ब्राह्मणासः पितरः सोम्यासः शिवेनो द्यावापृथिवी अनेहसा ॥ पूषानः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंसः ईशत ॥ ४७ ॥ सुपर्णवस्ते । मृगो अस्यादन्तो गोभिः सन्नद्धा पतति प्रसूता ॥

१ शक्तीवन्तः । अत्र "अश्वरश्मिमतिसुमति०" (शु. य. प्रा. ३ अ. ९८ क.) इत्यनेन वन्त इति वकारे परे शक्तिशब्दस्य ह्रस्वेकारस्य दीर्घेकारः ।
२ रक्षामा । अत्र "शृणुतत्विषिध्रजि" (शु. य. प्रा. ३ अ. १११ सू.) इत्यनेन माकारे परे रक्षशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । तेन रक्षामा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रानरꣳसञ्चविचद्रवन्तितत्रास्मभ्यमिषवꣳशर्म्मयꣳसन् ॥४८॥ ऋजीतेपरि । वृङ्धिनोऽस्मांभवतुनस्तनूः ॥ सोमोऽ अधिब्रवीतुनोदितिꣳशर्म्मयच्छतु ॥ ४९ ॥ आजङ्घन्ति ॥ आजङ्घन्तिसान्वेषाञ्जघनाँ२॥ऽउपजिघ्नते ॥ अश्वांजनिष्प्र चेतसोश्वान्त्समत्सुचोदय ॥ ५० ॥ अहिरिवभोगैः । पर्य्ये तिबाहुञ्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुनानि विद्वान्पुमान्पुमांꣳसम्परिपातुविश्वतः ॥ ५१ ॥ वनं

१ यत्रानरः । अत्र "नरस्सप्तऽऋषीन्नस्तऽआहुर्नियुद्भिष्षु यत्र" (शु. य. प्रा. ३ अ. १२२ सू.) इत्यनेनात्र नरपरे यत्रशब्दाकारस्य दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पतेवीड्वङ्गः ॥ वनस्पतेवीड्वङ्गोहिभूयाऽअस्मत्संवाप्र
तरणःसुवीरः ॥ गोभिःसन्नद्धोऽअसिवीडयस्वास्थाता
तेजयतुजेत्वानि ॥ ५२ ॥ दिवः पृथिव्याः ॥ दिवः
पृथिव्याःपर्योजऽउद्भृतंवनस्पतिभ्यःपर्याभृतुहसहः ॥
अपामोज्मानम्परिगोभिरावृतमिन्द्रस्यवज्रंहविषारथँऽय
ज ॥ ५३ ॥ इन्द्रस्यवज्रः ॥ इन्द्रस्यवज्रोमरुतामनीक

१ दिवःपृथिव्याः । इत्यत्र "दिवोऽककुत्पृथिव्योः" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेनाककुत्पृथिव्योः सत्वनिषेधाद्विसर्जनीय एव नान्यत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्मित्रस्यगर्भोवरुणस्यनाभिः ॥ सेमान्नोहव्यदातिर्जुषाणो देवरथप्प्रतिहव्यागृभाय ॥ ५४ ॥ उपश्वासय । पृथिवीमुत द्याम्पुरुत्रातेमनुतांविष्ठितञ्जगत् ॥ सदुन्दुभेसजूरिन्द्रेणदेवै र्दूराद्दवीयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्रन्दय॥ आक्रन्द यबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः ॥ अपप्प्रो

१ सः इमाम् इति पदद्वयम् । अत्र "सऽओषधीमयोः" (शु. य. प्रा. ३ अ. १५ सू.) इत्यनेन इमे परे सपदघटितस्य विसर्जनीयस्य "लोपे च गुणे सेमाम्" इति सिद्ध्यति । २ निष्टनिहि । अत्र "नेः स्त्यास्तनोः" (शु. य. प्रा. ३ अ. ७० सू.) नेरुपसर्गात्परस्य स्त्यास्तनयोः सकारस्य षकारः । इति स्तनोः सकारस्य षत्वे ष्टुत्वे "ऊष्मान्तस्थाभ्यश्च स्पर्शः"। (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थदुन्दुभेदुच्छुनांऽइतऽइन्द्रंस्यमुष्टिरंसिवीडयंस्व ॥ ५६ ॥
आमूः ॥ आमूरंजप्प्रत्त्यावर्त्तयेमाः केतुमद्दुन्दुभिर्वावदी
ति ॥ समश्वंपर्णाश्चरन्तिनोनरोस्माकंमिन्द्ररथिनोंजयन्तु
॥ ५७ ॥ आग्नेयः कृष्णग्रीवः । सारस्वतीमेषीबभ्रुः
सौम्यः पौष्णः श्यामः शितिपृष्ठोबार्हस्पत्यः शिल्पोवैश्व

---

१ रथिनो जयन्तु । अत्र "ऋषरेभ्यः०" (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन "स्वरयवहकपैश्च" (शु. य. प्रा. ३ अ. ८६ सू.) इत्यनेनैतैर्व्यवधान-विहितस्य णत्वस्य विहितारिक्तशथकारव्यवधानेनाप्राप्तावपि "शिलिसिवर्गमध्यमव्यवहितोऽपि" (शु. य. प्रा. ३ अ. ९६ सू.) इत्यनेन प्रकृतिभावो विधीयते। इदं शिष्यबुद्धिव्युत्पादनार्थम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवऽऐन्द्रोरुणोमारुतꣳकुल्माषऽऐन्द्राग्नꣳसꣳहितोधोरामꣳ
सावित्रोवारुणꣳकृष्णऽएकशितिपात्त्पेत्त्वं÷ ॥ ५८ ॥ अग्न
येनीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनुद्वानुधोरामौसावि
त्रौपौष्णौरजतनाभीवैश्वदेवौपिशङ्गौतूपरौमारुतꣳकुल्माषं
ऽआग्नेयꣳकृष्णोजꣳसारस्वतीमेषीवारुणꣳपेत्त्वं÷ ॥ ५९ ॥
अग्नयेगायत्रायं । त्रिवृतेरथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टु
भायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्योजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतेब्भ्यः सप्तदशेब्भ्यो वैरूपेब्भ्यो द्वादशकपालो मित्रावरुणा
ब्भ्यामानुष्टुभाब्भ्यामेकविंशाब्भ्यां वैराजाब्भ्यां पयस्या बृह
स्पतये पाङ्क्तायत्रिणवाय शाक्वराय चरुः सवित्रऽऔष्णिहाय
त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै वि
ष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालो नुमत्याऽअष्टा
कपालः ॥६०॥ [२४-४] ॥ इति श्रीवाजसनेयसंहितायामेको-
नत्रिंशोऽध्यायः ॥२९॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्र-

सं. ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ देवसवितः षट्, तपसेकौलालꣳषोडश, द्वौ द्वाविꣳशतिः ॥
[अ. ३० मं. २२ अ. २] हरिःॐ ॥ देवसवितः ॥ देवसवितः
प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वः केतपूः
केतन्नः पुनातुवाचस्पतिर्व्वाचन्नः स्वदतु ॥ १ ॥ तत्सवितुः ॥
तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचो
दयात् ॥ २ ॥ विश्वानिदेव । सवितर्दुरितानिपरासुव ॥
यद्भद्रन्तन्नऽआसुव ॥ ३ ॥ विभुक्तारꣳहवामहे ॥ विभु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तारꣳ हवामहे वसोश्चित्रस्य राधसः ॥ सवितारं नृचक्षसम्
॥४॥ ब्रह्मणे ब्राह्मणम् ॥ ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यम्म्
रुद्राय वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणम्पा
प्मने क्लीबमाक्रयायाऽअयोगूङ्कामायपुँश्चलूमतिक्रुष्टाय
मागधम् ॥ ५ ॥ नृत्ताय सूतम् ॥ नृत्ताय सूतं गीताय शैलूषन्ध
र्म्माय सभाचरं नरिष्ठायै भीमलं नर्म्माय रेभꣳ हसाय कारिमान
न्दाय स्त्रीषखम्प्रमदे कुमारीपुत्रम्मेधायै रथकारन्धैर्य्याय तक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णम् ॥ ६ ॥ [६-१] तपंसेकौलालम् ॥ तपंसेकौलालम्मा
यायैकुम्मार्रंꣳरूपार्यमणिकारꣳशुभेव्वपꣳशंरघ्यायाऽइषुका
रꣳहेत्त्यैधंनुष्क्कारङ्कर्म्मणेज्याकारन्दिष्टायंरज्जुसर्ज्जम्मृत्त्यवें
मृगयुमन्तंकायश्चुनिनंम् ॥ ७ ॥ नदीब्भ्यं÷पौञ्जिष्ठम् ॥
नदीब्भ्यं÷पौञ्जिष्ठमृक्षीकांब्भ्योनैषांदम्पुरुषव्याग्घ्रायंदुर्म्मदं
ङ्गन्धर्व्वाप्सरोब्भ्योव्वात्त्यंम्प्रयुग्गभ्युऽउन्मंत्तꣳसर्प्पदेवजुने
ब्भ्योप्प्रतिपदुमयैंब्भ्यꣳकितवमीर्य्यतांयाऽअकितवम्पिशाचे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्भ्योंबिदलकारीँऽ्यांतुधानेंब्भ्यः कण्टकीकारीम् ॥ ८॥ सुन्ध
येंजारम्॥ सुन्धयेंजारङ्गेहायोंपपतिमात्त्यैंपारिंवित्तुन्निर्ऋत्त्यैप
रिविविदानमरांद्ध्याऽएदिधिषुंपतिन्निष्कृत्त्यैपेशस्क्कारीं
सुज्ज्ञानांयस्म्मरकारीम्प्रंकामोद्यांयोपसदुंवर्ण्णांयानुरुधम्ब
लांयोपदाम्॥ ९॥ उत्त्सादेब्भ्यं÷कुब्जम्॥ उत्त्सादेब्भ्यं÷कुब्ज
म्प्रमुदैंवामुनन्द्वाब्भ्यंःस्त्रामं स्वप्नांयान्धमधंम्मांयबधिरम्प
वित्रांयभिषजंम्प्रज्ज्ञानांयनक्षत्रदुर्शमांशिक्षायैंप्रश्निनंमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशिक्षायांऽअभिप्प्रश्निनंम्मुर्य्यादांयैप्प्रश्न्नविवाकम् ॥ १० ॥
अम्मैंब्भ्योहस्त्तिपम् ॥ अम्मैंब्भ्योहस्त्तिपञ्जुवायांश्चुपम्पुष्ट्यैं
गोपालंव्वीर्य्यायाविपालन्तेजंसेजपालमिरांयैकीनाशंङ्कीलालां
यसुराकारम्भुद्रायंगृहुप ँश्रेयंसेवित्तुधमाद्यंक्ष्यायानुक्षु
त्तारंम् ॥ ११ ॥ भायैंदार्व्वाहारम् ॥ भायैंदार्व्वाहारम्प्रभायांऽअ
ग्न्येधम्ब्रुद्ध्नस्यंव्विष्टपांयाभिषेक्तारंव्वर्षिंष्ठायुनाकांयपरिवेष्टा
रंन्देवलोकायंपेशितारंम्मनुष्यलोकायंप्प्रकरितारंहसर्व्वैंब्भ्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकेब्भ्यंऽउपसेक्तारमवंऽऋत्यैबुधायोंपमान्थितारम्मेधांय
वांसंपल्प्पूलीम्प्रंकामायंरजयित्रीम् ॥ १२ ॥ ऋतयेंस्तेनहृं
दयम् ॥ ऋतयेंस्तेनहृंदयंवैरंहत्यायपिशुनंविविंक्त्यैक्ष
त्तारमौपंद्रष्ट्यायानुक्षत्तारम्बलांयानुचरम्भूम्नेपंरिष्क्कु
न्दम्प्रियायंप्रियवादिनमरिंष्ट्याऽअश्वसादꣳस्वर्गायंलोकायं
भागदुघंवर्षिष्ठायनाकांयपरिवेष्टारंम् ॥ १३ ॥ मन्यवेंयस्त्ता

१ वासः पल्प्पूलीम् । अत्र "समानपदे" (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन षकारे प्राप्ते "वाजपतिर्वासऽएदिधिषुरन्तःपर्शन्येनान्तः पार्श्वयमिति च" (शु. य. प्रा. ३ अ. ३८ सू.) इति सूत्रेण वासशब्दघटितविसर्जनीयस्य षकारनिषेधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पम् ॥ मुन्यवेयस्त्तापङ्क्रोधायनिसुरँऽयोगायमोक्त्तारङ्शोका
याभिसुर्त्तारङ्क्षेमायविमोक्त्तारंमुक्त्कूलनिकूलेभ्यांस्त्रिष्ठिनंव
पुंषेमानस्कृतꣳशीलायाञ्जनीकारीन्निर्ऋत्त्यैकोशकारीँऽयुमा
यासूम् ॥ १४ ॥ युमायंयमसूम् ॥ युमायंयमसूमथर्व्व
भ्योवंतोकाꣳसंवत्त्सरायंपऽर्य्यायिणींम्परिवत्त्सरायाविजाता
मिदावत्त्सरायातीत्त्वंरीमिद्वत्त्सरायांतिष्क्कद्वंरींवत्त्सरायुवि
जंर्ज्जराꣳसंवत्त्सरायुपलिक्कनीमृभुभ्योंजिनसुन्धꣳसाद्येभ्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चैर्म्मुम्न्नम् ॥ १५ ॥ सरोंब्भ्योधैवुरम् ॥ सरोंब्भ्योधैवुरमुं
पुस्त्थावंराब्भ्योदाशंव्वैशुन्ताब्भ्योंबैन्दन्नंड्ड्वुलाब्भ्युंशौष्क्कं
लम्पारायंमार्ग्गारमंवारायंकेवर्त्तन्तीर्त्थेंब्भ्यंऽआन्दंव्विषंमे
ब्भ्योमैनालꣳस्वनेंब्भ्युंपर्ण्णंकुङ्गुहांब्भ्युंकिरांतुहसानुंब्भ्यो
जम्भंकुम्पर्व्वतेब्भ्यंकिम्पूरुषम् ॥ १६ ॥ बीभुत्सायैंपौ
ल्क्कुसम् ॥ बीभुत्सायैंपौल्क्कुसंव्वर्ण्णायंहिरण्यकारन्तुला

१ चर्म्मम्न्नम् । अत्र "ऋषरेभ्यो०" (शु.य.प्रा.३अ.८५सू.) इत्यनेन समानपदे प्राप्तस्य णत्वस्य "इन्द्राग्नी०" (शु.य.प्रा.३अ.९३सू.) इत्यनेन निषेधान्न णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यैर्वाणिजम्पश्चादोषायग्लाविनंविश्वेभ्योभूतेभ्यः सिद्धम्
लम्भूत्यैजागरणमभूत्यैस्वपनमात्यैजनवादिनंव्यृद्ध्याअपग
लभ्भ सं शुरायप्रच्छिदम् ॥ १७ ॥ अक्षराजायकित
वम् ॥ अक्षराजायकितवङ्कृतायादिनवदुर्शन्त्रेतायैकल्पिनं
न्द्वापरायाधिकल्पिनंमास्कन्दायसभास्त्थाणुम्मृत्यवेगो
व्यच्छमन्तकायगोघातङ्कुधेयोगांविकृन्तन्तम्भिक्षमाणऽउ
पतिष्ठतिदुष्कृतायचरंकाचार्य्यम्पाप्मनेसैलगम् ॥१८॥ प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्कांयाऽअर्त्तनम् ॥ प्रतिश्रुत्कांयाऽअर्त्तनङ्घोषांयभुषम
न्तांयबहुवादिनंमनुन्तायुमूकुद्दशब्दांयांडम्बराघातम्महंसेवी
णावादङ्क्रोशांयतूणवद्ध्मर्मवरस्प्परायंशङ्खद्ध्मंवनांयवनुप
मुन्यतोरण्यायदावुपम् ॥१९॥ नुर्म्मायंपुँश्चलूम् ॥ नुर्म्मायंपुँश्च
लूंहसांयुकारिँ्यादंसेशावुल्याङ्ग्रांमुण्युङ्गणंकमभिक्क्रोशं

---

१ आडम्बराघातम् । अत्र "त आघादनाडम्बरात्" (शु. य. प्रा. ३ अ. ४८ सू.) इत्यनेनानाडम्बरात्परस्य विधानादाघातशब्दघटितस्य तकारस्य मूर्धन्यत्वं (टः) न भवति । २ अवरस्प्पराय । अत्र "प्रकृत्या कखयोः पफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इति "अवरः" इत्यस्य विसर्गस्य प्रकृतिभावे प्राप्ते "ऋतावरौ च पतिपरयोः" (शु. य. प्रा. अ. ३ सू. ५०) ऋतः अवरश्च शब्दौ सकारेण व्यवधीयेते यथासंख्यं पतिपरयोः । इत्यनेनात्रावरशब्दस्य विसर्गस्य परे पदपरे सत्त्वे जाते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुन्तान्महसेवीणावादम्पाणिग्घ्नन्तूणवद्ध्मन्तान्नृत्तायान्
न्दायतलवम् ॥२०॥ अग्नयेपीवानम् ॥ अग्नयेपीवानम्पृथिव्यै
पीठसर्प्पिणेवायवेचाण्डालमन्तरिक्षायवꣳशनर्त्तिनन्दिवेखं
लतिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यꣳकिर्म्मिरञ्चन्द्रमसेकिला
समह्नेशुक्लम्पिङ्गाक्षꣳरात्र्यैकृष्णम्पिङ्गाक्षम् ॥२१॥ अथै
तान् ॥ अथैतानष्टौविरूपानालभतेतिदीर्घञ्चातिह्रस्वञ्चाति

१ अतिस्थूलम्। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ क.) इत्यनेन समानपदे स्थूलस्य सस्य षकारे प्राप्ते "अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसन्दशमभिसत्वाऽभिसंविशन्तु सुसस्यातिस्थूलं०" (शु. य. प्रा. अ. ३ सू. ८२) इत्यनेन प्रकृतिभावे न षत्वम्। तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति थस्य द्वित्वे चर्त्वे तकारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृष्णञ्चातिकुल्वञ्चातिलोम
शञ्च ॥ अशूद्राऽअब्राह्मणास्तेप्राजापत्याः ॥ मागधः पुँश्च
लीकितवःक्लीबोशूद्राऽअब्राह्मणास्तेप्राजापत्याः ॥ २२ ॥
[१६-२] इतिश्रीवाजसनेयसंहितायां त्रिंशत्तमोऽध्यायः
॥ ३० ॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ सहस्र-
शीर्षा षोडशा,च्यःसंभृतः षट्, द्वौ द्वाविंशतिः [अ. ३१
मं. २२ अनु. २] ॥ हरिःॐ ॥ सहस्रशीर्षापुरुषः । सह

सं. ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्राक्षः सहस्रपात् ॥ सभूमिꣳ सर्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएव ॥ पुरुषएवेदꣳ सर्वꣳ यद्भूतꣳ यच्च भाव्यम् ॥ उतामृतत्त्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य । महिमातो ज्यायाँश्च पूरुषः ॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥ त्रिपादूर्द्ध ॥ त्रिपादूर्द्धऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततो विष्वङ् व्यक्राम त्साशनानशनेऽअभि ॥ ४ ॥ ततो विराट् ॥ ततो विराडजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतद्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमि
मथोपुरः ॥५॥ तस्मा॑द्यज्ञात् ॥ तस्मा॑द्यज्ञात्सर्व्वहुतः सम्भृ
तम्पृषदाज्यम् ॥ पशूँस्त्ताँश्चक्रेवायुव्यानारण्याग्राम्या
श्चये ॥६॥ तस्मा॑द्यज्ञात् ॥ तस्मा॑द्यज्ञात्सर्व्वहुतऽऋचः
सामानिजज्ञिरे ॥ छन्दा॑ꣳसिजज्ञिरेतस्मा॑द्यजुस्तस्मा॑द
जायत ॥ ७ ॥ तस्मा॑दश्वा॑ ॥ तस्मा॑दश्वा॑ऽअजायन्त
येकेचोभयादतः ॥ गावोहजज्ञिरेतस्मा॑त्तस्मा॑ज्जाताऽअ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जावयं÷ ॥ ८ ॥ तँय्युज्ज्ञम् ॥ तँय्युज्ज्ञम्बर्हिषिप्प्रौक्षन्पुरुष
ज्ञातऽमग्ग्रतः ॥ तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ॥ ९ ॥
यत्पुरुषम् ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुख
ङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्म
णोस्य ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः÷कृतः ॥ ऊरू
तदस्ययद्वैश्यः÷पद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमा
मनसः ॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रोत्रांद्वायुश्चप्प्राणश्चमुखांदग्निरजायत ॥ १२ ॥ नाभ्यांऽ
आसीत् ॥ नाभ्यांऽआसीदुन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्त
त ॥ पद्भ्याम्भूमिर्द्दिशꣳश्रोत्रात्तथांलोकाँ२॥ऽअकल्पयन्
॥ १३ ॥ यत्पुरुषेण । हविषांदेवायज्ञमतन्वत ॥ वसन्तो
स्यासीदाज्यंग्रीष्म्मऽइद्धमः शरद्धविः ॥ १४ ॥ सप्तास्यां
सन् ॥ सप्तास्यांसन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवा
यद्यज्ञन्तन्वानाऽअबंद्धन्पुरुषम्पशुम् ॥१५॥ यज्ञेनयज्ञ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानः सचन्तयत्रपूर्व्वेसाध्याःसन्तिदेवाः ॥ १६ ॥ [१६-१] अद्भ्यःसम्भृतः । पृथिव्यैरसाच्चाविश्वकर्म्मणःसमवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ १७ ॥ वेदाहम् ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसःपरस्तात् ॥ तमेवविदित्वा

१ तमसःपरस्तात् । अत्र "तमसोऽपरस्तात्" (शु. य. प्रा. ३ अ. २६ सू.) इत्यनेन विधीयमानं सत्वं न भवति तत्रापरस्तादित्युक्तत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिंमृत्युमेंतिनान्यः पन्थांविद्यतेयंनाय ॥ १८ ॥ प्रजापंति
श्चरति ॥ प्रजापंतिश्चरतिगर्भेंऽअन्तरजांयमानोबहुधाविजां
यते ॥ तस्ययोनिम्परिंपश्यन्तिधीरास्तस्मिंन्हतस्थुर्भुवं
नानिविश्वां ॥१९॥ योदेवेभ्यं÷ ॥ योदेवेभ्यंऽआतपंतियो
देवानांम्पुरोहितः ॥ पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मंये
॥ २० ॥ रुचम्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयंन्तोदेवाऽअग्रेत
दब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यंदेवाऽअंसन्वशे ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीश्चं ॥ श्रीश्चंतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूप
मश्विनौव्यात्तम् ॥ इषणन्निषाणामुम्मऽइषाणसर्वलोकम्मऽ
इषाण ॥ २२ ॥ [६-२] ॥ इतिश्रीवाजसनेयसंहितायामे-
कत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ श्रीवेदपुरुषाय नमः ॥ अनु-
वाकसूत्रम् ॥ तदेव सप्त, द्वेनस्तन्नव, द्वौ षोडश [अ. ३२ मं.
१६ अनु. २] ॥ हरिःॐ ॥ तदेव ॥ तदेवाग्निस्तदादित्यस्त
द्वायुस्तदुचन्द्रमाः ॥ तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्रजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिः ॥१॥ सर्वैनिमेषाः ॥ सर्वैनिमेषाजज्ञिरेविद्युतःपुरुषा
दधि ॥ नैनमूर्द्धन्नतिर्य्यञ्चन्नमद्येपरिजग्रभत् ॥ २ ॥ नतस्य ।
प्रतिमाऽअस्तियस्यनामहद्यशः ॥ हिरण्यगर्भऽइत्येष
मामाहिꣳसीदित्येषायस्मान्नजातऽइत्येषः ॥ ३ ॥ एषोह ।
देवःप्रदिशोनुसर्वाःपूर्वोहजातःसऽउगर्भेऽअन्तः ॥ सऽएव
जातःसजनिष्यमाणःप्रत्यङ्जनास्तिष्ठतिसर्वतोमुखः ॥४॥

१ हिरण्यगर्भःसं० चत्वारि० ४ अ. २५ मंत्र १०।११।१२।१३। ॥ १ मामाहिꣳसीत्. १ अ. १२ मं. १०२ ॥ १ यस्मान्न. १ १ इंद्रश्च. १ अ. ८ मं. ३६ मं. ३७ ॥ इति प्रतीकानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्म्माज्जातम् ॥ यस्म्माज्जातन्नपुराकिञ्चनैवयऽआबभूवभुवनानिविश्वा ॥ प्रजापतिःप्रजयासꣳरराणस्त्रीणिज्योतींꣳषिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्रापृथिवीचदृढायेनस्वःस्तभितँयेननाकः ॥ योऽअन्तरिक्षेरजसोविमानःकस्म्मैदेवायहविषाविधेम ॥ ६ ॥ यङ्क्रन्दसी ॥ यङ्क्रन्दसीऽअवसातस्तभानेऽअभ्यैक्षेतामनसारेजमाने ॥ यत्राधिसूरऽउदितोविभातिकस्म्मैदेवायहविषाविधेम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आपोहयद्बृहतीर्य्यश्चिदापः ॥७॥ [७-१] द्वेनस्तत् ॥ द्वेन
स्तत्तत्पश्यन्निहितङ्गुहासद्यत्रविश्वम्भवत्येकनीडम्॥ तस्मिन्
निदꣳसञ्चविचैतिसर्वꣳसऽओतꣳप्रोतंश्चविभूः प्रजासु ॥८॥
प्रतत् ॥ प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वोधामविभृतङ्गुहासत् ॥
त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुः पितासत् ॥९॥
सनः ॥ सनोबन्धुर्जनितासविधाताधामानिवेदभुवनानि

१ आपोह. १ यश्चित्. १ अ. २८ मं. २५ मं. २६ इति प्रतीके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नध्यैरयन्त ॥ १० ॥ परीत्यभूतानि । परीत्यलोकान्परीत्यसर्वाः प्रदिशोदिशश्च ॥ उपस्थायप्रथमजामृतस्यात्कमनात्कमानमभिसंविवेश ॥ ११ ॥ परिद्यावापृथिवी । सद्यऽइत्वापरिलोकान्परिदिशःपरिस्वः ॥ ऋतस्यतन्तुंवितंतंविचृत्यतदपश्यत्तदभवत्तदासीत् ॥ १२ ॥ सदसस्पतिम् ॥ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम् ॥ सनिम्मेधामयासिषꣳस्वाहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ याम्मेधाम् ॥ याम्मेधान्देवगणाः पितरश्चोपासते ॥
तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहा ॥ १४ ॥ मेधाम्मे ॥
मेधाम्मेवरुणोददातुमेधामग्निः प्रजापतिः ॥ मेधामिन्द्रश्च
वायुश्चमेधान्धातादददातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इदम्मे
ब्रह्मचक्षुत्रञ्चोभेश्रियमश्नुताम् ॥ मयिदेवादधतुश्रियमुत्तं
मान्तस्यैतेस्वाहा ॥ १६ ॥ [९-२] ॥ इतिश्रीवाजसनेय-
संहितायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीवेदपुरुषाय नमः ॥

सं. ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुवाकसूत्रम्॥ अस्याजरासः सप्तदशा, पश्चित् द्वादश, विब्भ्राट् चतुर्दश, प्रवावृजऽएकादश, प्रवायुं पञ्चदश, प्रवीरया पञ्चदश, ऽआनस्त्रयोदश, सप्त सप्तनवतिः [अ. ३३ मं. ९७ अनु. ७]॥ हरिःॐ॥ अस्याजरासः ॥ अस्याजरासोदुमामरित्राऽअर्चद्धूमासोऽअग्नयः पावकाः ॥ श्वितीचयः श्वात्रासौभुरण्यवोवनर्षदोवायवोनसोमाः ॥ १ ॥ हरयोधूमकेतू

१ वनसदः इति पदम्। अत्र "वनसदोऽवेरो रेफेण" (शु. य. प्रा. ३ अ. ४८ सू.) इत्यनेन सदशब्दे परे वनशब्दो रेफेण व्यवधीयते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवꣳ ॥ हरयोधूमकेतवोवातंजूताऽउपद्यविं ॥ यतन्तेवृथग्ग्नयः ॥ २ ॥ यजानꣳ ॥ यजानोमित्रावरुणायजादेवाँ२॥ऽऋतम्बृहत् ॥ अग्नेयक्षिस्वन्दमम् ॥ ३ ॥ युक्ष्वाहि । देवहूतमाँ२॥ऽअश्वाँ२॥ऽअग्नेरथीरिव ॥ निहोतापूर्व्यःसदꣳ ॥४॥ द्वेविरूपे । चरतꣳस्वर्थेऽअन्यान्यांवृत्समुपधापयेते ॥ हरिरन्यस्याम्भवतिस्वधावांञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्चाꣳ

१ यजानो । अत्र यजशब्दस्य ह्रस्वाकारस्य नः इति नकारे परे "धारयाव स्वेजाव" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारः । २ स्वधावान्छुक्रः । अत्र "शकारे च" (शु. य. प्रा. ४ अ. ९६ सू.) इत्यनेन शकारे परे तवर्गश्चवर्गं प्राप्नोति । अतः शुक्रस्य शकारे परे स्वधावान् इत्यस्य नकारस्य ञकारः । ततः "परश्चास्पर्शपरश्छम्" (शु. य. प्रा. ४ अ. ९७ सू.) इत्यनेन शकारस्य छकारे कृते "स्वधावाञ्छुक्र" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५ ॥ शतम् ॥ १७०० ॥ अयमिह । प्रथमोधायिधातृ
भिर्होतायजिष्ठोऽअद्धरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरु
चुर्वनेषुचित्रंविभ्वंविशेविशे ॥ ६ ॥ त्रीणिशता । त्रीसहस्रा
ण्यग्निन्त्रिंशच्चदेवानवचासपर्य्यन् ॥ औक्षन्घृतैरस्तृणन्ब
र्हिरस्मऽआदिद्धोतारन्न्यसादयन्त ॥ ७ ॥ मूर्द्धानन्दिवः ॥
मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥
कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निर्वृत्राणि । जङ्घनद्द्विणस्युर्विपन्यया ॥ समिद्धः शु
क्रऽआहुतः ॥९॥ विश्वेभिः सोम्यम् ॥ विश्वेभिः सोम्यम्म
द्धग्नऽइन्द्रेणवायुना ॥ पिबामित्रस्य धामभिः ॥१०॥ आयत् ॥
आयदिषेनृपतिन्तेजऽआनट्शुचिरेतोनिषिक्तन्द्यौरभीके ॥
अग्निः शर्द्धमनवद्यँयुवानꣳस्वाद्ध्यञ्जनयत्सुदयञ्च ॥११॥
अग्नेशर्द्ध । महतेसौभगायतवद्युम्नान्युत्तमानिसन्तु ॥

---

१ पिबामित्रस्य । अत्र "शृणुतत्विषिध्रजिभवतपिबेतस्यमतिष्ठरक्षा मकारे" (शु. य. प्रा. ३ अ. ११७ क.) इत्यनेन मकारे बस्य दीर्घे पिबामित्रस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सञ्ज्ञास्पृत्त्यꣳसुयमुमाकृणुष्वशत्रूयुतामुभितिष्ठामहांꣳसि ॥ १२ ॥ त्वाꣳहि । मुन्द्रतंममर्क्कशोकैर्व्वंवृमहेमहिनꣳश्रोषष्यंग्ने ॥ इन्द्रन्नत्त्वाशवंसादेवतांद्वायुम्पृणन्तिराधंसानृतंमाꣳ ॥ १३ ॥ त्वेऽअंग्ने । स्वाहुतप्रियासꣳसन्तुसूरयंꣳ ॥ यन्तारोयेमघवांनोजनांनामूर्व्वान्दयंन्तुगोनांम् ॥ १४ ॥ श्रुधिश्रुत्तकर्ण्ण ॥ श्रुधिश्रुत्तकर्ण्णवह्निभिर्द्देवैरंग्नेसयावंभिꣳ ॥ आसीदन्तुबर्हिषिमित्रोऽअर्य्यमाप्प्रातुर्य्यावांणोऽअध्वरम् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वेषामदितिः ॥ विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ॥ अग्निर्देवानामवऽआवृणानः सुमृडीको भवतु जातवेदाः ॥ १६ ॥ महोऽअग्नेः । समिधानस्य शर्म्मण्यनागा मित्रे वरुणे स्वस्तये ॥ श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽअद्यावृणीमहे ॥ १७ ॥ [१७-१] आपश्चित् ॥ आपश्चित्पिप्युस्तृर्यो न गावो नक्षन्नृतज्ञा रितारस्तऽ

१ अद्या वृणीमहे । अत्र "अद्य तं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन अद्य इत्यस्य वृणीमहे परे दीर्घे अद्यावृणीमहे अद्य शब्दस्य दकारस्य स्वरात्सं० इत्यनेन द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्र ॥ याहिवायुर्न्नियुतोनोऽअच्छात्त्वꣳहिधीभिर्दयसेवि
वाजान् ॥ १८ ॥ गावऽउप ॥ गावऽउपावतावतम्महीयज्ज्ञ
स्यरप्प्सुदा ॥ उभाकर्णाहिरण्ययाः ॥ १९ ॥ यदद्य । सूरऽ
उदितेनागामित्रोऽअर्य्यमा ॥ सुवातिसविताभगः ॥ २० ॥
आसुतेसिञ्चतश्रियद्धरोदस्योरभिश्रियम् ॥ रसादधीतवृष
भम् ॥ तम्प्रत्क्रथायंवेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आति

१ तम्प्रत्क्रथा. १ अ. ७ मं. १२ ॥ १ अयंवेनः. १ अ. ७ मं. १६ ॥ इति प्रतीके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठन्तम्परिविश्वैऽअभूषञ्छ्रियोवसानश्चरतिस्वरोचिः ॥ मुहुत्त
द्वृष्णोऽअसुरस्यनामाविश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥
प्रवः ॥ प्रवोमहेमन्दमानायान्धसोर्चाविश्वानरायविश्वाभुवे ॥
इन्द्रस्ययस्यसुमखहसहोमहिश्रवोनृम्णञ्चरोदसीसपर्य्यतः ॥
॥ २३ ॥ बृहन्नित् ॥ बृहन्निदिद्धमऽएषाम्भूरिशुस्तम्पृथुः
स्वरुः ॥ येषामिन्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहि

---

१ अर्चाविश्वानराय । अत्र "अश्वरश्मिमतिसुमति०" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन विश्वानराय इत्यस्य वकारे परे अर्चशब्दस्य ह्रस्वाकारस्य दीर्घाकारः । २ विश्वानराय । अत्र "नरहामित्रेषु च" (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन नरशब्दे परे विश्वशब्दाकारस्य दीर्घाकारो विधीयते । ३ विश्वाभुवे । अत्र "विश्व सहभुवपुषवसुषु" । (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन भुवे परे विश्वशब्दाकारस्य दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्त्स्यन्धसोविश्वेभिः सोमपर्वभिः ॥ महाँ२॥ऽअभिष्टिरोजसा ॥ २५ ॥ इन्द्रोवृत्रम् ॥ इन्द्रोवृत्रमवृणोच्छर्द्धनीतिः प्रमायिनाममिनाद्वर्ष्णीतिः ॥ अहन्व्यंसमुशधग्गवनेषष्वाविर्द्धेनाऽअकृणोद्राम्याणाम् ॥ २६ ॥ कुतस्त्वम् ॥ कुतस्त्वमिन्द्रमाहिनः सन्नेकोयासिसत्पतेकिन्तऽइत्था ॥ सम्पृच्छसे समराणः शुभेनैवोचेस्तन्नोहरिवोयत्तेऽअस्मे ॥ महाँ२॥ऽइ

१ महाँ२॥ऽइन्द्रोय. १ अ. ७ मं. ४० ॥ १ कदाचन. अ. ८ मं. २ ॥ १ कदाचनप्र. अ. ८ मं. ३ ॥ इति प्रतीकानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रोयऽओजसाकुदाचुनस्त्तुरीरसिकुदाचुनप्प्रयुच्छसि ॥२७॥
आतत् ॥ आतत्तंऽइन्द्रायवं÷पनन्ताभियऽऊर्वङ्गोमन्तुन्ति
तृत्सान् ॥ सुकृत्स्वँऽयेपुरुपुत्राम्मुहीꣳसुहस्त्रंधाराम्बृहुतीन्दु
दुक्षन् ॥ २८॥ इमान्तें ॥ इमान्तेधियुम्प्रभरेमुहोमुहीमुस्य
स्त्तोत्रेधिषणायत्तंऽआनुजे ॥ तमुत्त्सुवेचंप्प्रसुवेचंसासुहिमि
न्द्रंन्देवासुꣳशवंसामदुन्ननुं ॥ २९॥ [१२-२] ब्विभ्राड्बृहत् ॥

१ "दुदुक्षन्" । अत्र दुधुक्षन् इति पदम् । "दुधुक्षन्धो दकारम्" (शु. य. प्रा. ३ अ. ५५ सू.) इत्यनेन दुधुक्षन् शब्दघटितस्य धकारस्य दकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विन्भ्राड्बृहत्पिबतुसोम्यम्मद्ध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ॥
वातंजूतोयोऽअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराज
ति ॥३०॥ उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥
दृशेविश्वायसूर्य्यम् ॥३१॥ येनापावक ॥ येनापावकचक्षसा
भुरण्यन्तञ्जनाँ२॥ऽअनु ॥ त्वंवरुणपश्यसि ॥३२॥ दैव्यावद्ध्वर्य्यू ॥ दैव्यावद्ध्वर्य्यूऽआगतुरथेनसूर्य्यत्वचा ॥ मद्ध्वा
यज्ञꣳसमञ्जाथे ॥ तम्प्रत्क्रथायंवेनश्चित्रन्देवानाम् ॥ ३३ ॥

१ तंप्रत्क्रथा. १ अ. ७ मं. १२ ॥ १ अयंवेनश्चो० १ अ. ७ मं. १६ ॥ १ चित्रंदेवानाम्. १ अ. १३ मं. ४६ ॥ इति प्रतीकानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनः ॥ आनऽइडाभिर्विदथेसुशस्तिविश्वानरःसवितादेवऽ
एतु ॥ अपियथायुवानोमत्सथानोविश्वञ्जगदभिपित्वेमनी
षा ॥ ३४ ॥ यदद्य । कच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्व
न्तदिन्द्रतेवशे ॥ ३५ ॥ तरणिर्विश्वदर्शतः ॥ तरणिर्विश्वदर्श
तोज्योतिष्कृदसिसूर्य्य ॥ विश्वमाभासिरोचनम् ॥ ३६ ॥ तत्सू
र्य्यस्य । देवत्वन्तन्महित्वम्मध्याकर्त्तोर्वितंततसञ्जभार ॥

---

१ मत्सथ नः इति पदम् । अत्र मत्सथ इत्यस्य थकारस्य ह्रस्वाकारस्य नः इति नकारे परे "धारयाम०" (ऋ. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारे मत्सथानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेदयुक्तहरितः सधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ ३७॥ तन्मित्रस्य ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितःसम्भरन्ति ॥ ३८ ॥ बण्ण्महान् ॥ बण्ण्महाँ२॥ऽअसि सूर्य्यबडादित्यमहाँ२॥ऽअसि ॥ महस्तेसतोमहिमापनस्य तेद्धादेवमहाँ२॥ऽअसि ॥ ३९ ॥ बट्सूर्य्य ॥ बट्सूर्य्यश्रवसा

१ अत्र बट्महान् । "पञ्चमे पञ्चमम्" (शु. य. प्रा. ४ अ. १२१ सू.) इत्यनेन पञ्चमे स्पर्शे परे अपञ्चमः स्पर्शः पञ्चमो भवति । इति टस्य णकारे द्वित्वे च रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुहाँ२॥ऽअंसिसुत्रादेंवमुहाँ२॥ऽअंसि ॥ मुह्वादेवानांमसुर्य्यः÷
पुरोहितोव्विभुज्योतिरदांब्भ्यम् ॥४०॥ श्रायंन्तऽइवसूर्य्यम् ॥
श्रायंन्तऽइवसूर्य्यंव्विश्वेदिन्द्रंस्यभक्षत ॥ व्वसूंनिजातेजनंमा
नऽओजंसाप्प्रतिंभागन्नदींधिम ॥४१॥ अद्यादेंवाः ॥ अद्यादें
वाऽउदिंतासूर्य्यंस्यनिरंहंसःपिपृतानिरंवद्यात् ॥ तन्नोंमित्रो
व्वरुणोमामहन्तामदिंतिःसिन्धुंः÷पृथिवीऽउतद्यौः ॥ ४२ ॥

---

१ अद्यदेवाः । अत्र "अद्य तं हकारचकारभवत वृणीमहे देवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन देवाः इति परे दीर्घे अद्यादेवाः । २ पिपृत निरवद्यात् इति पदम् । अत्र तकाराकारस्य निघटितनकारे परे "धारयामः०" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घे पिपृतानिरवद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकृष्णेन ॥ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्म
र्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्
न् ॥ ४३ ॥ [१४-३] प्रवावृजे । सुप्रयाबर्हिरेषामावि
श्पतीवबीरिटऽइयाते ॥ विशामक्तोरुषसः पूर्व्वहूतौवायुः
पूषास्वस्तयेनियुत्वान् ॥ ४४ ॥ इन्द्रवायूबृहस्पतिम् ॥
इन्द्रवायूबृहस्पतिम्मित्राग्निम्पूषणम्भगम् ॥ आदित्या

१ प्रववृजे इति पदम् । अत्र "ववृधवृजोः" (शु. य. प्रा. ३ ण. ११४ सू.) इत्यनेन वृजे परे वेत्यस्य ह्रस्वाकारस्य दीर्घाकारे प्रवावृजे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मारुतङ्गणम् ॥ ४५ ॥ वरुणꣳप्राविता । भुवन्मित्रोविश्वाभिरूतिभिः ॥ करतान्नꣳसुराधसꣳ ॥ ४६ ॥ अधिनꣳ ॥ अधिनऽइन्द्रैषांविष्णोसजात्त्यानाम् ॥ इतामरुतोऽअश्विना ॥ तम्प्रत्क्रथायंवेनोयेदेवासऽआनऽइडाभिर्विश्वेभिꣳसोम्यम्मद्धोमासश्चर्षणीधृतꣳ ॥४७॥ अग्नऽइन्द्र ॥ अग्नऽइन्द्रवरुणमित्रदेवाꣳशर्द्धꣳप्रयन्तुमारुतोतविष्णो ॥ उभा

१ इतमरुतः । अत्र "शृणुतत्विषिध्रजिभवतपिवेतस्मतिष्ठरक्षा मकारे" (शु. य. प्रा. अ. ३ सू. ११७) इत्यनेन मकारे परे दीर्घे इतामरुतः । २ तंप्रत्क्रथा. अ. ७ मं. १२ ॥ १ अयंवेनः. अ. ७ मं. १६ ॥ १ येदेवासः. अ. ७ मं. १९ ॥ १ आनऽइडाभिः. अ. ३३ मं. ३४ ॥ १ विश्वेभिꣳ सोम्यम्. अ. ३३ मं. १० ॥ १ ओमासश्चर्षणीधृतः. अ. ७ मं. ३३ ॥ इति प्रतीकानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासत्त्यारुद्रोऽअध्वग्ना? पूषाभगः सरस्वतीजुषन्त ॥ ४८ ॥
इन्द्राग्नीमित्रावरुणा ॥ इन्द्राग्नीमित्रावरुणादितिꣳस्व÷
पृथिवीन्द्याम्मरुतः पर्वताँ२॥ऽअप? ॥ हुवेविष्णुंम्पूषणम्ब्रह्म
णस्पतिम्भगन्नुशꣳसंꣳसवितारमूतये ॥४९॥ अस्मेरुद्रा? ॥
अस्मेरुद्रामेहनापर्वतासोवृत्रहत्त्येभरहूतौसजोषाः ॥ यꣳ
शꣳसंतेस्तुवतेधायिपज्ज्रऽइन्द्रंज्येष्ठाऽअस्माँ२॥ऽअवन्तुदे
वा? ॥५०॥ अर्वाञ्चोऽअद्य ॥ अर्वाञ्चोऽअद्याभवतायजत्राऽ

१ अद्य भवत । अत्र "अद्य तं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. अ. ३ सू. ११५) इत्यनेन भवतपरे दीर्घे अद्याभव इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवोहार्द्दिभयंमानोध्ययेयम् ॥ त्राद्ध्वंन्नोदेवानिजुरोवृकंस्यु
त्राद्ध्वंङ्कुर्त्तादंवपदोयजत्राः ॥ ५१ ॥ विश्वेंऽअद्य । मरुतोविं
श्वेऽऊतीविश्वेंभवन्त्वग्नयःसमिद्धाः ॥ विश्वेंनोदेवाऽअवसा
गंमन्तुविश्वंमस्तुद्रविंणंवाजोंऽअस्म्मे ॥ ५२ ॥ विश्वेंदेवाः ।
शृणुतेमंहवंम्मेयेऽअन्तरिंक्षेयऽउपद्यंविष्ठ ॥ येऽअंग्निजि
ह्वाऽउतवायजंत्राऽआसद्यास्मिन्बर्हिषिंमादयद्धम् ॥ ५३ ॥

२ उपद्यविष्ठ । "द्यवेश्च" (शु. य. प्रा. अ. ३ सू. ५९) इत्यनेन द्यविशब्दात्परस्य स्थघटितसकारस्य षत्वे ष्टुत्वे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. अ. ४ सू. १०२) इत्यनेन ठकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेब्भ्योहि । प्प्रथमँऽयज्ज्ञियेब्भ्योमृतत्त्वꣳसुवसिंभागमुत्त
मम् ॥ आदिद्दामानꣳसवितुर्व्यूर्णुषेनूचीनाजीवितामानुषे
ब्भ्यः ॥ ५४ ॥ [११-४] प्रवायुम् ॥ प्रवायुमच्छाबृहती
मनीषाबृहद्रयिंविश्ववारꣳरथप्राम् ॥ द्युतद्यामानियुतःपत्त्य
मानःकविःकविमियक्षसिप्प्रयज्यो ॥५५॥ इन्द्रंवायूऽइमे ।
सुताऽउपप्प्रयोभिरागतम् ॥ इन्दवोवामुशन्तिहि ॥ ५६ ॥
मित्रꣳहुवे । पूतदक्षंवरुणञ्चरिशादसम् ॥ धियंघृताचीꣳसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धन्ता ॥५७॥ दस्रांयुवाकंवं । सुतानासंत्त्याव्वृक्तबंर्हिषं ॥
आयांतꣳरुद्रवर्त्तनी ॥ तम्प्रत्क्रथायंव्वेनः ॥५८॥ व्विदद्यदीं ॥
व्विदद्यदींसुरमांरुग्गणमद्रेर्म्महिपाथं÷पूर्व्यꣳसुद्ध्यूक्कं ॥
अग्ग्रंन्नयत्त्सुपद्यक्षंराणामच्छारवंम्प्रथमाजांनुतीगांत् ॥५९॥
नुहिस्प्पशंम् ॥ नुहिस्प्पशमविंदन्नुन्यमुस्म्माद्वैश्वानुरात्त्पुरऽ
एतारंमुग्ग्नेः ॥ एमेंनमवृधन्नमृताऽअमंर्त्त्यंव्वैश्वानुरङ्गैत्रंजि

१ तंप्रत्क्रथां, अ. ७ मं. १२ ॥ १ अयंव्वेनः. अ. ७ मं. १६ ॥ इति प्रतीके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्यायदेवाः ॥ ६० ॥ उग्राविघनिनां ॥ उग्राविघनिनामृधऽ
इन्द्राग्नीहवामहे ॥ तानोमृडातऽईदृशे ॥ ६१ ॥ उपास्मै ।
गायतानरःपवमानायेन्दवे ॥ अभिदेवाँ२॥ऽइयक्षते ॥६२॥
येत्त्वा ॥ हिहत्त्येमघवन्नवर्द्धन्येशाम्बरेहरिवोयेगविष्टौ ॥ येत्त्वा
नूनमनुमदन्तिविप्राःपिबेन्द्रसोमुद्सगणोमुरुद्भिः ॥ ६३ ॥
जनिष्ठाऽउग्रः । सहसेतुरायमुरायमुन्द्रऽओजिष्ठोबहुलाभि

१ गायत नरः इति पदम् । तकारोत्तरवर्त्तिनो ह्रस्वाकारस्य नकारे परे "धारयाम०" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घे गायतानरः इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानः ॥ अवर्द्धन्निन्द्रम्मरुतश्चिदत्रमातायद्वीरन्दधनद्धनिष्ठा ॥ ६४ ॥ आतु ॥ आतूनऽइन्द्रवृत्रहन्नस्माकमुद्भमागहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्वमिन्द्र ॥ त्वमिन्द्रप्रतूर्त्तिष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनिताविश्वतूरसित्वन्तूर्य्यतरुष्यतः ॥ ६६ ॥ अनुते ॥ अनुतेशुष्मन्तुरयन्तमीयतुःक्षोणीशिशुन्नमातरा ॥ विश्वास्तेस्पृधः श्न

१ आतु न इन्द्रः इति पदम्। तुकारोत्तरवर्तिनो ह्रस्वोकारस्य "धारय।म°" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन नकारे परे दीर्घे आतून इन्द्र इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थयन्तमुन्यवेंवृत्रँऽयदिन्द्रतूर्वसि ॥ ६७॥ युज्ज्ञोदेवानाम् ॥
युज्ज्ञोदेवानाम्प्रत्त्येतिसुम्नमादित्त्यासोभवंतामृडयन्तः ॥
आवोर्वाचींसुमतिर्ववृत्त्यादुहोश्चिद्यावंरिवोवित्तरासंत्॥६८॥
अदंब्धेभिःसवितः । पायुभिष्ट्वँ शिवेभिरद्यपरिपाहिनोग
यम् ॥ हिरंण्यजिह्वःसुवितायनव्यंसेरक्षामाकिर्नोऽअघशंऽ
सऽईशत ॥ ६९ ॥ [१५-५] प्रवीरया । शुचंयोदद्भिरेवाम

१ पायुभिः त्वम् । इति पदम् । अत्र "मातृभिरर्चिभिः पायुभिर्वरूत्रीः" (शु. य. प्रा. ३ अ. ७९ सू.) इत्यनेन एकाक्षरे पदे परे पायुभिः इत्यस्य विसर्गस्य षत्वे "षात्तथौ मूर्धन्यम्" (शु. य. प्रा. ३ अ. ८० सू.) तस्य टकारे "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इति टस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धुर्य्युभिर्म्मधुमन्तꣳसुतासः ॥ वहंवायोनियुतोयाह्यच्छापि
बांसुतस्यान्धसोमदाय ॥ ७० ॥ गावऽउपं ॥ गावऽउपावता
वतम्महीयज्ञस्यरप्सुदा ॥ उभाकर्णाहिरण्ययां ॥ ७१ ॥
काव्ययोराजानेषु ॥ काव्ययोराजानेषुक्रत्वादक्षस्यदुरोणे॥
रिशादसासधस्थऽआ ॥ ७२॥ दैव्यावद्ध्वर्य्यू ॥ दैव्यावद्ध्व
र्य्यूऽआगतहरथेनसूर्य्यत्वचा ॥ मद्वायज्ञꣳसमंग्राथे ॥ तं

सं. ५८ १ तंप्रत्कथा. १ अ. ७ मं. १२ ॥ अयंवेनः. १ अ. ७ मं. १६ ॥ इति प्रतीके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्प्रत्क्रथायंव्वेन॒ ॥ ७३ ॥ तिर॒श्चीनो॒वितंतः ॥ तिर॒श्चीनो॒
वितंतोरश्मिरेषामधःस्विदासी३दुपरिस्विदासी३त् ॥ रेतो॒
धाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिःपरस्तां
त् ॥ ७४ ॥ आरोदसी ॥ आरोदसीऽअपृणदास्वर्म्महज्जा॒
तँय्यदेनमुपसोऽअधारयन् ॥ सोऽअद्धरायुपरिणीयतेकविर
त्त्योनवाजंसातयेचनोहितः ॥७५॥ उक्त्थेभिर्व्वृत्रहन्तमा ॥
उक्त्थेभिर्व्वृत्रहन्तमायामन्दानाचिदागिरा ॥ आङ्गूषैराविवां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतः ॥ ७६ ॥ उपनः । सूनवोगिरः÷शृण्वन्त्वमृतस्यये ॥
सुमृडीकाभवन्तुनः ॥ ७७ ॥ ब्रह्मांणिमे । मतयःशꣳसुता
सःशुष्म्मंऽइयर्त्तिप्रभृतोमेऽअद्रिः÷ ॥ आशांसतेप्रतिहर्य्य
न्त्युक्त्थेमाहरीवृहतस्तानोऽअच्छं ॥ ७८ ॥ अनुत्तमातें ।
मघवन्नकिर्न्नुनत्त्वावाँ२॥ऽअस्तिदेवताविदानः ॥ नजायमा
नोनशतेनजातोयानिकरिष्यात्कृणुहिप्रवृद्ध ॥७९॥ तदित् ॥
तदिदासुभुवनेषुज्येष्ठंयतोजज्ञऽउग्रस्त्वेषनृम्णः ॥ सद्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जंज्ञानोनिरिणातिशत्रुननुयंविश्वेमदन्त्यूमांः ॥८०॥ इमाऽ
उत्त्वा । पुरूवसोगिरोवर्द्धन्तुयामम ॥ पावकवर्णाःशुचयो
विपश्चितोभिस्तोमैरनूषत ॥ ८१ ॥ यस्यायम् ॥ यस्यायंवि
श्वऽआर्य्योदासः शेवधिपाऽअरिः ॥ तिरश्चिद्यर्यरुशमेपवीं
रवितुब्भ्येत्सोऽअंज्यतेरयिः ॥८२॥ अयꣳसहस्रम् ॥ अयꣳ
सहस्रमृषिभिःसहस्कृतःसमुद्रऽइवपप्रथे ॥ सत्त्यःसोऽअस्य
महिमागृणेशवोयज्ञेषुविप्रराज्ये ॥ ८३ ॥ अदब्धेभिःसवि

१ पुरूवसः । अत्र "अश्वरश्मिमतिसुमति" (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वसः इत्यस्य वकारे परे पुरुशब्दस्य ह्रस्वोकारस्य दीर्घोकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तꣳ । पायुभिष्ट्वꣳशिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्यजि
ह्वꣳसुवितायनव्यसेरक्षामाकिर्नोऽअघशꣳसऽईशत ॥ ८४ ॥
[१५-६] आनः ॥ आनोयज्ञन्दिविस्पृशंवायोयाहिसुम
न्मभिः ॥ अन्तःपवित्रंऽउपरिश्रीणानोयꣳशुक्रोऽअयामि
ते ॥ ८५ ॥ इन्द्रवायूसुसन्दृशा । सुहवेहवामहे ॥ यथानः
सर्वऽइज्जनोनमीवःसङ्गमेसुमनाऽअसत् ॥ ८६ ॥ ऋधांगित्था ।
समर्त्त्यः शशमेदेवतातये ॥ योनूनम्मित्रावरुणावभिष्टयऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचुक्क्रेहुध्यदांतये ॥ ८७॥ आयांतम् ॥ आयांतुमुपंभूषतु
म्मद्धं÷पिबतमश्विना ॥ दुग्ग्धम्पयोंवृषणाजेन्यावसूमानोंम
द्धिष्टुमागंतम् ॥८८॥ प्रैतुं ॥ प्रैतुब्रह्मंणस्पतिंप्प्रदेध्येतुसूनृ
तां ॥ अच्छांवीरन्नर्य्यम्पङ्क्तिरांधसन्देवायुज्ज्ञंन्नयन्तुनंः ॥८९॥
चुन्द्रमांऽअप्प्सु ॥ चुन्द्रमांऽअप्स्वुन्तरासुंपुर्णोधांवतेदिवि ॥
रयिम्पिशङ्गंम्बहुलम्पुरुस्पृहुद्धहरिंरेतिकनिंक्क्रदत् ॥९०॥ देव
न्देवंव्वः ॥ देवन्देवंव्वोवंसेदेवन्देवमुभिष्टंये ॥ देवन्देवꣳहुवेमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाजंसातयेगृणन्तोदेव्याधिया ॥ ९१ ॥ दिविपृष्टः ॥ दिवि
पृष्टोऽअरोचताग्निर्वैश्वानरोबृहन् ॥ क्ष्मयावृधानऽओजसा
चनोहितोज्योतिषाबाधतेतमः ॥ ९२ ॥ इन्द्राग्नीऽअपा
त् ॥ इन्द्राग्नीऽअपादियम्पूर्व्वागात्त्पद्वतीभ्यः ॥ हित्वीशि
रोजिह्वयावावदुच्चरन्त्रिधशत्पदान्यक्रमीत् ॥ ९३ ॥ देवासो
हि[1] । ष्म्मामनवेसमन्यवोविश्वेसाकꣳसरातयः ॥ तेनोऽ

---

१ हिष्म्ममनवे इति पदम् । अत्र "शृणुतत्विषिध्रजिभवतपिवेतस्मतिष्ठरक्षा मकारे" (शु. य. प्रा ३ अ. ११७ सू.) इत्यनेन मकारे स्म इत्यस्याकारस्य दीर्घाकारे विधीयमाने हिष्म्मामनवे । अत्र मस्य द्वित्वं "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ३ अ. १०२ सू.) इत्यनेन ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यतेऽअपरन्तुचेतुनोभवन्तुवरिवोविदः ॥ ९४ ॥ अपाधमत् ॥ अपाधमदुभिशस्तीरशस्तिहाथेन्द्रोद्युम्न्याभवत् ॥ देवास्तेऽइन्द्रसक्ख्याययेमिरेबृहद्भानोमरुद्गण ॥ ९५ ॥ प्रवः ॥ प्रवऽइन्द्रायबृहतेमरुतोब्रह्मार्चत ॥ वृत्रꣳहनतिवृत्रहाशतक्रतुर्वज्रेणशतपर्वणा ॥ ९६ ॥ अस्येत् ॥ अस्येदिन्द्रोवावृधेवृष्ण्युद्दशवोमदेसुतस्यविष्णवि ॥ अद्यातमस्यम

१ अद्यत तस्य इति पदम्। "अद्य तं हकारचकारभवतवृणीमहे देवेषु" (शु. य. प्रा. ३ अ. ११५ सू.) इत्यनेन ह्रस्वतकारे परे अद्याकारस्य दीर्घे अद्यातमस्य इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिमानंमायवोनुंष्टुंवन्तिपूर्वथां ॥ इंमाऽउंत्त्वायस्यायमयꣳ सहस्रंमूर्द्धऽऊषुणंः ॥ ९७ ॥ [१३-८] इतिश्रीवाजसनेय-संहितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ यज्जाग्रतो दश, पञ्चनद्यो दश, सोमोधेनु न्दश, ऽआकृष्णेन दश, पूषन्तव दश, नतदष्टौ, षडष्टपञ्चा-

---

१ अनुष्टुवन्ति । अत्र "अनोः स्तुवन्त्याम्" (शु. य. प्रा. ३ अ. ७२ सू.) इत्यनेन अनोरुपसर्गात्परस्य स्तुवन्तिपदे परे तद्घटितसकारस्य पकारः । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन हकारस्य द्वित्वम् । २ इमाऽउंत्वा. अ. ३३ मं. ८१ ॥ १ षस्यायम्. मं. ८२ ॥ १ अयꣳसहस्रम्. मं. ८३ ॥ १ ऊर्द्धऽऊषुर्णः अ. ११ मं. ४२ ॥ इति प्रतीकानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत् [अ. ३४ मं. ५८ अनु. ६] ॥ हरिःॐ ॥ यज्जाग्रं
तः ॥ यज्जाग्रंतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गम
ज्योतिषाज्योतिरेकन्तन्मेमनः शिवसंङ्कल्पमस्तु ॥ १ ॥
येनकर्म्माणि ॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्ति
विदथेषुधीराः ॥ यदपूर्वंयक्षमन्तःप्रजानान्तन्मेमनः
शिवसंङ्कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञानमुत
चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्जनकर्म्मक्रियतेतन्मेमनः शिवसंङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवसंङ्कल्पमस्तु॥४॥ यस्मिन्नृचः ॥ यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिंश्चित्तंसर्व्वमोतम्प्रजानान्तन्मेमनः शिवसंङ्कल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिव ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनइव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृत्प्रतिष्ठन्यदजिरञ्जविष्ठन्तन्मेमनः शिवसंकल्पमस्तु ॥ ६ ॥
पितुन्नु । स्तौषम्महोधुर्म्माणन्तवीषीम् ॥ यस्यत्रितोध्यो
जसाबृत्रंविपर्व्वमर्द्दयत् ॥ ७ ॥ अन्वित् ॥ अन्विदनुमते
त्वम्मन्यासैशञ्चनस्कृधि ॥ कत्वेदक्षायनोहिनुष्प्रणऽआ
यूंषितारिषः ॥ ८ ॥ शतम् ॥ १८०० ॥ अनुनः ॥ अनु
नोद्यानुमतिर्य्यज्ञन्देवेषुमन्यताम् ॥ अग्निश्चहव्यवाहनोभ
वतन्दाशुषेमयः ॥ ९ ॥ सिनीवालिपृथुष्टुके ॥ सिनीवालिपृथु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टुकेयादेवानामसिस्वसा ॥ जुषस्वहुव्यमाहुतम्प्रजान्देविदि
दिड्डिनः ॥ १० ॥ [१-१] पञ्चनुद्यः ॥ पञ्चनुद्यः सरस्वती
मपियन्तिसस्रोतसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित्
॥ ११ ॥ त्वमग्ने । प्रथमोऽअङ्गिराऽऋषिर्देवोदेवानामभवः
शिवःसखा ॥ तवव्रतेकुवयोविद्म्मनापसोजायन्तमरुतोब्भ्रा
जदृष्टयः ॥ १२ ॥ त्वन्नः ॥ त्वन्नोऽअग्नेतवदेवपायुभिर्म्म
घोनोरक्षतन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेषद्व

सं. ५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षमाणस्तवव्रते ॥ १३ ॥ उत्तानायामव । भराचिकित्त्वा
न्सद्यः प्रवीतावृषणञ्जजान ॥ अरुषस्तूपोरुशदस्यपाजऽइडा
यास्पुत्रोवयुनेजनिष्ट ॥ १४ ॥ इडायास्त्वा । पदेवयन्ना
भापृथिव्याऽअधि ॥ जातवेदोनिधीमह्यग्नेहव्यायवोढवे
॥ १५ ॥ प्रमन्महे । शवसानायशूषमाङ्गूषाङ्गिर्वणसेऽअङ्गिर
स्वत् ॥ सुवृक्तिभिस्तुवतऽऋग्मियायार्चामार्कन्नरेविश्रुता
य ॥ १६ ॥ प्रव÷ ॥ प्रवोमहेमहिनमोभरद्ध्वमाङ्गूष्यꣳशव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सानायुसामं ॥ येनानुःपूर्वेपितरः÷पदुज्ज्ञाऽअर्चन्तोऽअङ्गिर
सोगाऽअविन्दन् ॥१७॥ इच्छन्तित्त्वा ॥ सोम्म्यासःसखायः
सुन्वन्तिसोमुन्दधतिप्रयांᳬसि ॥ तितिक्षन्तेऽअभिशस्तिं
ज्जनानामिन्द्रत्त्वदाकश्चनहिप्प्रकेतः ॥ १८ ॥ नते । दूरेपर
माचिद्रजाᳬस्यातुप्रयाहिहरिवोहरिभ्याम् ॥ स्थिरायुवृ
ष्णेसवनाकृतेमायुक्त्वाग्रावाणःसमिधानेऽअग्नौ ॥ १९ ॥

---

१ येन नः इति पदम् । अत्र येनेत्यस्य नकाराकारस्य नः पदे परे "धारयामयोजावसचस्यनुदमोषुजयतोरुष्यरक्षयजयच्छमत्सथपिपृतगायतातुयेन नकारे" (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारे जाते येनानः इति पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अषाढँऽयुत्त्सु । पृतनासुपप्प्रिँऽस्वर्षामुप्प्सांवृजनंस्यगोपाम् ॥
भुरेषुजाँऽसुक्षितिँ सुश्रवंसञ्जयन्तुन्त्वामनुमदेमसोम।२०।
[१०-२] सोमोधेनुम् ॥ सोमोधेनुँ सोमोऽअर्वन्तमाशुँ
सोमोवीरङ्कर्म्मण्यन्ददाति ॥ सादुन्यंविदुत्थ्यूँ सुभेयंम्पितृ
श्रवणँऽयोददाशदस्मै ॥ २१ ॥ त्वमिमाः ॥ त्वमिमाऽ
ओषधीःसोमविश्वास्त्वमपोऽअजनयस्त्वङ्गाः ॥ त्वमातंत

१ स्वःसाम् इति पदम् । अत्र "स्वर्धूः साँसहयोः (शु. य. प्रा. ३ अ. ४१ सू.) इत्यनेन यथासंख्यं स्वस्य विसर्जनीयस्य साम् पदे परे रेफत्वं सकारस्य च मूर्धन्यषत्वञ्च जातम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्थोर्व्वन्तरिक्षन्त्वज्योतिषाद्वितमोंद्ववर्त्थ ॥२२॥ देवेनंनः ॥
देवेनंनोमनंसादेवसोमरायोभागꣳसंहसावन्नभियुंद्ध ॥ मात्त्वा
तंनदीशिषेवीर्य्यस्योभयेंभ्यꣳप्रचिकित्सागविष्टौ ॥ २३ ॥
अष्टौवि ॥ अष्टौव्यंकख्यत्ककुभंः पृथिव्यास्त्रीधन्वयोजंनास
प्तसिन्धूंन् । हिरण्याक्षःसंवितादेवऽआगाद्दधद्रत्नांदाशु
षेवार्य्याणि ॥ २४ ॥ हिरंण्यपाणिꣳसविता । विचर्षणिरुभे
द्यावांपृथिवीऽअन्तरीयते ॥ अपामींवाम्बाधंतेवेतिसूर्य्यमभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेनरजसाद्यामृणोति ॥ २५ ॥ हिरण्यहस्तोऽअसुरः ।
सुनीथः सुमृडीकः स्ववोयात्त्वर्वाङ् ॥ अपसेधन्रक्षसोयातु
धानानस्थाद्देवः प्रतिदोषङ्गृणानः ॥२६॥ येते ॥ येतेपन्थाः
सवितः पूर्व्यासोरेणवः सुकृताऽअन्तरिक्षे ॥ तेभिर्नोऽअद्यप
थिभिः सुगेभीरक्षाचनोऽअधिचब्रूहिदेव ॥२७॥ उभापिबत
म् ॥ उभापिबतमश्विनोभानः शर्म्मयच्छतम् ॥ अविद्रिया
भिरूतिभिः ॥ २८ ॥ अप्मस्वतीमश्विना ॥ अप्मस्वतीम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्विनाव्वाचमस्म्मेकृतन्नौदस्राव्वृषणामनीषाम् ॥ अद्युत्त्येवसे
निह्वयेवांव्वृधेचनोभवतंव्वाजसातौ ॥ २९ ॥ द्युभिरक्तुभिः ॥
द्युभिरक्तुभिःपरिपातमस्म्मानरिष्टेभिरश्विनासौभगेभिः ॥
तन्नोमित्रोव्वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः
॥ ३० ॥ [१०-३] आकृष्णेन ॥ आकृष्णेनरजसाव्वर्त्त
मानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादे
वोयातिभुवनानिपश्यन् ॥ ३१ ॥ आरात्रि ॥ आरात्रिपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्थिवꣳरजः÷पितुरप्प्रायिधामभिः ॥ दिवःसदाꣳसिबृहतीवि
तिष्ठसऽआत्त्वेषंवर्त्ततेतमः÷ ॥ ३२ ॥ उषस्तत् ॥ उषस्तच्चि
त्रमाभरास्मभ्यंवाजिनीवति ॥ येनतोकञ्चतनयञ्चधामहे
॥ ३३ ॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्प्रात
र्म्मित्रावरुणाप्प्रातरश्विना ॥ प्रातर्भगम्पूषणम्ब्रह्मणस्पतिं
म्प्रातःसोममुतरुद्रꣳहुवेम ॥ ३४ ॥ प्रातर्जितम्भगम् ॥ प्रात
र्जितम्भगमुग्रꣳहुवेमवयम्पुत्रमदितेर्य्योविधर्त्ता ॥ आद्रश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्व्यम्मन्यमानस्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ॥ ३५॥
भगप्प्रणेतः ॥ भगप्प्रणेतुर्भगसत्त्यराधोभगेमान्धियमुदं
वादद्नः ॥ भगप्प्रनोजनयगोभिरश्वैर्भगप्प्रनृभिर्नृवन्तः
स्याम ॥ ३६ ॥ उतेदानीम् ॥ उतेदानीम्भगवन्तःस्यामोत
प्प्रपित्त्वऽउतमध्येऽअह्नाम् ॥ उतोदितामघवन्त्सूर्यस्यव्वय
न्देवानाꣳसुमतौस्याम ॥ ३७ ॥ भगऽएव । भगवाँ२॥ऽअ

१ प्रना जनयगोभिः । अत्र समानपदत्वाभावेन "ऋषरेभ्यो०" इत्यनेन णत्वाप्राप्तौ "निषण्णाय०" इत्यनेनासमानपदेऽपि विधीयमानस्य णत्वस्य प्रनः इत्यस्य आयुषिपर एव विधानान्न 'जनयगोभिः पदे" परे णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुदेवास्तेनंवयम्भगंवन्तःस्याम ॥ तन्त्वांभगसर्वऽइज्जोंह वीतिसनोंभगपुरऽएताभंवेह ॥ ३८ ॥ समंध्द्धरायं ॥ समं ध्द्धरायोषसोंनमन्तदधिक्क्रावेंवशुचंयेपदायं ॥ अर्वाचीनंवंसु विदम्भगंन्नोरथंमिवाश्वांवाजिनऽआवंहन्तु ॥ ३९ ॥ अश्वांव तीर्गोमंतीः ॥ अश्वांवतीर्गोमंतीर्नऽउषासोंवीरवंतीःसदंमु च्छन्तुभद्राः ॥ घृतन्दुहांनाव्विश्वतःप्रपींतायुयंपांतस्वस्त्ति

१ नऽउषासः । अत्र नकारात्परस्य उष इत्यस्य ह्रस्वाकारस्य "उषमहोभिर्नक्तमीकारे" (शु. य. प्रा. ३ अ. ११९ सू.) इत्यनेन दीर्घाकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भि॒ꣳसदा॑नꣳ ॥ ४० ॥ [१०-४] पू॑षन्तवं । व्रतेव्वयन्नारि॑ष्षये
मकदा॑चन ॥ स्त्तो॒तारंस्त्तऽइहस्म्मसि ॥ ४१ ॥ प॒थस्प्प॑थ॒ꣳ
परि॑पतिम् ॥ प॒थस्प्प॑थ॒ꣳपरि॑पतिंव्वचस्याकामेनकृतोऽअ॒भ्या
नडुर्क्कम् ॥ सनो॑रासच्छुरुधं॑श्चन्द्राग्राधियं॑न्धियꣳसीषधाति
प्प्रपू॒षा ॥४२॥ त्रीणि॑प॒दाविचं॑क्रमे॒विष्णु॑र्ग्गो॒पाऽअदा॑भ्यः॑॥
अतो॒धर्म्मा॑णिधारयं॑न् ॥ ४३ ॥ तद्विप्प्रा॑सः॑ ॥ तद्विप्प्रा॑सो

---

१ पूषन्तव । अत्र "ऋषरेभ्यः" इत्यनेन समानपदे विधीयमानं णत्वं "प्रकृत्या पदान्तीयः" (शु. य. प्रा. ३ अ. ९० सू.) इत्यनेन निषिध्यते ।
२ "त्रीणि पदा" अत्र पदानिघटितस्य निकारस्य "निशब्दो बहुलम्" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन लोपे "त्रीणि पदा" इति पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विपन्यवोजागृवाꣳसꣳसमिन्धते ॥ विष्णोर्यत्परमम्पदम्
॥ ४४ ॥ घृतवतीभुवनानाम् ॥ घृतवतीभुवनानामभिश्रि
योर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्म्मणा
विष्कभितेऽअजरेभूरिरेतसा ॥ ४५ ॥ येनः÷ । सुपत्नाऽअ
पतेभवन्त्विन्द्राग्निभ्यामवबाधामहेतान् ॥ वसवोरुद्राऽ
आदित्याऽउपरिस्पृशम्मोग्रञ्चेत्तारमधिराजमक्रन् ॥ ४६ ॥
आनासत्या । त्रिभिरेकादशैरिहदेवेभिर्यातम्मधुपेयमश्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना ॥ प्रायुस्तारिष्टन्नीरपांᳬसिमृक्षतुᳬसेधंतुन्द्वेषोभवंतᳬ
सचाभुवां ॥ ४७ ॥ एषवं÷ ॥ एषवस्तोमोंमरुतऽइयङ्गी
र्म्मान्दाय्यस्यंमान्यस्यंकारोः ॥ एषायांसीष्टतन्वेवुयांविद्या
मेषंवृजनंञ्जीरदांनुम् ॥ ४८ ॥ सुहस्तोंमाᳬसुहछंन्दसᳬ ॥
सुहस्तोंमाᳬसुहछंन्दसऽआवृतं÷सुहप्रंमाऽऋषंयᳬसप्तदै
व्यांᳬ ॥ पूर्वेषांम्पन्थांमनुदृश्यधीरांऽअन्वालेंभिरेरत्थ्योन
रश्म्मीन् ॥ ४९ ॥ आयुष्यंवर्च्चस्यम् ॥ आयुष्यंवर्च्चस्यᳬराय

सं. ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पोषमौद्भिदम् ॥ इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम्
॥५०॥ [१०-५] नतत् ॥ नतद्रक्षांꣳसिनपिशाचास्तरन्तिदे
वानामोजः प्रथमजꣳह्येतत् ॥ योबिभर्त्तिदाक्षायणꣳहिर
ण्यꣳसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः
॥५१॥ यदाबद्ध्नन् ॥ यदाबद्ध्नन्दाक्षायणाहिरण्यꣳशता
नीकायसुमनस्यमानाः ॥ तन्मऽआबद्ध्नामिशतशारदायायुं
षम्माञ्जरदष्टिर्यथासम् ॥५२॥ उतनः ॥ उतनोहिर्बुद्ध्न्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणोत्त्वजऽएकंपात्पृथिवीसंमुद्रः ॥ विश्वेदेवाऽऋतावृधोहु
वानास्तुतामन्त्राःकविशस्ताऽअवन्तु ॥५३॥ इमागिरः ॥ इ
मागिरऽआदित्येभ्योघृतस्नूःसुनाद्राजभ्योजुह्वाजुहोमि ॥
शृणोतुमित्रोऽअर्य्यमाभगोनस्तुविजातोवरुणोदक्षोऽअ
शः ॥ ५४ ॥ सप्तऽऋषयः ॥ सप्तऽऋषयःप्रतिहिताःशरीरे
सप्तरक्षन्तिसदुमप्प्रमादम् ॥ सप्तापःस्वपतोलोकमीयुस्त
त्रंजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ॥ ५५ ॥ उत्तिष्ठ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मणस्पतेदेवयन्तस्त्वेमहे ॥ उपप्रयन्तुमरुतः सुदानवऽ
इन्द्रप्राशूर्भवासचा ॥५६॥ प्रनूनम् ॥ प्रनूनम्ब्रह्मणस्पतिर्म्म
न्त्रंवदत्युक्थ्यम् ॥ यस्मिन्निन्द्रोवरुणोमित्रोऽअर्य्यमादे
वाऽओकांसिचक्रिरे ॥५७॥ ब्रह्मणस्पते ॥ ब्रह्मणस्पतेत्त्व
मस्ययन्तासूक्तस्यबोधितनयज्ञजिन्व ॥ विश्वन्तद्भद्रंयदव

---

१ ब्रह्मणस्पते । अत्र विसर्जनीयस्य "प्रकृत्या कखयोः पफयोश्च" (शु. य. प्रा. ३ अ. ११ सू.) इत्यनेन प्रकृतिभावे प्राप्तेऽपि "पतितालव्यस्वरोदये" (शु. य. प्रा. ३ अ. ३५ सू.) इत्यनेन पतिशब्दे परे सकारो विधीयते । तत "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन षकारस्य द्वित्त्वम् । २ भव सचा इति पदम् । वकाराकारस्य सचा परे "सचावरूध्यवाजसपायुषु च" (शु. य. प्रा. ३ अ. ११० सू.) इत्यनेन एतेषु परेषु भवेत्येतत्पदं दीर्घं भवति । अतो दीर्घाकारे भवासचा इति पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तिदेवाबृहद्वंदेमविदथेसुवीरांः ॥ यऽइमाविश्वाविश्वकर्म्मा
योनः÷पितान्नपतेन्नस्यनोदेहि ॥ ५८ ॥ [८-६] ॥ इति श्री-
वाजसनेयसंहितायां चतुस्त्रिंशोऽध्यायः ॥३४॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाकसूत्रम् ॥ अपेतो दशा, पाघन्द्वादश, द्वौ द्वाविंः
शतिः [अ. ३५ मं. २२ अनु. २] ॥ हरिःॐ॥अपेतः॥अपेतो
यन्तुपुणयोसुम्न्नादेवपीयवः÷॥ अस्यलोकःसुतावंतः ॥ द्युभि
रहोभिरक्तुभिर्व्यक्तँऽयुमोदंदात्त्ववसानंमस्म्मै ॥ १ ॥ सुवि

१ यऽइमाविश्वा. अ. १७ मं. १७ ॥ १ विश्वकर्मा विमना. अ. १७ मं. २६ ॥ १ योनः पिता. अ. १७ मं. २७ ॥ १ अन्नपतेन्नस्य. अ. ११ मं. ८३ ॥ इति प्रतीकानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तातें ॥ सवितातेशरीरेभ्यःपृथिव्याँल्लोकमिच्छतु ॥ तस्मैं युज्यन्तामुस्त्रियाः ॥ २ ॥ वायुःपुनातु । सवितापुनात्त्वग्नेर्भ्राजसासूर्य्यस्यवर्च्चसा ॥ विमुच्यन्तामुस्त्रियाः ॥ ३ ॥ अश्वत्थेवः ॥ अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ४ ॥ सवितातें ॥ सवितातेशरीराणिमातुरुपस्त्थऽआवपतु ॥ तस्मैंपृथिविशम्भव ॥ ५ ॥ प्रजापतौत्त्वा । देवतायामुपोदकेलोकेनिद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धाम्म्यसौ ॥ अपंनुःशोशुंचदुघम् ॥ ६ ॥ परंम्मृत्त्यो ॥
परंम्मृत्त्योऽअनुपरेंहिपन्थाँय्यस्त्तेंऽअन्यऽइतंरोदेवुयानांत् ॥
चक्षुंष्म्मतेशृण्वुतेतेंब्रवीमिमानंः प्रुजाꣳरीरिषोमोतवीरान्
॥ ७ ॥ शंवातंः ॥ शंवातुःशꣳहितेघृणिःशन्तेंभवुन्त्विष्टं
काः ॥ शन्तेंभवन्त्वग्न्नयुःपार्त्थिवासोमात्त्वाभिंशूंशुचन्
॥ ८ ॥ कल्पंन्तान्ते ॥ कल्पंन्तान्तेदिशुस्त्तुभ्युमापंः शि
वतंमास्त्तुभ्यंम्भवन्तुसिन्धंवः ॥ अन्तरिंक्षꣳशिवन्तुभ्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पन्तान्तेदिशꣳसर्व्वाः ॥९॥ अश्मन्वतीरीयतेसꣳरभध्वमुत्तिष्ठतप्प्रतरतासखायः ॥ अत्राजहीमोशिवायेऽअसञ्छिवान्वयमुत्तरेमाभिवाजान् ॥ १० ॥ [१०-१] अपाघम् ॥ अपाघमपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्ग्गत्त्वमस्म्मदपदुꣳष्वप्न्यꣳसुव ॥ ११ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषधयꣳसन्तुदुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चवयन्द्वि

१ अत्राजहीमः । अत्र जहीमः इति पदे परे अत्रशब्दस्य ह्रस्वाकारस्य "पूर्णो जहीमस्तेष्वत्र" (शु. य. प्रा. ३ अ. १२१ सू.) इत्यनेन दीर्घो भवति ।
२ दुःष्वप्न्यꣳ सुव । अत्र "भोविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन विसर्जनीयस्य व्यवधानात्त्वत्वाप्राप्तौ "दुःष्वप्न्यम्" (शु. य. प्रा. ३ अ. ७३ सू.) इत्यनेन दोःपरात्स्वप्नघटितसस्य षत्वं निपात्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्म्म॒ ॥१२॥ अनड्वाहमुन्वारभामहे ॥ अनड्वाहमुन्वारभामहे सौरभेयꣳस्वस्तये ॥ सनऽइन्द्रऽइवदेवेभ्योवह्निः सन्तारणोभव ॥ १३ ॥ उद्वयम् ॥ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ १४ ॥ इमञ्जीवेभ्यः । परिधिन्दधामिमैषान्नुगादपरोऽअर्थमेतम् ॥ शतञ्जीवन्तुशरदः पुरूचीरन्तर्म्मृत्युन्दधतामपर्वतेन ॥ १५ ॥

१ अनस् वाहम् इति पदम् । अत्र "अनसो वाहौ सकारो डकारम्" (शु. य. प्रा. ३ अ. ४५ सू.) अत्र अनश्शब्दस्य सकारस्य वाहौ परे डकारो विधीयते तेन अनड्वाहम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्न्ऽआयूꣳषि । पवस्ऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाध स्वदुच्छुनाम् ॥ १६ ॥ आयुष्मानग्ने । हविषाव्वृधानोघृत प्प्रतीकोघृतयोनिरेधि ॥ घृतम्पीत्त्वामधुचारुगव्यम्पितेवपुत्र मभिरक्षतादिमान्त्स्वाहा ॥ १७॥ परीमे । गामनेषतपर्य्य ग्निमहृषत ॥ देवेष्ववक्क्रतुश्श्रवः कऽइमाँ२॥ऽआदधर्षति ॥ १८ ॥ क्रुध्यादमग्निम् ॥ क्रुध्यादमग्निम्प्रहिणोमिदूरँऽयं मराज्यङ्गच्छतुरिप्प्रवाहः ॥ इहैवायमितरोजातवेदादेवेभ्यो

१ प्रहिणोमि ॥ अत्र समानपदत्वाभावेन "ऋषरेभ्यः" इत्यनेन णत्वाप्राप्तौ "प्र नेतिनुदातिहिनोमीनाम्" (शु. य. प्रा. ३ अ. ८९ सू.) इत्यनेन णत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुव्यंवहतुप्प्रजानन् ॥ १९ ॥ वहंवुपाम् ॥ वहंवुपाञ्जातवेदः
पितृभ्योयत्रैनान्वेत्थनिहितान्परांके ॥ मेदसःकुल्याऽउप
तान्त्स्रवन्तुसुत्त्याऽएषामाशिषःसन्नमन्ताꣳस्वाहा ॥ २० ॥
स्योनापृथिवि । नोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्म
सुप्रथाः ॥ अपनःशोशुचदुघम् ॥ २१ ॥ अस्मात्त्वम् ॥
अस्मात्त्वमधिजातोसित्त्वदयज्ञायतामपुनः ॥ असौस्वर्गा
यलोकायस्वाहा ॥ २२ ॥ [१२-२] इति श्रीवाजसनेयसंहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ श्रीवेदपुरुषाय नमः ॥
अनुवाकसूत्रम् ॥ ऋचंवाचꣳषोडश, द्यौःशान्तिरष्टौ, द्वौ
चतुर्विꣳशतिः [अ. ३६ मं. २४ अनु. २] ॥ हरिः ॐ ॥
ऋचंवाचम् ॥ ऋचंवाचम्प्रपद्येमनोयजुꣳप्रपद्येसामꣳप्राण
म्प्रपद्येचक्षुꣳश्रोत्रम्प्रपद्ये ॥ वागोजः सहौजोमयिप्राणापा
नौ ॥ १ ॥ यन्मे । च्छिद्रञ्चक्षुषोहृदयस्यमनसोवातितृण्णम्बृ
हस्पतिर्म्मेतद्दधातु ॥ शन्नोभवतुभुवनस्ययस्पतिः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूर्भुवः ॥ भूर्भुवःस्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीम
हि ॥ धियोयोनः प्रचोदयात् ॥ ३ ॥ कयानः ॥ कयानश्चित्रऽ
आभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ ४ ॥ क
स्त्वा । सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिदारु
जेवसु ॥५॥ अभीषुणः ॥ अभीषुणःसखीनामविताजरितॄणा
म् ॥ शतम्भवास्यूतिभिः ॥६॥ कयात्त्वम् ॥ कयात्त्वन्नऽऊत्या

---

१ अभीषुणः । अत्र अभिसुनः इति पदम् । अत्र "अभेश्च" (शु. य. प्रा. ३ अ. ६३ सू.) इत्यनेन अभेरुपसर्गात्परस्य सुशब्दस्य षत्वे रूपम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिष्प्रमन्दसेवृषन् ॥ कयास्त्तोतृभ्युऽआभर ॥ ७ ॥ इन्द्रो
विश्वस्य राजति ॥ शन्नोऽअस्त्तुद्विपदेशञ्चतुष्पदे ॥ ८ ॥
शन्नः ॥ शन्नोमित्रः शंवरुणः शन्नोभवत्त्वर्य्यमा ॥ शन्नऽइ
न्द्रोबृहस्पतिः शन्नोविष्णुरुरुक्क्रमः ॥ ९ ॥ शन्नोवातः ।
पवताँ शन्नस्त्तपतुसूर्य्यः ॥ शन्नःकनिक्क्रदद्देवः पर्ज्जन्योऽ
अभिवर्षतु ॥ १० ॥ अहानिशम् ॥ अहानिशम्भवन्तुनः श
ऽरात्रीः प्रतिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिः श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणावाजसातौशमि
न्द्रासोमासुवितायशँय्योः ॥ ११ ॥ शन्नः ॥ शन्नोदेवीरभि
ष्टयऽआपोभवन्तुपीतये ॥ शँय्योरभिस्रवन्तुनः ॥ १२ ॥
स्योनापृथिवि । नोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मस
प्रथाः ॥ १३ ॥ आपोहि । ष्ठामयोभुवस्तानऽऊर्ज्जेदधात
न ॥ महेरणायचक्षसे ॥ १४ ॥ योवः । शिवतमोरसस्तस्य

१ अत्र यच्छ नः इति पदम् । यच्छ इत्यस्य ह्रस्वाकारस्य नः इत्यस्य नकारे परे "धारयामयोजावसचस्वनुदमोषुजयतोरुष्यरक्षयजयच्छमत्सथपिवृत-गायतातुयेन नकारे (शु. य. प्रा. ३ अ. १०८ सू.) इत्यनेन दीर्घाकारे कृते यच्छानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाजयतेहनं÷ ॥ उशतीरिवमातरं÷ ॥ १५॥ तस्माऽअरंम् ॥
तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयं
थाचनः ॥ १६ ॥ [१६-१] द्यौ॒ः शान्तिः÷ ॥ द्यौ॒ः शान्तिरन्त
रिक्षꣳ शान्तिः÷पृथिवीशान्तिरापः॒ शान्तिरोषधयः॒ शान्तिः÷ ॥
वनस्पतयः॒ शान्तिर्विश्वेदेवाः॒ शान्तिर्ब्रह्मशान्तिः॒ सर्वꣳ शा
न्तिः॒ शान्तिरेवशान्तिः॒ सामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳह
मा। मित्रस्यमाचक्षुषासर्वाणिभूतानिसमीक्षन्ताम्॥ मित्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याहञ्चक्षुषासर्वाणिभूतानिसमीक्षे ॥ मित्रस्यचक्षुषासमी
क्षामहे ॥ १८ ॥ दृतेदृꣳहं मा । ज्योक्तेसन्दृशिजीव्यासु
ज्योक्तेसन्दृशिजीव्यासम् ॥ १९ ॥ नमस्ते ॥ नमस्तेहर
सेशोचिषेनमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तु
हेतयः÷पावकोऽअस्मभ्यꣳशिवोभव ॥ २० ॥ नमस्ते ।
ऽअस्त्वविद्युतेनमस्तेस्तनयित्नवे॥ नमस्तेभगवन्नस्त्वयतः
स्व÷समीहसे ॥ २१ ॥ यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शन्नः॑ कुरुप्प्रजाब्भ्योभयन्नः॑ पशुब्भ्यः॑ ॥२२॥ सुमित्रियानः॑ ॥ सुमित्रियानऽआपऽओषधयः॑ सन्तुदुर्म्मित्रियास्तस्म्मैसन्तु योस्म्मान्द्वेष्टियञ्चवयन्द्विष्म्मः ॥२३॥ तच्चक्षुः॑ ॥ तच्चक्षुर्देवहितम्पुरस्तांच्छुक्रमुच्चरत् ॥ पश्श्येमशरदः॑ शतञ्जीवेमशरदः॑ शतꣳशृणुयामशरदः॑ शतम्प्रब्रवामशरदः॑ शतमदीनाः॑स्यामशरदः॑ शतम्भूयश्चशरदः॑ शतात् ॥ २४ ॥ [८-२]

इति श्रीवाजसनेयसंहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवेदपुरुषाय नमः॥ अनुवाकसूत्रम्॥ देवस्यत्त्वा दश, यमाय त्त्वैकादश, द्वा,वेकविꣳशतिः [अ. ३७ म. २१ अनु. २]॥ हरिःॐ॥ देवस्यत्त्वा। सवितुःप्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्त्ताब्भ्याम्॥ आददेनारिरसि॥ १॥ युञ्जतेमनः॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्राविप्रस्यबृहतोविपश्चितः॥ विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिः॥ २॥ देवीद्यावापृथिवी। मुखस्यवामुद्यशिरोराद्यासन्देवयजनेपृथि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्या॒ ॥ मुखा॑य॑त्त्वामुखस्य॑त्त्वाशीर्ष्णे॑ ॥ ३ ॥ देव्यो॑व्व
म्म्रयः॑ ॥ देव्यो॑व्वम्म्रयोभूतस्य॑प्प्रथमुजामुखस्य॑वो॒द्यशिरो॑राद्या
सन्देवयज॑नेपृथिव्या॒ ॥ मुखा॑य॑त्त्वामुखस्य॑त्त्वाशीर्ष्णे॑ ॥ ४ ॥
शतम् ॥ १९०० ॥ इयुत्त्यग्रे॑ ॥ इयुत्त्यग्रे॑ऽआसीन्मुखस्य॑
तेद्यशिरो॑राद्यासन्देवयज॑नेपृथिव्या॒ ॥ मुखा॑य॑त्त्वामुखस्य॑
त्त्वाशीर्ष्णे॑ ॥ ५ ॥ इन्द्रस्यौज॑ः ॥ इन्द्रस्यौज॑स्त्थमुखस्य॑वो॒
द्यशिरो॑राद्यासन्देवयज॑नेपृथिव्या॒ ॥ मुखा॑य॑त्त्वामुखस्य॑त्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यं
त्त्वाशीर्ष्णे ॥ ६ ॥ प्रैतु ॥ प्रैतुब्रह्मणस्पतिंप्रदेव्येतुसुनृता ॥
अच्छावीरन्नर्य्यम्पङ्क्तिराधसन्देवायुज्ञन्नयन्तुनः ॥ मुखायं
त्त्वामुखस्यंत्त्वाशीर्ष्णे॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे॥ मुखा
यंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥७॥ मुखस्यशिरः ॥ मुखस्यशिरो
सि ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखस्यशिरोसि ॥ मुखा
यंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखस्यशिरोसि ॥ मुखायंत्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखा
यंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे
॥ ८ ॥ अश्वंस्यत्त्वा ॥ अश्वंस्यत्त्वावृष्णंः शुक्रनाधूंपयामि
देवयजंनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ अश्वं
स्यत्त्वावृष्णंः शुक्रनाधूंपयामिदेवयजंनेपृथिव्याः ॥ मुखायं
त्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ अश्वंस्यत्त्वावृष्णंः शुक्रनाधूंपयामि
देवयजंनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्वामुखस्यंत्त्वाशीष्षर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्षर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्षर्णे ॥ ९ ॥ ऋजवेंत्त्वा । साधवेंत्त्वासुक्षित्त्यैत्त्वा ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्षर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्षर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीष्षर्णे ॥ १० ॥ [१०-१] युमायंत्त्वा । मुखायंत्त्वासूर्य्यंस्यत्त्वा तपंसे ॥ देवस्त्त्वांसवितामर्द्धानक्तुपृथिव्याः सꣳस्पृशंस्पा

१ सꣳस्पृशस्प्पाहि । अत्र "अध्वनो रजसो रिषःस्पृशस्पातौ" (शु. य. प्रा. ३ अ. २८ सू.) इत्यस्मिन् पाताविति धातुग्रहणात् पाहि इति पाधातोर्लोटि मध्यमपुरुषस्यैकवचनस्य रूपे परे स्पृशः विसर्गस्य सः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि ॥ अर्चिरसिशोचिरसितपोसि ॥ ११ ॥ अनाधृष्टापुरस्तात् ॥ अनाधृष्टापुरस्तादुग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्येप्रजाम्मेदाः ॥ सुषदापश्चाद्देवस्य सवितुराधिपत्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतोधातुराधिपत्ये रायस्पोषम्मेदाः ॥ विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजोमेदाविश्वाभ्योमानाष्ट्राभ्यस्पाहिमनोरश्वासि ॥ १२ ॥ स्वाहामरुद्भिः ॥ स्वाहामरुद्भिःपरिश्रीयस्वदिवःसꣳस्पृशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पाहि ॥ मधुमधुमधुं ॥ १३ ॥ गब्भौंदेवानांम् ॥ गब्भौं
देवानांम्पितामंतीनाम्पतिं÷प्रजानांम् ॥ सन्देवोदेवेनंसवि
त्रागंतुसꣳसूर्य्यैणरोचते ॥ १४ ॥ समुग्निः ॥ समुग्निरग्नि
नांगतुसन्दैवेनसवित्रासꣳसूर्य्यैणारोचिष्ट ॥ स्वाहासमुग्नि
स्तपंसागतुसन्दैव्येनसवित्रासꣳसूर्य्यैणारूरुचत ॥ १५ ॥
धर्त्तादिवः ॥ धर्त्तादिवोविभांतितपंसंस्पृथिव्यान्धर्त्तादिवो

सं. ६२

१ तपसः पृथिव्याम् इति पदम् । तपसः इत्यस्य विसर्गस्य "तपसस्पृथिव्याम्" (शु. य. प्रा. ३ अ. २७ सू.) इत्यनेन सत्वे सिद्ध्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवानामर्म्मर्त्त्यस्तपोजाः ॥ वाचमस्मेनियच्छदेवायुवम् ॥ १६ ॥ अपश्श्यङ्गोपाम् ॥ अपश्श्यङ्गोपामनिपद्यमानमा चपराचपथिभिश्चरन्तम् ॥ ससद्रीचीःसविषूचीर्वसानऽआव रीवर्त्तिभुवनेष्वन्तः ॥ १७ ॥ विश्वासाम्भुवाम् ॥ विश्वा साम्भुवाम्पतेविश्वस्यमनसस्पतेविश्वस्यवचसस्पतेसर्वस्यव चसस्पते ॥ देवश्रुत्त्वन्देवघर्म्मदेवोदेवान्पाह्यत्रप्प्रावीरनुवा न्देववीतये ॥ मधुमाद्भींभ्याम्मधुमाधूचीभ्याम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदेत्त्वा ॥ हृदेत्त्वामनसेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्धोऽ
अध्वरन्दिविदेवेषुधेहि ॥ १९ ॥ पितानः ॥ पितानोसिपि
तानोबोधिनमस्तेऽअस्तुमामाहिꣳसीः ॥ त्वष्टृमन्तस्त्वा
सपेमपुत्रान्पशून्मयिधेहिप्रजामस्मासुधेह्यरिष्टाहꣳसुहप
त्त्याभूयासम् ॥ २० ॥ अहः केतुना । जुषताꣳसुज्योति
ज्योतिषास्वाहा ॥ रात्रिः केतुनाजुषताꣳसुज्योतिज्योतिषा
स्वाहा ॥ २१ ॥ [११-२] इति श्रीवाजसनेयसंहितायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ देवस्यत्त्वाष्टौ, यमायत्त्वा क्षत्रस्यत्त्वा दशकौ, त्रयोऽष्टाविꣳशतिः [अ. ३८ मं. २८ अनु. ३] ॥ हरिःॐ॥ देवस्यत्त्वा ॥ देवस्यत्त्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददे दित्यै रास्नासि ॥ १ ॥ इडऽएहि ॥ इडऽएह्यदितऽएहि सरस्वत्येहि ॥ असावेह्यसावेह्यसावेहि ॥ २ ॥ अदित्यै रास्ना । सीन्द्राण्याऽउष्णीषः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूषासिंघुर्म्मायंदीष्व ॥ ३ ॥ अश्विभ्यांम्पिन्वस्व ॥ अश्वि
भ्यांम्पिन्वस्वसरंस्वत्यैपिन्वस्वेन्द्रायपिन्वस्व ॥ स्वाहेन्द्रंव
त्स्वाहेन्द्रंवत्स्वाहेन्द्रंवत् ॥ ४ ॥ यस्त्तें ॥ यस्त्तेस्त्तनं÷शश
योयोमंयोभूर्य्योरंत्क्नुधावंसुविद्यःसुदत्रं÷ ॥ येनुविश्वापुष्यं
सिवार्य्याणिसरंस्वतितमिहधातंवेकं ॥ उर्व्वन्तरिंक्षमन्वेंमि
॥ ५ ॥ गायत्रञ्छन्दं÷ ॥ गायत्रञ्छन्दोंसित्रैष्टुंभञ्छन्दोंसि
द्यावांपृथिवीभ्यांन्त्वापरिंगृह्णाम्यन्तरिंक्षेणोपंयच्छामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्राश्विनामधुनꣳसारघस्यघर्म्मम्पातुवसवोयजतुवाट् ॥ स्वा
हासूर्य्यस्यरश्मयेवृष्टिवनये ॥ ६ ॥ समुद्रायत्त्वा ॥ समु
द्रायत्त्वावातायस्वाहासरिरायत्त्वावातायस्वाहा ॥ अनाधृ
ष्यायत्त्वावातायस्वाहाप्रतिधृष्ट्यायत्त्वावातायस्वाहा ॥ अ
वस्यवेत्त्वावातायस्वाहाशिमिदायत्त्वावातायस्वाहा ॥ ७ ॥
इन्द्रायत्त्वा ॥ इन्द्रायत्त्वावसुमतेरुद्रवतेस्वाहेन्द्रायत्त्वादि
त्यवतेस्वाहेन्द्रायत्त्वाभिमातिघ्नेस्वाहा ॥ सवित्रेत्त्वऽऋभुम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेंविभुमतेवाजंवतेस्वाहाबृहस्पतयेत्त्वाविश्वदेंव्यावतेस्वाहां
॥ ८ ॥ [८-१] युमायत्त्वा ॥ युमायुत्त्वाङ्गिरस्वतेपितृम
तेस्वाहां ॥ स्वाहांघुर्म्मायुस्वाहांघुर्म्मशपित्रे ॥ ९ ॥ विश्वाऽ
आशांः ॥ विश्वाऽआशांदक्षिणुसद्विश्वांन्देवानयांडिह ॥
स्वाहांकृतस्यघुर्म्मस्युमधोंःपिबतमश्विना ॥ १० ॥ दिविधांः ॥
दिविधांऽइमँऽयुज्ञमिमँऽयुज्ञन्दिविधांः ॥ स्वाहाग्नयेयु
ज्ञियांयुशँऽयजुंर्ब्भ्यः ॥ ११ ॥ अश्विनाघुर्म्मम् ॥ अश्विनाघु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्म्मम्पातुहृहार्द्वानुमहंर्द्दिवाभिरूतिभिः ॥ तुन्त्रायिणेनमोद्या
वांपृथिवीब्भ्यांम् ॥ १२ ॥ अपांतामश्विनां ॥ घर्म्ममनुद्या
वांपृथिवीऽअंमꣳसाताम् ॥ इहैवरातयंः सन्तु ॥ १३ ॥ इषे
पिन्वस्व ॥ इषेपिन्वस्वोर्ज्जेपिन्वस्वब्रह्मणेपिन्वस्वक्षत्रायंपिन्व
स्वद्यावांपृथिवीब्भ्यांम्पिन्वस्व ॥ धर्म्मांसिसुधर्म्मामेन्द्र्यस्मेनृ
म्णानिंधारयब्रह्मंधारयक्षत्रन्धांरयद्विशंन्धारय ॥ १४ ॥
स्वाहांपूष्णे । शरंसेस्वाहाग्रावंब्भ्यःस्वाहांप्रतिरवेब्भ्यंः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहा पितृभ्यऽऊर्द्धबर्हिर्भ्यो घर्म्मपावभ्यः स्वाहा द्यावापृथि
वीभ्याꣳ स्वाहा विश्वेभ्यो देवेभ्यः ॥ १५ ॥ स्वाहा रुद्राय ।
रुद्रहूतये स्वाहा सञ्ज्योतिषा ज्योतिः ॥ अहः केतुना जुषता
ꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ रात्रिः केतुना जुषताꣳ सुज्यो
तिर्ज्योतिषा स्वाहा ॥ मधुहुतमिन्द्रतमेऽअग्नावश्श्यामं तेदेव
घर्म्मनमस्तेऽअस्तु मामाहिꣳसीः ॥ १६ ॥ अभीमम् ॥
अभीमम्महिमादिवं विप्रो बभूव सप्रथाः ॥ उतश्रवसा पृथि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वी७ंसꣳसीदस्वमुहाँ२॥ऽअंसिरोचंस्वदेवुवीतंमꣳ ॥ विधूम
मंग्नेऽअरुषम्मियेद्धयसृजप्प्रंशस्त्तदर्शतम् ॥ १७ ॥ यातें ।
घर्म्मदिव्याशुग्ग्यागांयुत्र्या७ंहंविर्द्धानें ॥ सातुऽआप्प्यांयता
न्निष्टयांयतान्तस्यैंतेस्वाहां ॥ यातेंघर्म्मान्तरिंक्षेशुग्ग्यात्रिष्टु
ब्भ्याग्नींद्रे ॥ सातुऽआप्प्यांयतान्निष्टयांयतान्तस्यैंतेस्वाहां ॥
यातेंघर्म्मपृथिव्या७ंशुग्ग्याजगत्त्या७ंसदुस्या ॥ सातुऽआ
प्प्यांयतान्निष्टयांयतान्तस्यैंतेस्वाहां ॥ १८ ॥ [१०-२]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षत्रस्यत्त्वा । पुरस्पायुब्रह्मणस्तन्वम्पाहि ॥ विशस्त्वाधर्म्मणाव्वयमनुक्क्रामामसुवितायुनव्यसे ॥ १९॥ चतुः॑स्त्रक्तिन्नाभिः॑ ॥ चतुः॑स्त्रक्तिन्नाभिर्ऋतस्यसुप्रथाः॑सनोव्विश्वायुः॑सुप्रथाः॑सनः॑सुर्व्वायुः॑सुप्रथाः॑ ॥ अपुद्वेषोऽअपुह्वरोन्यव्वतस्यसश्चिम ॥ २० ॥ घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीषन्तेनुव्वर्द्धस्वचाचप्यायस्व ॥ व्वर्द्धिषीमहिचव्वयमाचप्यासिषीमहि ॥ २१ ॥ अचिक्क्रदुद्वृषा॑ ॥ अचिक्क्रदुद्वृषाहरिर्म्महान्मित्रोनदर्शतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सꣳसूर्य्येणदिद्युतदुदुधिर्न्निधिः ॥ २२ ॥ सुमित्रियानः ॥
सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तु
योस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ २३ ॥ उद्वयम् ॥ उद्वयन्त
मसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्म
ज्योतिरुत्तमम् ॥ २४ ॥ एधोसि ॥ एधोस्येधिषीमहिसमि
दसितेजोसितेजोमयिधेहि ॥ २५ ॥ यावतीद्यावापृथिवी ।
यावच्चसप्तसिन्धवोवितस्तिथुरे ॥ तावन्तमिन्द्रतेग्रहमूर्ज्जागृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्णाम्यक्षितम्मयिगृह्णाम्यक्षितम् ॥ २६ ॥ मयित्त्यत् ॥
मयित्त्यदिन्द्रियम्बृहन्मयिदक्षोमयिक्रतुः ॥ घर्म्मस्त्रिशु
ग्विराजतिविराजाज्योतिषासहब्रह्मणातेजसासह॥२७॥ पयं
सोरेतः ॥ पयसोरेतऽआभृतन्तस्यदोहमशीमह्युत्तरामुत्तरा ँ
समाम् ॥ त्विषः संवृक्क्रत्वेदक्षस्यतेसुषुम्णस्यतेसुषुम्णा
ग्निहुतः ॥ इन्द्रपीतस्यप्रजापतिभक्षितस्यमधुमतऽउपहूतऽ
उपहूतस्यभक्षयामि ॥ २८ ॥ [१०-३] ॥ इतिश्रीवाजसनेय-

सं. ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संहितायामष्टत्रिंशोऽध्यायः ॥ ३८ ॥ श्रीवेदपुरुषाय नमः ॥ अनुवाकसूत्रम् ॥ स्वाहाप्राणेब्भ्यःषडु, ग्रश्च सप्त, द्वौ त्रयोदश ॥ [अ. ३९ मं. १३ अनु. २] हरिःॐ ॥ स्वाहाप्प्राणेब्भ्यः ॥ स्वाहाप्प्राणेब्भ्यꣳसाधिपतिकेब्भ्यꣳ ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहावायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा ॥ १ ॥ दिग्भ्यःस्वाहा । चन्द्रायस्वाहानक्षत्रेब्भ्यꣳस्वाहाद्भ्यःस्वाहावरुणायस्वाहा ॥ नाब्भ्यैस्वाहापूतायस्वाहा ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचेस्वाहा। प्राणायस्वाहा प्राणायस्वाहा ॥ चक्षुषेस्वाहा च
क्षुषेस्वाहा श्रोत्रायस्वाहा श्रोत्रायस्वाहा ॥ ३ ॥ मनसः का
मम् ॥ मनसः कामम्माकूतिं वाचः सत्यमशीय ॥ पशूनाꣳरूप
मन्नस्यरसोयशः श्रीः श्रयताम्मयिस्वाहा ॥४॥ प्रजापतिः सम्भ्र
यमाणः। सम्म्राट्सम्भृतोवैश्वदेवः संꣳसन्नोघर्म्मः प्रवृक्तस्ते
जऽउद्यतऽआश्विनः पयस्यानीयमानेपौष्णोविष्यन्दमाने
मारुतः क्लृप्यन् ॥ मैत्रः शरसिसन्ताय्यमानेवायव्योह्रियमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णऽआग्नेयोहूयमानोव्वाग्घुतः ॥ ५ ॥ सुविताप्प्रथमे । हंन्नग्नि
र्द्वितीयेंव्वायुस्तृतीयंऽआदित्यश्चतुर्त्थेंचन्द्रमांःपञ्चमऽऋतुः
षष्ठेमरुतः-सप्तमेबृहस्पतिरष्टमे ॥ मित्रोनवमेवरुणोदशमऽ
इन्द्रंऽएकादशेविश्वेदेवाद्वादशे ॥ ६ ॥ [६-१] उग्रश्च ।
भीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचंविक्षिपः
स्वाहा ॥ ७ ॥ अग्निꣳहृदयेन ॥ अग्निꣳहृदयेनाशनिꣳ
हृदयाग्रेणपशुपतिङ्कृत्स्नुहृदयेनभवँय्युक्ना ॥ शर्वम्मतस्न्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्भ्यामीशानम्मन्युनामहादेवमन्तं पर्शव्येनोग्रन्देवंवनिष्ठु
नाक्षसिष्ठहनुंशिङ्गीनिकोश्श्याभ्याम् ॥ ८ ॥ उग्रँल्लोहितेन ।
मित्रꣳसौर्व्वत्त्येनरुद्रन्दौर्व्वत्त्येनेन्द्रंम्प्रक्रीडेनमरुतोबलेनसा
च्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तंपार्श्र्यम्महादेवस्यय
कृच्छ्रर्व्वस्यवनिष्ठुःपशुपतेंपुरीतत् ॥ ९ ॥ लोमंभ्यःस्वाहा ॥
लोमंभ्यःस्वाहालोमंभ्यःस्वाहात्त्वचेस्वाहात्त्वचेस्वाहालोहि

१ अन्तः पर्शव्येन । अत्र "समानपदे च" (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते "वाजपतिर्वासऽएदिधिपुरन्तः पर्शव्येनान्तः पार्श्र्यमिति च" (शु.य. प्रा. ३ अ. ३८ सू.) इत्यनेन निषिध्यते । अन्तः पार्श्र्यम् इत्यत्र "परंतु रेफहकाराभ्यां" (शु.य.प्रा.४अ.१०१सू.) इत्यनेन शकारस्य द्वित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तायुस्वाहालोहितायुस्वाहामेदोंब्भ्युꣳस्वाहामेदोंब्भ्युꣳस्वाहा॥
मा॒ꣳसेब्भ्युꣳस्वाहामा॒ꣳसेब्भ्युꣳस्वाहास्नावंब्भ्युꣳस्वाहास्नावं
ब्भ्युꣳस्वाहास्त्थब्भ्युꣳस्वाहास्त्थब्भ्युꣳस्वाहामज्जब्भ्युꣳस्वाहा
मज्जब्भ्युꣳस्वाहा ॥ रेतंसेस्वाहापायवेस्वाहा ॥ १० ॥ आया
सायुस्वाहा । प्रायासायुस्वाहासँय्यासायुस्वाहाव्वियासायुस्वा
होद्यासायुस्वाहा ॥ शुचेस्वाहाशोचंतेस्वाहाशोचंमानायुस्वा
हाशोकायुस्वाहा ॥ ११ ॥ तपंसेस्वाहा ॥ तपंसेस्वाहातप्यं

१ प्रायासाय । प्र यास इति पदम् । अत्र प्रवणशृङ्गयासेषु (शु. य. प्रा. ३ अ. १०५ सू.) इत्यनेन प्रशब्दात्यासशब्दे परे प्रशब्दाकारस्य दीर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेस्वाहातप्यमानायस्वाहातप्तायस्वाहाघर्म्मायस्वाहा ॥
निष्कृत्यैस्वाहाप्रायश्चित्यैस्वाहाभेषजायस्वाहा ॥ १२ ॥
यमायस्वाहा ॥ यमायस्वाहान्तकायस्वाहामृत्यवेस्वाहा ॥
ब्रह्मणेस्वाहाब्रह्महत्यायैस्वाहाविश्वेभ्योदेवेभ्यःस्वाहाद्यावा
पृथिवीभ्याꣳस्वाहा ॥ १३ ॥ [७-२] इतिश्रीवाजसनेय-
संहितायामेकोनचत्वारिंशत्तमोऽध्यायः ॥ ३९ ॥ श्रीवेद-
पुरुषाय नमः॥ अनुवाकसूत्रम् ॥ ईशावास्यमष्टा, वन्धन्तमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नव, द्वौ सप्तदश ॥ [अ. ४० मं. १७ अनु. २] हरिःॐ ॥

ईशावास्यम् ॥ ईशावास्यमिदꣳसर्वँयत्किञ्चजगत्त्याञ्जगत् ॥
तेनत्त्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनम् ॥ १ ॥ कुर्वन्नेव ॥
कुर्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाः ॥ एवन्त्वयिना
न्यथेतोस्तिनकर्म्मलिप्यतेनरे ॥२॥ असुर्य्यानाम ॥ असुर्य्या
नामतेलोकाऽअन्धेनतमसावृताः ॥ ताँस्तेप्रेत्त्यापिगच्छन्ति
येकेचात्महनोजनाः ॥३॥ अनेजदेकम् ॥ अनेजदेकम्मनसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जवीयोनैनद्देवाऽआप्नुवन्पूर्व्वमर्शत् ॥ तद्धावतोन्यानत्त्येतिति
ष्ठत्तस्मिन्नपोमातरिश्वादधाति ॥ ४ ॥ तदेजति ॥ तदेजतित
नैजतितद्दूरेतद्वन्तिके ॥ तदन्तरस्यसर्व्वस्यतदुसर्व्वस्यास्यबा
ह्यतः ॥ ५ ॥ यस्तु ॥ यस्तुसर्व्वाणिभूतान्यात्मन्नेवानुप
श्यति ॥ सर्व्वभूतेषुचात्मानन्ततोनविचिकित्सति ॥ ६ ॥
यस्मिन्त्सर्व्वाणि । भूतान्यात्मैवाभूद्विजानतः ॥ तत्रकोमो
हःकःशोकऽएकत्त्वमनुपश्यतः ॥ ७ ॥ सपरि ॥ सपर्य्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम् ॥ कवि
र्मनीषीपरिभूः स्वयम्भूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वती
भ्यः समाभ्यः ॥ ८ ॥ [८-१] अन्धन्तमः ॥ अन्धन्त
मः प्रविशन्ति येसम्भूतिमुपासते ॥ ततो भूयऽइव ते तमो यऽ
उ सम्भूत्याꣳरताः ॥ ९ ॥ अन्यदेव ॥ अन्यदेवाहुः सम्भ
वादन्यदाहुरसम्भवात् ॥ इति शुश्रुम धीराणाँ ये नस्तद्विचच
क्षिरे ॥ १० ॥ सम्भूतिञ्च । विनाशञ्च यस्तद्वेदोभयꣳ सह ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनाशेनमृत्युन्तीर्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥ अन्ध
न्तमः ॥ अन्धन्तमः प्रविशन्तियेविद्यामुपासते ॥ ततोभू
यऽइवतेतमोयऽउविद्यायाꣳरताः ॥ १२ ॥ अन्यदेव ॥
अन्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः ॥ इतिशुश्रुमधी
राणाँयेनस्तद्विचचक्षिरे ॥ १३ ॥ विद्याञ्च ॥ विद्याञ्चा
विद्याञ्चयस्तद्वेदोभयꣳसह ॥ अविद्ययामृत्युन्तीर्त्वाविद्
ययामृतमश्नुते ॥ १४ ॥ वायुरनिलम् ॥ वायुरनिलमृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमथेदम्भस्म्मान्तुꣳशरीरम् ॥ ॐ ३ ॥ क्रतोस्म्मर ॥ क्लिबे स्म्मर ॥ कृतꣳस्मर ॥ १५ ॥ अग्ने नय ॥ सुपथा राये ऽअस्म्मा न्विश्वानि देववयुनानि विद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥ १६ ॥ हिरण्मयेन पात्रेण । सत्त्यस्यापिहितम्मुखम् ॥ योसावादित्येपुरुषꣳसोसावहम् ॥ ॐ ३ ॥ खम्ब्रह्म ॥ १७ ॥ [९-२] [आदितो मन्त्रसंख्या १९७५]

इतिश्रीवाजसनेयसंहितायां चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवेदपुरुषार्पणमस्तु ॥ दशाध्याये समाख्याता अनुवाकास्तु संख्यया ॥ शतं दशानुवाकाश्च नवान्ये च मनीषिभिः ॥ १ ॥ सप्तषष्टिश्चितौ ज्ञेया सौत्रे द्वाविंशतिस्तथा ॥ अश्व एकोनपञ्चाशत्पञ्चत्रिंशत्खिले स्मृताः ॥२॥ शुक्रियेषु तु विज्ञेया एकादश मनीषिभिः ॥ एकीकृत्य समाख्यातं त्रिशतं त्र्यधिकं मतम् ॥३॥ इति श्रीवाजसनेयसंहितायामनुवाकसूत्राध्यायः समाप्तः ॥

इयं श्रीशुक्लयजुर्वेदसंहिता जामनगरनिवासिनाऽऽचार्यावटङ्केन त्रिकमजीतनुजनुषाऽमृतलालशास्त्रिणा या० शिक्षा० का० प्रणीतयजुःप्रातिशाख्यानुसारेण च शके १८७२ चैत्रमासे शुक्लपक्षे प्रतिपदि रविवासरे वत्सरारम्भे संशोधिता "अमृतवर्षिण्या टिप्पण्या" च समलङ्कृता समाप्ता ॥

सं. ६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीवाजसनेयसंहितोत्तरविंशतिः समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथाष्टविकृतिप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लोकपञ्चकम् ।

द्विसप्तत्युत्तरे शाके ह्यष्टादशशते युते । चैत्रे तिथौ प्रतिपदि शुक्ले च रविवासरे ॥ १ ॥
सौराष्ट्रान्तर्गतश्रीमज्जामनगरवासिना । आचार्यामृतलालेन त्रिकंजित्तनुजन्मना ॥ २ ॥
शास्त्रिणा, श्रीयजुर्वेदसंहिता विदुषां कृते । पीयूषवर्षिणीनाम्न्या टिप्पण्या समलङ्कृता ॥ ३ ॥
याज्ञवल्क्यकृतां शिक्षामालोक्यैव यथामति । इयं संशोधिता सुष्ठु प्रातिशाख्यानुसारतः ॥ ४ ॥
प्रसन्नमानसाः सन्तु पितरो गुरवस्तथा । प्रीणातु ललितादेवी चास्मच्छ्रीकुलदेवता ॥ ५ ॥

ग्रन्थोऽयं मोहमय्यां सत्यभामाबाई पाण्डुरङ्ग इत्येताभिर्निर्णयसागरमुद्रणालयस्य कृते
तत्रैव मुद्रापयित्वा प्रकाशितः ।

शकाब्दाः १८७२, सनाब्दाः १९५०.

पब्लिशर—सत्यभामाबाई पांडुरंग
प्रिंटर— रामचंद्र येसू शेडगे
} निर्णयसागर प्रेस, २६।२८ कोलभाट स्ट्रीट, मुंबई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति प्रास्ताविक-संहितामन्त्राणामकाराद्यनुक्रमणिका-वेदपारायणविध्यनुवाकसूत्राध्यायाष्टविकृति-
याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-पारस्करगृह्यसूत्रादिसमलङ्कृता

शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथाष्टौ विकृतीनां स्वरूपकथनम् ॥ कास्ताः ॥ जटा-
मालादण्डरेखारथध्वजाशिखाघनाः ॥ क्रममाश्रित्य निर्वृत्ता
विकारा अष्टविश्रुताः ॥ १ ॥ विश्रुताः ॥ जटा माला शिखा
रेखा ध्वजो दण्डो रथो घनः ॥ अष्टौ विकृतयः प्रोक्ताः क्रम-
पूर्वा महर्षिभिः ॥ २ ॥ द्विपदादिक्रमाः पञ्च प्रक्रमाद्युत्क्रमा
त्ततः ॥ पुनः क्रमादुह्यादिता जटात्वं प्रापिता बुधैः ॥ ३ ॥
वैदिकैः पठ्यमानत्वात्प्रत्यक्षस्मृतिमूलतः ॥ जटाद्यध्ययनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यं पङ्क्तिपावनकारणात् ॥ ४ ॥ जटादिविकृतीनां ये पारायणपरा नराः ॥ महात्मानो द्विजाः श्रेष्ठाः ते ज्ञेयाः पङ्क्तिपावनाः ॥ ५ ॥ इति वाराहपुराणे ॥ मार्कण्डेये च ॥ क्रमाध्ययनसम्पन्नो मन्त्रब्राह्मणपारगः ॥ जटापारायणपरो विष्णुलोके महीयते ॥ ६ ॥ जटापाठपरं विप्रं यो गर्हयति मूढधीः ॥ पुनरावृत्तिसहितं तमः प्राप्नोति नान्यथा ॥ ७ ॥ वृद्धमनुः ॥ वेदवेदार्थतत्त्वज्ञा जटाक्रमविशारदाः ॥ श्रोत्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणाः श्राद्धे ये नराः पङ्क्तिपावनाः ॥ ८ ॥ पराशरः ॥
संहितावित्स्वर्गगामी पदवेदी महर्गतिः ॥ क्रमी जनतपः
सप्तगामी वैकुण्ठभोग्जटी ॥ ९ ॥ यथा ॥ अथ जटा ॥
त्र्यम्बकँ्यजामहेयजामहेत्र्यम्बकंत्र्यम्बकँ्यजामहे । त्र्य
म्बकमिति त्रिऽअम्बकम् । यजामहेसुगन्धिꣳसुगन्धिँ्यजा
महेयजामहेसुगन्धिम् । सुगन्धिम्पुष्टिवर्द्धनम्पुष्टिवर्द्धनꣳसुग
न्धिꣳसुगन्धिम्पुष्टिवर्द्धनम् । सुगन्धिमिति सुऽगन्धिम् । पुष्टि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्द्धनमिति पुष्टिऽवर्द्धनम् ॥ उर्वारुकमिवबन्धनाद्बन्धना
दुर्वारुकमिवोर्वारुकमिवबन्धनात् । उर्वारुकमिवेत्त्युर्वारुकम्
ऽइव । बन्धनान्मृत्योर्म्मृत्योर्बन्धनाद्बन्धनान्मृत्योः ।
मृत्योर्म्मुक्षीयमुक्षीयमृत्योर्म्मृत्योर्मुक्षीय । मुक्षीयमा
मामामुक्षीयमुक्षीयमा । मामृतादमृतान्मामामृतात् ।
अमृतादित्त्यमृतात् ॥ पतिवेदनमितऽइतः पतिवेदनम्पतिवे
दनमितः । पतिवेदनमितिपतिऽवेदनम् । इतोमुक्षीयमु

॥ १४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीयेतऽइतोमुंक्षीय। मुक्षीयुमामामुंक्षीयमुक्षीयुमा ।
मामुतोमुतोमामामुतः । अमुतऽइत्यमुतः ॥१॥ (जटा॥)
पुनंस्त्वात्त्वापुनः पुनंस्त्वा । पुनरितिपुनः । त्वादित्याऽ
आंदित्यास्त्वात्त्वांदित्याः । आदित्यारुद्रारुद्राऽआंदि
त्याऽआंदित्यारुद्राः ॥ रुद्राव्वसंवोव्वसंवोरुद्रारुद्राव्वसंवः ।
व्वसंवःसꣳसंव्वसंवोव्वसंवःसम् । समिंन्धतामिन्धताꣳसꣳ
समिंन्धताम् । इन्धुताम्पुनःपुनंरिन्धतामिन्धताम्पुनंः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनर्ब्रह्माणोब्रह्माणःपुनःपुनर्ब्रह्माणः÷ । ब्रह्माणोवसुनीथव
सुनीथब्रह्माणोब्रह्माणोवसुनीथ । वसुनीथयज्ञैर्यज्ञैर्वसुनी
थवसुनीथयज्ञैः । वसुनीथेतिवसुऽनीथ । यज्ञैरितियज्ञैः ॥
घृतेनत्त्वंत्वङ्घृतेनघृतेनत्त्वम् । त्वन्तन्वन्तन्वन्त्वन्त्वन्तन्वम् ।
तन्वंवर्द्धयस्ववर्द्धयस्वतन्वन्तन्वंवर्द्धयस्व । वर्द्धयस्वसत्त्याः
सत्त्यावर्द्धयस्ववर्द्धयस्वसत्त्याः । सत्त्याःसन्तुसन्तुसत्त्याः
सत्त्याःसन्तु । सन्तुयजमानस्ययजमानस्यसन्तुसन्तुयजमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्य । यजमानस्यकामाꣳकामायजमानस्ययजमानस्यका
माꣳ । कामाऽइतिकामाꣳ ॥ २ ॥ सनोनुꣳससनः । नुꣳपि
तेवंपितेवंनोनꣳपितेवं । पितेवंसूनवेसूनवेपितेवंपितेवंसूनवे ।
पितेवेतिपिताऽइव । सूनवेग्नेग्नेसूनवेसूनवेग्ने । अग्नेसूपायनः
सूपायनोग्नेग्नेसूपायनः । सूपायनोभवभवसूपायनःसूपाय
नोभव । सूपायनऽइतिसूऽउपायनः । भवेतिभव ॥ सचस्वा
नोनुꣳसचस्वसचस्वानꣳ । नुꣳस्वस्तयेस्वस्तयेनोनꣳस्वस्तये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्त्तयऽइतिस्वस्त्तये ॥ ३ ॥ अथ क्रममाला निरूप्यन्ते ॥ ब्रूयात्क्रमविपर्यासानर्धर्चस्यादितोऽन्ततः । अन्तश्चादि नये-देवं क्रममालेति गीयते ॥ १ ॥ क्रमविपर्यासान् ॥ क्रमक्रम-व्युत्क्रमाभ्यामर्धर्चस्यादितः अन्ततो व्युत्क्रमोपक्रममिति विशेषः ॥ ब्रूयात् ॥ एवं क्रमविपर्यासाभ्यां क्रमं ब्रुवन् पुमान् आदित आदित आरभ्य क्रमं समानं समाप्तिं नयेत् ॥ अन्तमन्तत आरब्धं क्रमं आदितः समाप्तिं नयेत् ॥ प्रापये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यर्थः ॥ यथा ॥ ॐ ॥ यज्ञेनयज्ञम् । आसन्नित्यां
सन् । यज्ञमयजन्त । आसन्प्रथमानि । अयजन्तदेवाः ।
प्रथमानिधर्म्माणि । देवास्तानि । धर्म्माणितानि । तानि
धर्म्माणि । तानिदेवाः । धर्म्माणिप्रथमानि । देवाऽअय
जन्त । प्रथमान्यासन् । अयजन्तयज्ञम् । आसन्नित्यासन् ।
यज्ञँयज्ञेन ॥ तेह । देवाऽइतिदेवाः । हुनाकम् । देवाः
सन्ति । नाकम्महिमानः । सन्तिसाद्ध्याः । महिमानः

सं. ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचन्त । साद्धयाः पूर्वे । सुचन्तुयत्रं । पूर्वेयत्रं । यत्रपूर्वे । यत्रंसचन्त । पूर्वेसाद्धयाः । सुचन्तुमहिमानं÷ । साद्धयाः सन्ति । महिमानोनाकम् । सन्तिदेवाः । नाकꣳह । देवाऽ इतिदेवाः । हुते ॥ १ ॥ मालामालेवपुष्पाणां पदानां ग्रथिनी हि सा ॥ आवर्त्तते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः ॥ १ ॥ यथा ॥ अथपुष्पमालाविकृतिः ॥ परीत्त्यंभूतानि । भूतानि परीत्त्यं । परीत्त्यंभूतानि । परीत्त्येतिपरीऽइत्त्यं । भूतानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परीत्यं । परीत्यंभूतानि । भूतानिपरीत्यं । परीत्यंलोकान् ।
लोकान्परीत्यं । परीत्यंलोकान् । परीत्येतिपरीऽइत्यं ।
लोकान्परीत्यं । परीत्यंलोकान् । लोकान्परीत्यं । परीत्यु
सर्वां÷ । सर्वां÷परीत्यं । परीत्युसर्वां÷ । परीत्येतिपरीऽ
इत्यं । सर्वां÷प्रदिशं÷ । प्रदिशꣳसर्वां÷ । सर्वां÷प्रदिशं÷ ।
प्रदिशोदिशं÷ । दिशं÷प्रदिशं÷ । प्रदिशोदिशं÷ । प्रदि
शऽइतिप्रदिशं÷ । दिशंश्च । चादिशं÷दिशंश्च । चेतिच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपस्त्थायंप्प्रथमजाम् । प्रथमजामुपस्त्थायं । उपस्त्थायं प्प्रथमजाम् । उपस्त्थायेत्त्युपऽस्थायं । प्रथमजामृतस्यं । ऋतस्यंप्प्रथमजाम् । प्रथमजामृतस्यं । प्रथमजामितिंप्प्रथमऽजाम् । ऋतस्यात्क्मनां । आत्क्मनंऽऋतस्यं । ऋतस्यात्क्मनां । आत्क्मनात्क्मानंम् । आत्क्मानंमात्क्मनां । आत्क्मनात्क्मानंम् । आत्क्मानंमभि । अभ्यात्क्मानंम् । आत्क्मानंमभि । अभिसम् । समभि । अभिसम् । संवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेश । व्विवेशसम् । संव्विवेश । व्विवेशेतिंव्विवेश ॥ १ ॥
परिद्यावांपृथिवी । द्यावांपृथिवीपरिं । परिद्यावांपृथिवी ।
द्यावांपृथिवीसद्य? । सद्योद्यावांपृथिवी । द्यावांपृथिवीसद्य? ।
द्यावांपृथिवीऽइतिद्यावांपृथिवी । सद्यऽइत्त्वा । इत्त्वासद्य? ।
सद्यऽइत्त्वा । इत्त्वापरिं । परीत्त्वा । इत्त्वापरिं । परिंलो
कान् । लोकान्परिं । परिंलोकान् । लोकान्परिं । परिंलो
कान् । लोकान्परिं । परिदिशं÷ । दिशंपरिं । परिदिशं÷ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिशुꣳपरि । परिदिशः÷ । दिशुꣳपरि । परिस्वः÷ । स्वꣳपरि । परिस्वः÷ । स्वरितिस्वः÷ ॥ ऋतस्यतन्तुम् । तन्तुमृतस्य । ऋतस्यतन्तुम् । तन्तुंवितंतम् । वितंतन्तन्तुम् । तन्तुंवितंतम् । वितंतंव्रिचृत्त्य । व्रिचृत्त्यवितंतम् । वितंतंव्रिचृत्त्य । वितंतु मितिवीऽतंतम् । व्रिचृत्त्यतत् । तद्व्रिचृत्त्य । व्रिचृत्त्यतत् । व्रिचृत्त्येतिवीऽचृत्त्य । तदंपश्श्यत् । अपुश्श्युत्तत् । तदंप श्श्यत् । अपुश्श्युत्तत् । तदंपश्श्यत् । अपुश्श्युत्तत् । तदं

॥ १५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवत् । अभवत्तत् । तदंभवत् । अभवत्तत् । तदंभवत् । अभवत्तत् । तदांसीत् । आसीत्तत् । तदांसीत् । आसीदित्त्यांसीत् ॥ २ ॥ इति पुष्पमालाविकृतिः ॥

॥ अथ पञ्चसंधीविकृतिमन्त्रः ॥

ॐ बण्महान् । महान्महान् । महान्बट् । बट्बट् । बण्महान् । महाँ२ऽअंसि । अस्यसि । असिमहान् । महान्महान् । महाँ२ऽअंसि । असिसूर्य्य । सूर्य्यसूर्य्य । सूर्य्यासि । अस्यसि । असि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्य्य । सूर्य्यबट् । बट्बट् । बट्सूर्य्य । सूर्य्यसूर्य्य । सूर्य्यबट् । बडादित्य । आदित्यादित्य । आदित्यबट् । बट्बट् । बडादित्य । आदित्यमहान् । महान्महान् । महानादित्य । आदित्यादित्य । आदित्यमहान् । महाँ२ऽअसि । असिसि । असिमहान् । महान्महान् । महाँ२ऽअसि । असीत्यसि ॥ महस्ते । ते ते । तेमह? । महोमह? । महस्ते । तेसत? । सत?सत? । सतस्ते । ते ते । तेसत? । सतोमहिमा । महिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंहिमा । मुहिमासुतः । सुतःसुतः । सुतोमंहिमा । महि
मापंनस्यते । पुनस्यतेपुनस्यते । पुनस्यतेमुहिमा । मुहिमा
मंहिमा । मुहिमापंनस्यते । पुनस्यतेद्धा । अुद्धाद्धा । अुद्धा
पंनस्यते । पुनस्यतेपुनस्यते । पुनस्यतेद्धा । अुद्धादेव । देव
देव । देवाद्धा । अुद्धाद्धा । अुद्धादेव । देवमुहान् । मुहान्मु
हान् । मुहान्देव । देवदेव । देवमुहान् । मुहाँ२ऽअंसि ।
अस्यसि । असिमुहान् । मुहान्मुहान् । मुहाँ२ऽअंसि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असीत्त्यंसि ॥ १ ॥ बट्सूर्य्य । सूर्य्यसूर्य्य । सूर्य्यबट् । बट्बट् । बट्सूर्य्य । सूर्य्यश्श्रवंसा । श्रवंसाश्श्रवंसा । श्रवंसा सूर्य्य । सूर्य्यसूर्य्य । सूर्य्यश्श्रवंसा । श्रवंसामहान् । महान्महान् । महान्छ्रवंसा । श्रवंसाश्श्रवंसा । श्रवंसामहान् । महाँ २ऽअंसि । अस्यसि । असिमहान् । महान्महान् । महाँ२ऽ अंसि । असिसत्रा । सत्रासत्रा । सत्रासि । अस्यसि । असि सत्रा । सत्रादेव । देवदेव । देवसत्रा । सत्रासत्रा । सत्रादेव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवमहान् । महान्महान् । महान्देव । देवदेव । देवमहान् । महाँ२ऽअंसि । अस्यसि । असिमहान् । महान्महान् । महाँ२ऽअंसि । असीत्त्यंसि ॥ मन्हादेवानांन् । देवानांन्देवानांम् । देवानांन्मह्ना । मह्नामह्ना । मह्नादेवानांम् । देवानांमसुर्य्यः । असुर्य्योसुर्य्यः । असुर्य्योदेवानांम् । देवानांन्देवानांम् । देवानांमसुर्य्यः । असुर्य्यःपुरोहितः । पुरोहितः पुरोहितः । पुरोहितोसुर्य्यः । असुर्य्योसुर्य्यः । असुर्य्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरोहितः । पुरोहितोव्विभु । व्विभुव्विभु । व्विभुपुरोहितः । पुरोहितःपुरोहितः । पुरोहितोव्विभु । पुरोहितऽइतिपुरः हितः । व्विभुज्योतिः । ज्योतिर्ज्योतिः । ज्योतिर्व्विभु । व्विभुव्विभु । व्विभुज्योतिः । व्विब्भिवतिव्विभू । ज्योतिरदाब्भ्यम् । अदाब्भ्युमदाब्भ्यम् । अदाब्भ्युज्योतिः । ज्योतिर्ज्योतिः । ज्योतिरदाब्भ्यम् । अदाब्भ्युमित्त्यदाब्भ्यम् ॥ २ ॥

अथ शिखा ॥ पदोत्तरां शिखामेव जटायामः प्रचक्षते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्याः पदोत्तरसंक्रमा जटां शिखां प्रवदन्ति ॥ यथा ॥
श्रीश्चंचश्श्रीःश्रीश्चंते। चुतेतेचुचुतेलुक्ष्मीः। तेलुक्ष्मीर्लुक्ष्मीस्तें
तेलुक्ष्मीश्चं। लुक्ष्मीश्चंचलुक्ष्मीर्लुक्ष्मीश्चपत्क्यौ। चुपत्क्यौप
त्क्यौचचुपत्कन्यांवहोरात्रे। पत्क्यांवहोरात्रेऽअंहोरात्रेपत्क्यौ
पत्क्यांवहोरात्रेपार्श्वे। अहोरात्रेपार्श्वेपार्श्वेऽअंहोरात्रेऽपार्श्वेन
क्षंत्राणि। अहोरात्रेऽइत्यंहोरात्रे। पार्श्वेनक्षंत्राणिनक्षं
त्राणिपार्श्वेपार्श्वेनक्षंत्राणिरूपम्। पार्श्वेऽइतिंपार्श्वे। नक्षं

सं. ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्राणिरूपꣳरूपन्नक्षंत्राणिनक्षंत्राणिरूपमश्विनौ । रूपम्
श्विनांवश्विनौरूपꣳरूपमश्विनौव्यात्तम् । अश्विनौव्यात्तं
व्यात्तमश्विनांवश्विनौव्यात्तम् । व्यात्तमितिवीऽआत्तम् ॥
इष्णन्निषाणेषाणेष्णन्निष्णन्निषाणामुम् । इषाणामुममु
मिषाणेषाणामुम्मे । अमुम्मेमेमुममुम्मंऽइषाण । मुऽइषाणे
षाणमेमऽइषाणसर्व्वलोकम् । इषाणसर्व्वलोकꣳसर्व्वलोकमि
षाणेषाणसर्व्वलोकम्मे । सर्व्वलोकम्मेमेसर्व्वलोकꣳसर्व्वलोकम्मं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽइषाण । सर्व्वलोकमितिसर्व्वऽलोकम् । मइषाणेषाणमेमऽइ
षाण । इषाणेतीषाण ॥ १ ॥ धातारातीरातिर्धाताधातारा
तिः संविता । रातिः संवितासंवितारातीरातिः संवितेदम् । स
वितेदमिदꣳ संवितासंवितेदञ्जुषन्ताम् । इदञ्जुषन्ताञ्जुषन्ता
मिदमिदञ्जुषन्ताम्प्रजापतिः । जुषन्ताम्प्रजापतिःप्रजापति
र्ज्जुषन्ताञ्जुषन्ताम्प्रजापतिर्निधिपाः । प्रजापतिर्निधिपानिधि
पाः प्रजापतिःप्रजापतिर्निधिपादेवः । प्रजापतिरितिप्रजाऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिः । निधिपादेवोदेवोनिधिपादेवोऽअग्निः । निधिपाऽ
इतिनिधिऽपाः । देवोऽअग्निरग्निर्देवोदेवोऽअग्निः । अग्निरि
त्त्यग्निः ॥ त्वष्टाविष्णुर्विष्णुस्त्वष्टात्वष्टाविष्णुः प्रजया ।
विष्णुः प्रजयाप्रजयाविष्णुर्विष्णुः प्रजयासꣳरराणाः ।
प्रजयासꣳरराणाःसꣳरराणाःप्रजयाप्रजयासꣳरराणायज
मानाय । प्रजयेतिप्रऽजया । सꣳरराणायजमानायुयजमा
नायसꣳरराणाःसꣳरराणायजमानायुद्रविणम् । सꣳरराणा

॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽइतिसम्ऽरराणा२। यजमानायुद्रविणुन्द्रविणुञ्यजमानायुय
जमानायुद्रविणन्दधात। द्रविणन्दधातदधातुद्रविणुन्द्रविण
न्दधातुस्वाहा। दुधातुस्वाहुस्वाहादधातदधातुस्वाहा। स्वाहे
तिस्वाहा॥ २॥ अथ रेखा॥ क्रमाद्द्वित्रिचतुःपञ्चपदक्रममु
दाहरेत्। पृथक् पृथक् विपर्यस्य रेखामाहुः पुनः क्रमात्
॥ १॥ क्रमात्॥ अनुःक्रमात्॥ द्वित्रीचतुःपञ्चपदः क्रमम्
प्रत्येकं प्रत्येकं विपर्यस्य क्रमादुदाहरेत्॥ एवमुक्त्वा विकृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिन्नाम रेखां प्रचक्षते ॥ महान्त आहुरित्यर्थः ॥ यथा ॥
ॐ बृहस्पतेपरि । परिबृहस्पते । बृहस्पतेपरि । परिदीया
रथेन । रथेनदीयपरि । परिदीय । दीयारथेन । रथेनरक्षोहा
मित्राँ२ऽअपबाधमानः । अपबाधमानोमित्रान्रक्षोहारथेन ।
रथेनरक्षोहा । रक्षोहामित्रान् । रक्षोहेतिरक्षःऽहा ।
अमित्राँ२ऽअपबाधमानः । अपबाधमानऽइत्त्यपऽबाधमा ॥ १६० ॥
नः ॥ प्रभञ्जन्त्सेनाःप्रमृणोयुधाजयन् । जयन्युधाप्रमृण२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेनांꣳप्रभुञ्जन् । प्रभुञ्जन्निति प्रऽभुञ्जन् । सेनांꣳप्रमृणः । प्रमृणोयुधा । प्रमृणऽइति प्रऽमृणः । युधाजयन् । जयन्नस्माकमेद्ध्यवितारथानाम् । रथानामवितैद्ध्यस्माकञ्जयन् । जयन्नस्माकम् । अस्माकमेधि । एद्ध्यविता । अविता रथानाम् । रथानामितिरथानाम् ॥ १ ॥ इति रेखाविकृतिः ॥ अथ ध्वजः ॥ भूयादादेः क्रमं सम्यग्गन्तादुच्चारयेदिति । वर्गे वा ऋचि वा यत्र पठनं स ध्वजः स्मृतः ॥ वर्गे वा ऋचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्यादिः ॥ आदित आरभ्य सम्यक् क्रमं ब्रूयात् ॥ अन्ता-
दयं क्रममारभ्य सम्यगुत्तारयेत् ॥ एकमेकं पूर्वं पूर्वं पदं
अन्तोपान्त्यादिक्रमपूर्वे अनुक्रमेणावार्षयदित्यर्थः ॥ इति
ये सादितं स्यात् ॥ स ध्वज इत्यर्थः ॥ यथा ॥ ॐ बृहं
स्पतेपरिं । रथांनामितिरथांनाम् । परिंदीय । अवितारथां
नाम् । दीयपरिं । एद्ध्यविता । रथेंनरक्षोहा । अस्माकं
मेधि । रक्षोहामित्रांन् । जयंन्नस्माकंम् । रक्षोहेतिंरक्षुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽहा। युधाजयंन्। अमित्राँ२ऽअपबाधंमानः। प्रमृणोयुधा।
प्रभुञ्जन्त्सेनाः। सेनाःप्प्रमृणः। प्रभुञ्जन्निति प्प्रऽभुञ्जन्।
सेनाःप्प्रमृणः। प्रभुञ्जन्त्सेनाःप्प्रमृणोयुधा। अपबाधंमान
ऽइत्त्यंपऽबाधंमानः। प्रमृणऽइति प्प्रऽमृणः। अमित्राँ२ऽ
अपबाधंमानः। युधाजयंन्। रक्षोहेति रक्षःऽहा।
जयंन्नस्म्माकंम्। रक्षोहामित्रांन्। अस्म्माकंमेधि।
रथेंनरक्षोहा। एद्ध्यविता। दीयारथेंन। अवितारथां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम् । परिदीय । रथानामितिरथानाम् । बृहस्पते परि ॥ १ ॥ इति ध्वजाविकृतिः ॥ अथ दंडः ॥ क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम् ॥ अर्धर्चादेवमुक्त्वोक्तः क्रमदण्डोऽभिधीयते ॥ १ ॥ पुनश्च पुनरपि आदित आरभ्य क्रममुच्चरेत् ॥ एवं पूर्वार्धर्चक्रमसम्बन्धत्वेनोत्तरार्द्धर्चं क्रममुक्त्वा ॥ पूर्वार्धं चादिपदपर्यन्तं विपर्यासेन संहितामुक्त्वा ॥ पुनस्ततऽआरभ्योत्तरार्धर्चस्थपर्यन्तं किंकसोवाश्च एवेत्यन्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेत्याह ॥ अर्धर्चादिति अर्धर्चपरिसमाप्तिपर्यन्तं एवायं नि-
यमः ॥ तस्योक्ता उच्चारेण दण्डो नाम विकृतिविशेषोऽभिधी-
यते ॥ यथा ॥ ॐताऽउभौ । उभौतौ । ताऽउभौ । उभौचतुरं÷ ।
चतुरंऽउभौतौ । ताऽउभौ । उभौचतुरं÷ । चतुरं÷पदः ।
पदश्चतुरंऽउभौतौ । ताऽउभौ । उभौचतुरं÷ । चतुरं÷पदः ।
पदःसम्प्रसारयाव । सम्प्रसारयावपदश्चतुरंऽउभौतौ । ताऽ
उभौ । उभौचतुरं÷ । चतुरं÷पदः । पदःसम्प्रसारयाव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्प्रसारयावस्वर्ग्गे । स्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गे लोके । लोकेस्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । स्वर्ग्गेऽइतिस्वःऽगे । लोकेप्र । प्रलोकेस्वर्ग्गेसम्प्रसारयावपद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चतुरंऽउभौतौ । ताउभौ । उभौचतुरं÷ । चतुरं÷पद? ।
पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्गे । सम्प्रसारयावेतिस
म्ऽप्रसारयाव । स्वर्गेलोके । स्वर्गऽइतिस्वंऽगे । लोकेप्र ।
प्रोर्णुवाथाम् । ऊर्णुवाथाम्प्रलोकेस्वर्गेसम्प्रसारयावपदश्च
तुरंऽउभौतौ । ताऽउभौ । उभौचतुरं÷ । चतुरं÷पद? । पद?
सम्प्रसारयाव । सम्प्रसारयावस्वर्गे । सम्प्रसारयावेतिसम्ऽ
प्रसारयाव । स्वर्गेलोके । स्वर्गऽइतिस्वंऽगे । लोकेप्र ।

सं. ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषां । वृषोर्ण्णुवाथाम्प्रलोकेस्वर्ग्गे सम्प्रसारयावपदश्चतुरंऽउभौतौ । ताऽउभौ । उभौचतुरं÷ । चतुरं÷पदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । स्वर्ग्गऽ इतिस्वः÷ऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषां । वृषांवाजी । वाजीवृषोर्ण्णुवाथाम्प्रलोकेस्वर्ग्गेसम्प्रसारयाव पदश्चतुरंऽउभौतौ । ताऽउभौ । उभौचतुरं÷ । चतुरं÷पदः ।

॥ १६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद॑ऽसम्प्रसा॑रयाव । सम्प्रसा॑रयावस्वर्गे । सम्प्रसा॑रयावेति॑सम्ऽ
प्रसा॑रयाव । स्वर्गे॑लोके । स्वर्गऽइति॑स्व॑ऽगे । लोके॑प्र ।
प्रोर्णुवाथाम् । ऊर्णुवाथां॑वृषा॑ । वृषा॑वाजी । वाजीरे॑तो
धाः । रेतोधावाजीवृषोर्णुवाथाम्प्रलोकेस्वर्गेसम्प्रसा॑रयावप
दश्चतुरं॑ऽउभौतौ । ताऽउभौ । उभौचतुरं॑÷ । चतुरं॑÷पद॑ऽ ।
पद॑ऽसम्प्रसा॑रयाव । सम्प्रसा॑रयावस्वर्गे । सम्प्रसा॑रयावेति॑स
म्ऽप्रसा॑रयाव । स्वर्गे॑लोके । स्वर्गऽइति॑स्व॑ऽगे । लोके॑प्र ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषां । वृषांवाजी । वाजीरेतोधाः । रेतोधारेतः । रेतोरेतोधावाजीवृषोर्ण्णुवाथाम्प्रलोकेस्वर्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्गेलोके । स्वर्गऽइति स्वःऽगे । लोकेप्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषां । वृषां वाजी । वाजीरेतोधाः । रेतोधारेतः । रेतोधाऽइतिरेतःऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धाः । रेतोदधातु । दुधातुरेतोरेतोधाश्वाजीवृषोर्ण्णुवाथाम्प्र
लोकेस्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौ
चतुरः । चतुरः÷पदः । पदःसम्प्रसारयाव । सम्प्रसारयाव
स्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके ।
स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथां
वृषा । वृषाश्वाजी । श्वाजीरेतोधाः । रेतोधारेतः÷ । रेतोधाऽइति
रेतःऽधाः । रेतोदधातु । दुधात्त्वितिदधातु ॥१॥ इति दण्डक्रमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ क्रमरथः ॥ पादशोर्धर्चशो वापि सहोक्त्वा दण्डवद्रथः ॥ ऋचोर्धर्चयोः पदयोर्दण्डवत्संहितापदक्रमैः ॥ १ ॥ सहोक्त्वा रथो विहितो भवतीत्यर्थः ॥ सहोक्तिरेव रथ इति यावत् ॥ यथा ॥ चतुष्पाद्रथः ॥ ॐ स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । नः स्वस्ति । नः स्वस्ति । नः स्वस्ति । नः स्वस्ति । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । नऽइन्द्रः । नः पूषा । नस्त्वा

॥ १६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ष्र्यः । नोबृहस्पतिः । इन्द्रोनःस्वस्ति । पूषानः
स्वस्ति । ताक्ष्र्योनःस्वस्ति । बृहस्पतिर्नःस्वस्ति । स्वस्ति
नः । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । नऽइन्द्रः । ।
नःपूषा । नस्ताक्ष्र्यः । नोबृहस्पतिः । इन्द्रोवृद्ध
श्रवाः । पूषाविश्ववेदाः । ताक्ष्र्योऽअरिष्टनेमिः । बृह
स्पतिर्दधातु । वृद्धश्रवाऽइन्द्रोनःस्वस्ति । विश्ववेदाःपूषा
नः स्वस्ति । अरिष्टनेमिस्ताक्ष्र्योनःस्वस्ति । दधातुबृह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पतिर्नः स्वस्ति । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । नऽइन्द्रः । नः पूषा । नस्तार्क्ष्यः । नो बृहस्पतिः । इन्द्रो वृद्धश्रवाः । पूषा विश्ववेदाः । तार्क्ष्योऽअरिष्टनेमिः । बृहस्पतिर्दधातु । वृद्धश्रवाऽइति वृद्धऽश्रवाः । विश्ववेदाऽइति विश्वऽवेदाः । अरिष्टनेमिरित्यरिष्टऽनेमिः । दधात्वितिदधातु ॥ १ ॥ इति चतुष्पाद्रथः ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ द्विपाद्रथः ॥

ॐ अनिंशितोसि । अनिंशितासि । अस्यनिंशितꣳ । अस्यनिंशिता । अनिंशितोसि । अनिंशितासि । अनिंशितऽइत्त्यनिंशितꣳ । अनिंशितेत्त्यनिंऽशिता । असिसपत्क्नक्षित् । असिसपत्क्नक्षित् । सपत्क्नक्षदस्यनिंशितꣳ । सपत्क्नक्षदस्यनिंशिता । अनिंशितोसि । अनिंशितासि । अनिंशितइत्त्यनिंऽशितꣳ । अनिंशितेत्त्यनिंऽशिता । असि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपत्क्नुक्षित् । असिसुपत्क्नुक्षित् । सुपत्क्नुक्षद्वाजिनम् । सुपत्क्नुक्षद्वाजिनीम् । वाजिनꣳसपत्क्नुक्षदुस्यनिशितꣳ । वाजिनीꣳसपत्क्नुक्षदुस्यनिशिता । अनिशितोसि । अनिशितासि । अनिशितऽइत्त्यनिऽशितꣳ । अनिशितेत्त्यनिऽशिता । असिसुपत्क्नुक्षित् । असिसुपत्क्नुक्षित् । सुपत्क्नुक्षद्वाजिनम् । सुपत्क्नुक्षद्वाजिनीम् । सुपत्क्नुक्षदितिसपत्क्नुऽक्षित् । सुपत्क्नुक्षदितिसपत्क्नुऽक्षित् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाजिनंन्त्वा । वाजिनींन्त्वा । त्वावाजिनꣳसपत्क्नक्षिदस्य
निंशितꣳ । त्वावाजिनींꣳसपत्क्नक्षिदस्यनिंशिता । अनिंशि
तोसि । अनिंशितासि । अनिंशितऽइत्त्यनिंऽशितꣳ । अनिंशि
तेत्त्यनिंऽशिता । असिसपत्क्नक्षित् । असिसपत्क्नक्षित् ।
सपत्क्नक्षिद्वाजिनंम् । सपत्क्नक्षिद्वाजिनींम् । सपत्क्न
क्षिदितिंसपत्क्नऽक्षित् । सपत्क्नक्षिदितिंसपत्क्नऽक्षित् ।
वाजिनंन्त्वा । वाजिनींन्त्वा । त्वावाजेद्वयायैं । त्वावाजे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धयायै। वाजेद्धयायैत्त्वावाजिनꣳसपत्क्नुक्षिदुस्यनिशितꣳ। वाजेद्धयायैत्त्वावाजिनीꣳसपत्क्नुक्षिदुस्यनिशिता। अनिशितोसि। अनिशितासि। अनिशितऽइत्त्यनिऽशितꣳ। अनिशितेत्त्यनीऽशिता। असिसपत्क्नुक्षित्। असिसपत्क्नुक्षित्। सपत्क्नुक्षिद्वाजिनम्। सपत्क्नुक्षिद्वाजिनीम्। सपत्क्नुक्षिदितिसपत्क्नुऽक्षित्। सपत्क्नुक्षिदितिसपत्क्नुऽक्षित्। वाजिनन्त्वा। वाजिनीन्त्वा। त्वावाजेद्धयायै। त्वावाजेद्धयायै।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्वाजेद्धयायैसम् । व्वाजेद्धयायैसम् । संव्वाजेद्धयौयत्त्वाव्वाजि
नꣳसपत्क्नक्षिदुस्यनिशितꣳ । संव्वाजेद्धयायैत्त्वाव्वाजिनीꣳ
सपत्क्नक्षिदुस्यनिशिता । अनिशितोसि । अनिशितासि ।
अनिशितऽइत्त्यनिऽशितꣳ । अनिशितेत्त्यनीऽशिता । असि
सपत्क्नक्षित् । असिसपत्क्नक्षित् । सपत्क्नक्षिद्व्वाजि
नम् । सपत्क्नक्षिद्व्वाजिनीम् । सपत्क्नक्षिदितिसपत्क्नऽ
क्षित् । सपत्क्नक्षिदितिसपत्क्नऽक्षित् । व्वाजिनन्त्वा ।

सं. ६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाजिनीन्त्वा । त्वावाजेद्धयायै । त्वावाजेद्धयायै । वाजे
द्धयायैसम् । वाजेद्धयायैसम् । वाजेद्धयायाऽइतिवाजऽइ
द्धयायै । वाजेद्धयायाऽइतिवाजऽइद्धयायैसम्मार्ज्मि । सम्मा
र्ज्मि । मार्ज्मिसंवाजेद्धयायैत्त्वावाजिनꣳसपत्क्नुक्षिदुस्य
निशितꣳ । मार्ज्मिसंवाजेद्धयायैत्त्वावाजिनीꣳसपत्क्नुक्षि
दुस्यनिशिता । अनिशितोसि । अनिशितासि । अनिशितऽ
इत्त्यनिशितꣳ । अनिशितेत्त्यनीऽशिता । असिसपत्क्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षित् । असिसपत्क्नक्षित् । सपत्क्नक्षद्वाजिनम् । सप
त्क्नक्षद्वाजिनीम् । सपत्क्नक्षदितिसपत्क्नऽक्षित् ।
सपत्क्नक्षदितिसपत्क्नऽक्षित् । वाजिनन्त्वा । वाजि
नीन्त्वा । त्वावाजेद्धयायै । त्वावाजेद्धयायै । वाजेद्धयायै
सम् । वाजेद्धयायैसम् । वाजेद्धयायाऽइतिवाजऽइद्ध्यायै ।
वाजेद्ध्यायाऽइतिवाजऽइद्ध्यायै । सम्मार्ज्मि । सम्मा
र्ज्मि । मार्ज्मीतिमार्ज्मि । मार्ज्मीतिमार्ज्मि ॥ २ ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विपाद्क्रमरथः ॥ ॥ अथ घनः ॥ शिखा जटा घनः प्रोक्ता इत्यष्टौ विकृतीः पठेत् ॥ अथ द्वितीयः प्रकारो घनः ॥ अन्तक्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् । आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ॥ यथा ॥ हरिः ॐ ॥ गुणानान्त्वात्त्वागुणानाङ्गुणानान्त्वागुणपतिङ्गुणपतिन्त्वागुणानाङ्गुणानान्त्वागुणपतिम् ॥ त्वागुणपतिङ्गुणपतिन्त्वात्त्वागुणपतिꣳहवामहेहवामहेगुणपतिन्त्वात्त्वागुणपतिꣳहवामहे । गुणपतिꣳहवामहेह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वामहेगुणपंतिङ्गुणपंतिꣳहवामहेप्प्रियाणांम्प्रियाणांꣳहवाम
हेगुणपंतिङ्गुणपंतिꣳहवामहेप्प्रियाणांम् । गुणपंतिमितिंगुणऽ
पंतिम् । हवामहेप्प्रियाणांम्प्रियाणांꣳहवामहेहवामहेप्प्रिया
णांम्प्रियपंतिम्प्रियपंतिम्प्रियाणांꣳहवामहेहवामहेप्प्रियाणां
म्प्रियपंतिम् । प्रियाणांम्प्रियपंतिम्प्रियपंतिम्प्रियाणांम्प्रिया
णांम्प्रियपंतिन्निधीनान्निंधीनाम्प्रियपंतिम्प्रियाणांम्प्रियाणां
म्प्रियपंतिन्निधीनाम् । प्रियपंतिन्निधीनान्निंधीनाम्प्रियपंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्प्रियपतिन्निधीनान्निधिपतिन्निधिपतिन्निधीनाम्प्रियपतिम्प्रियपतिन्निधीनान्निधिपतिम् । प्रियपतिमितिप्प्रियऽपतिम् । निधीनान्निधिपतिन्निधिपतिन्निधीनान्निधीनान्निधीपतिव्वसोव्वसोनिधीपतिन्निधीनान्निधीनान्निधिपतिव्वसो । निधीनामितिनीऽधीनाम् । निधिपतिव्वसोव्वसोनिधिपतिन्निधिपतिव्वसोममममव्वसोनिधिपतिन्निधिपतिव्वसोमम । निधिपतिमितिनिधीऽपतिम् । व्वसोममममव्वसोव्वसोमम । व्वसोऽइतिव्वसो । ममे

॥ १७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिंमम ॥ आहमुहमाहमंजान्यजान्युहमाहमंजानि । अुह
मंजान्यजान्युहमुहमंजानिगर्ब्भुधङ्गंर्ब्भुधमंजान्युहमुहमं
जानिगर्ब्भुधम् । अुजानिगुर्ब्भुधङ्गंर्ब्भुधमंजान्यजानिगर्ब्भु
धमात्त्वन्त्वमागंर्ब्भुधमंजान्यजानिगर्ब्भुधमात्त्वम् । गुर्ब्भु
धमात्त्वन्त्वमागंर्ब्भुधङ्गंर्ब्भुधमात्त्वमंजास्यजासित्त्वमागंर्ब्भु
धङ्गंर्ब्भुधमात्त्वमंजासि । गुर्ब्भुधमितिंगर्ब्भुऽधम् । आत्त्वम् ।
त्वमंजास्यजासित्त्वन्त्वमंजासिगर्ब्भुधङ्गंर्ब्भुधमंजासित्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्वमंजासिगर्भ्भधम् । अजासिगर्भ्भधङ्गर्भ्भधमंजास्यजासि
गर्भ्भधम् । गर्भ्भधमितिंगर्भ्भऽधम् ॥ १ ॥ अम्बेऽअम्बिके
म्बिकेम्बेम्बेऽअम्बिकेम्बांलिकेम्बांलिकेम्बिकेम्बेम्बेऽअम्बिके
म्बांलिके । अम्बिकेम्बांलिकेम्बांलिकेम्बिकेम्बिकेम्बांलिकेन
नाम्बांलिकेम्बिकेम्बिकेम्बांलिकेन । अम्बांलिकेननाम्बांलिके
बांलिकेनमांमानाम्बांलिकेबांलिकेनमां । नमांमाननमांनय
तिनयतिमाननमांनयति । मानयतिनयतिमामानयतिकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोनंयतिमामानयतिक्ः । नयतिक्ःकोनंयतिनयतिकश्चन
चनकोनंयतिनयतिकश्चन । कश्चनचनक्ःकश्चन । चनेतिं
चन ॥ ससंस्त्त्यश्चकोश्चक्ःससंस्त्तिससंस्त्त्यश्चक्ःसुभंद्रि
काँ०सुभंद्रिकामश्चक्ःससंस्त्तिससंस्त्त्यश्चक्ःसुभंद्रिकाम् ।
अश्चक्ःसुभंद्रिकाँ०सुभंद्रिकामश्चकोश्चक्ःसुभंद्रिकाङ्काम्पी
लवासिनींङ्काम्पीलवासिनीँ०सुभंद्रिकामश्चकोश्चक्ःसुभंद्रि
काङ्काम्पीलवासिनींम् । सुभंद्रिकाङ्काम्पीलवासिनींङ्काम्पील

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासिनी ँ सुभद्रिका ँ सुभद्रिकाङ्काम्पीलवासिनीम् । सुभद्रिकामितिसुऽभद्रिकाम् । काम्पीलवासिनीमितिकाम्पीलऽवासिनीम् ॥ २ ॥ बह्वीनाम्पितापिताबह्वीनाम्बह्वीनाम्पिताबहुर्बहुः पिताबह्वीनाम्बह्वीनाम्पिताबहुः । पिताबहुर्बहुः पितापिताबहुरस्यास्यबहुः पितापिताबहुरस्य । बहुरस्यास्यबहुर्बहुरस्यपुत्रः पुत्रोस्यबहुर्बहुरस्यपुत्रः । अस्यपुत्रः पुत्रोस्यास्यपुत्रश्चिश्चाचिश्चापुत्रोस्यास्यपुत्रश्चिश्चा । पुत्रश्चिश्चाचिश्चापुत्रः पुत्रश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चाकृणोतिकृणोतिचिश्चापुत्रःपुत्रश्चिश्चाकृणोति । चिश्चाकृणो
तिकृणोतिचिश्चाचिश्चाकृणोतिसमंनासमंनाकृणोतिचिश्चाचि
श्चाकृणोतिसमंना । कृणोतिसमंनासमंनाकृणोतिकृणोतिस
मंनावगत्यावगत्यसमंनाकृणोतिकृणोतिसमंनावगत्यं । सम
नावगत्यावगत्यसमंनासमंनावगत्यं । अवगत्येत्यंवऽग
त्यं ॥ इषुधिःसङ्काःसङ्काऽइषुधिरिषुधिःसङ्काःपृतनाःपृतनाः
सङ्काऽइषुधिरिषुधिःसङ्काःपृतनाः । इषुधिरितीषुऽधिः । सङ्काः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृतंनाꣳपृतंनाꣳसङ्काꣳसङ्काꣳपृतंनाश्चचपृतंनाꣳसङ्काꣳसङ्काꣳपृतंनाश्च । पृतंनाश्चचपृतंनाꣳपृतंनाश्चसर्वाꣳसर्वाश्चपृतंनाꣳपृतंनाश्चसर्वाः । चसर्वाꣳसर्वाश्चचसर्वाः पृष्ठेपृष्ठेसर्वाश्चचसर्वाः पृष्ठेꣳ । सर्वाः पृष्ठेपृष्ठेसर्वाꣳसर्वाः पृष्ठेनिनंद्धोनिनंद्धꣳपृष्ठेसर्वाꣳसर्वाः पृष्ठेनिनंद्धः । पृष्ठेनिनंद्धोनिनंद्धꣳपृष्ठेपृष्ठेनिनंद्धोजयतिजयतिनिनंद्धꣳपृष्ठेपृष्ठेनिनंद्धोजयति । निनंद्धोजयतिजयतिनिनंद्धोनिनंद्धोजयतिप्प्रसूतꣳप्प्रसूतोजयतिनिनंद्धोनिनंद्धोज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतिप्प्रसूतꣳ । निनंद्धुऽइतिनीऽनंद्धꣳ । जुयतिप्प्रसूतꣳप्प्रसूतो
जयतिजयतिप्प्रसूतꣳ । प्रसूतुऽइतिप्प्रऽसूतꣳ ॥ ३ ॥ धानाव
न्तङ्कुरम्भिणंङ्कुरम्भिणंन्धानावंन्तन्धानावंन्तङ्कुरम्भिणंमपूप
वंन्तमपूपवंन्तङ्कुरम्भिणंन्धानावंन्तन्धानावंन्तङ्कुरम्भिणंम
पूपवंन्तम् । धानावंन्तुमितिंधानाऽवंन्तम् । कुरम्भिणंमपूपवं
न्तमपूपवंन्तङ्कुरम्भिणंङ्कुरम्भिणंमपूपवंन्तमुक्थिनंमुक्थिनंम
पूपवंन्तङ्कुरम्भिणंङ्कुरम्भिणंमपूपवंन्तमुक्थिनंम् । अपूपवंन्तमु

सं. ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्थिनंमुक्थिनमंपूपवन्तमपूपवंन्तमुक्थिनंम्। अपूपवंन्तमित्यं पूपऽवंन्तम्। उक्थिनमित्युक्थिनंम् ॥ इन्द्रंप्रातःप्रातरिन्द्रे न्द्रंप्रातर्जुषस्वजुषस्वप्रातरिन्द्रेन्द्रंप्रातर्जुषस्व। प्रातर्जुषस्व जुषस्वप्रातःप्रातर्जुषस्वनोनोजुषस्वप्रातःप्रातर्जुषस्वनः। जुषस्वनोनोजुषस्वजुषस्वनःनऽइतिनः ॥ ४ ॥ इति घनः ॥

इत्यष्टविकृतयः समाप्ताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रम-सूत्र-पारस्करगृह्यसूत्राणां प्रारम्भः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥*

श्रीगणेशाय नमः ॥ ॥ अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः ॥ उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च ॥ लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ॥ १ ॥ शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते ॥ श्यामं तु स्वरितं विद्यादग्निमुच्चस्य दैवतम् ॥ २ ॥ नीचे[1] सोमं विजानीयात्स्वरिते सविता भवेत् ॥ उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमुच्यते ॥ ३ ॥ वैश्यं तु स्वरितं विद्याद्भारद्वाजमुदात्तकम् ॥ नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः ॥ ४ ॥ विद्यादुदात्तं गायत्रीं नीचं त्रैष्टुभमुच्यते ॥ जागतं स्वरितं विद्यादत एवं नियोगतः[2] ॥ ५ ॥ गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः ॥ त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥ ६ ॥ उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ॥ शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः ॥ ७ ॥ षड्जो वेदे शिखण्डिः[3] स्यादृषभः स्यादजामुखे ॥ गावो रम्भन्ति गान्धारं क्रौञ्चाश्चैव तु मध्यमम् ॥ ८ ॥ कोकिलः

* केचनात्र पाठभेदा अपि प्रदर्श्यन्ते । १ नीचम् । २ देवमेव । ३ शिखण्ड्यास्या० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमो ज्ञेयो[1] निषादं तु वदेद्गजः ॥ आश्वश्च धैवतो ज्ञेयः स्वराः सप्त विधीयते ॥ ९ ॥ निमेषमात्रो[2] कालः स्याद्विद्युत्कालस्तथापरे ॥ अक्षरात्तुल्ययोगाच्च[3] मतिः स्यात्सोमशर्मणः ॥ १० ॥ सूर्यरश्मिप्रतीकाशात्कणिका यत्र दृश्यते ॥ अणवस्य[4] तु सा मात्रा मात्रा च चतुराणवा ॥ ११ ॥ मानसे चाणवं विद्यात्कण्ठे विद्याद्त्रिराणवम् ॥ त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः ॥ १२ ॥ अवग्रहे तु[5] कालः स्यादर्धमात्रा विधीयते ॥ पदयोरन्तरे काल एकमात्रा विधीयते ॥ १३ ॥ ऋचोऽर्द्धे[6] तु द्विमात्रः स्यात्त्रिमात्रः स्यादृगन्तके ॥ रिक्तं तु पाणिमुत्क्षिप्य द्वे मात्रे धारयेद्बुधः ॥ १४ ॥ एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ॥ त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्[7] ॥ १५ ॥ विवृतौ चावसाने च ऋचोऽर्द्धे च तथा परे ॥ पदे च पादसंस्थाने शून्यहस्तं विधीयते ॥ १६ ॥ प्रणवं तु प्लुतं कुर्याद्व्याहृतीर्मात्रिका विदुः ॥ चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत् ॥ १७ ॥ शिखी वदति त्रिमात्रामात्राणामिति संस्थितिः ॥ वर्णो जातिश्च मात्रा च गोत्रं

१ ब्रूते । २ निमेषकाला मात्रा स्यात् । ३ अक्षरात्तुल्ययोगत्वान्मतिः । ४ अणुत्वस्य । ५ तु कालः स्यादर्धमात्रात्मको हि सः । ६ ऋचार्द्धे । ७ नकुलस्त्वर्धमात्रकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दश्च दैवतम् ॥ १८ ॥ एतत्सर्वं समाख्यातं याज्ञवल्क्येन धीमता ॥ हस्तौ[1] तु[2] संयतौ धार्यौ जानुभ्यामुपरि[3] स्थितौ ॥ १९ ॥ गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत् ॥ ऊरुभागे तृतीये तु[4] करं विन्यस्य[5] दक्षिणम् ॥ २० ॥ प्रसन्नमानसो[6] भूत्वा किञ्चिन्निम्नमधोमुखम् ॥ प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ॥ २१ ॥ सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत् ॥ कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः ॥ २२ ॥ स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः ॥ नाऽभ्याहन्यान्न निर्हन्यान्न गायेन्नैव कम्पयेत् ॥ २३ ॥ यथैवोच्चारयेद्वर्णांस्तथैवैतान्समापयेत् ॥ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् ॥ २४ ॥ सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च ॥ स्वरश्चैव तु हस्तश्च द्वावेतौ युगपद्भवेत् ॥ २५ ॥ हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुते ॥ न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः ॥ २६ ॥ गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति ॥ प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ ॥ २७ ॥ प्रगल्भश्च[7] विनीतश्च स वर्णान्वक्तुमर्हति ॥ शङ्कितं भीतमुद्धृष्टमव्यक्तमनुना-

१ अत्रारभ्याध्ययनविधिः । २ सुसंयुतौ । ३ जान्वोरुपरि । ४ कूर्परम् । ५ न्यस्य । ६ सुप्रसन्नमना भूत्वा किञ्चिन्निम्नस्त्वधोमुखम् । ७ एतदर्धं नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिकम् ॥ २८ ॥ काकस्वरं मूर्द्धिगतं तथा स्थानविवर्जितम् ॥ विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् ॥ २९ ॥ व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश ॥ संहिता[1]सारबहुलः पदसंज्ञासमाकुलः ॥ ३० ॥ क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः ॥ ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः ॥ ३१ ॥ साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते ॥ संहिता नयते सूर्यं पदं च शशिनः पदम् ॥ ३२ ॥ क्रमश्च नयते [2]सूक्ष्मं यत्तत्पदमनामयम् ॥ [3]कालिन्दी संहिता ज्ञेया पदयुक्ता सरस्वती ॥ ३३ ॥ क्रमेणावर्त्तयेद्गङ्गा शम्भोर्वाणी तु नान्यथा ॥ यथा महाह्रदं प्राप्य क्षिप्तो लोष्टो विनश्यति ॥ ३४ ॥ एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ॥ आम्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् ॥ ३५ ॥ खदिरश्च कदम्बश्च करवीरकरञ्जकौ ॥ [4]एते कण्टकिनः पुण्याः क्षीरिणस्तु यशस्विनः ॥ ३६ ॥ तेनास्य करणे [5]सूक्ष्मं माधुर्यं चैव जायते ॥ त्रिफलां [6]लवणाक्तेन भक्षयेच्छिष्यकः सदा ॥ क्षीणमेधाजनन्येषा स्वरवर्ण-

१ स्वारब० । २ ब्रह्मात्मकम् । ३ एतदर्धं नास्ति । ४ सर्वे । ५ सौक्ष्म्यम् । ६ लवणाक्तां वै ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करी तथा ॥ ३७ ॥ हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः ॥ न साधयति यजूंषि भुक्तमव्य-
ञ्जनं यथा ॥ ३८ ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधि-
गच्छति ॥ ३९ ॥ ऋचो यजूंषि सामानि हस्तहीनानि यः पठेत् ॥ अनृचो ब्राह्मणस्तावद्यावत्स्वारं
न विन्दति ॥ ४० ॥ ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये ॥ पठन्मात्रापपाठात्तु पङ्के गौरिव
सीदति ॥ ४१ ॥ [1]स्वरवर्णप्रयुञ्जानो हस्तेनाधीतमाचरन् ॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोकम-
वाप्नुयात् ॥ ४२ ॥ न कुर्वीत पदं दीर्घं न कुर्वीत विलम्बितम् ॥ पदस्य ग्रहमोक्षौ च यथा
शीघ्रगतिर्हयः ॥ ४३ ॥ आगमं कुरु यत्नेन कारणं हि तदात्मकम् ॥ आस्येन च शयं कुर्यात्पठन्ना-
न्यमतिर्भवेत् ॥ ४४ ॥ न चास्य मुष्टिबन्धी स्यान्न चात्युत्तममाचरेत् ॥ चुलुर्नौका स्फुटो दण्डी
स्वस्तिको मुष्टिराकृतिः ॥ एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः ॥ ४५ ॥ यथा वाणी तथा
पाणी रिक्तं तु परिवर्जयेत् ॥ यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ॥ ४६ ॥ यथा धनु-

१ हस्तेनाधीयमानस्य स्वरवर्णान्प्रयुञ्जतः । अथवा अधीयानस्य हस्तेन स्व....तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यावितते शरे क्षिप्ते पुनर्गुणः ॥ स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ॥ ४७ ॥ उत्तानं सोन्नतं किञ्चित्सुव्यक्ताङ्गुलिरञ्जितम् ॥ स्वरविद्धं करं कुर्यात्प्रादेशोद्देशगामिनम् ॥ ४८ ॥ अङ्गुष्ठस्योत्तरे पर्वे तर्जन्युपरि यद्भवेत् ॥ प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करम् ॥ ४९ ॥ मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थोदकं व्रजेत् ॥ नामितङ्करपृष्ठे तु सुव्यक्ताङ्गुलिमोक्षणम् ॥ ५० ॥ स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम् ॥ उत्थाने तु नवाङ्गुल्यमेतत्स्वरस्य लक्षणम् ॥ ५१ ॥ अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ॥ शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं विलम्बिताम् ॥ ५२ ॥ ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता ॥ अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता ॥ ५३ ॥ मुष्ट्याकृतिर्मकारे तु नकारे तु नखाग्रतः ॥ अनुस्वारेऽङ्गुष्ठक्षेप ऊष्मान्तेऽङ्गुलिमोक्षणम् ॥ ५४ ॥ उदात्तं[1] भुवि पातेन मध्यन्नासाग्रमेव च ॥ शेषं षडङ्गुलं विद्यान्निचितं तु विधीयते ॥ ५५ ॥ षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च ॥ तच्चतुर्भागमात्रं तु हस्तस्तेनैव वर्तयेत् ॥ ५६ ॥

१ उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रतः । हृत्प्रदेशेऽनुदात्तं तु तिर्यग्जात्यादिरीरितः । अथवा उदात्तं भ्रुवि पातव्यं प्रचं नासाग्र एव च । हृत्प्रदेशेऽनुदात्तं तु तिर्यग्जात्यादिकाः स्वराः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककारान्ते टकारान्ते ङणे चाङ्गुलिं नामयेत् ॥ पञ्चाङ्गुल्यं पकारे तु तकारे कुण्डलाकृतिः ॥ ५७ ॥ ऊर्ध्वक्षेपाच्च योष्मा स्यादधःक्षेपाच्च यो भवेत् ॥ एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत् ॥ ५८ ॥ अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपाꣳ रसम् ॥ दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्त्तितः ॥ ५९ ॥ तर्जन्यङ्गुष्ठयोः स्पर्शोऽप्युदात्तं प्रतिपद्यते ॥ नीचं तु मध्यमां कुर्याच्छेषं नीचतरं क्रमात् ॥ ६० ॥ [1]स्वरितं यद्भवेत्किञ्चिद्वकारसहसंयुतम् ॥ ऊष्माणं तद्विजानीयान्निक्षेप उभयोरपि ॥ ६१ ॥ स्वरितसंज्ञे निक्षिप्ते संयोगो यत्र दृश्यते ॥ द्विमात्रिके भवेदेकां मात्रिके तूभयं क्षिपेत् ॥ ६२ ॥ जात्ये च स्वरिते चैव वकारो यत्र दृश्यते ॥ कर्तव्यस्तूभयोः क्षेपो वायव्या इति दर्शनम् ॥ ६३ ॥ शृङ्गवद्वाथ वत्सस्य कुमारीकुचयुग्मवत् ॥ उभक्षेपः स्वरो यत्र स विसर्ग उदाहृतः ॥ ६४ ॥ विसर्गान्तः स्वरो यत्र स्वरितो यत्र दृश्यते ॥ दीर्घश्च सवकारश्च तत्रोभक्षेप उच्यते ॥ ६५ ॥ त्रिविधस्तु भवेदूष्मा प्रचिता बलका तरा ॥ स्वरिते प्रचितां विद्यान्निपाते बलकां विदुः ॥ ६६ ॥ उत्थाने

---

१ स्वरितं यद्भवेत्किञ्चित्सवकारोष्मकं ततः । ह्रस्वं वा यदि वा दीर्घं निक्षेप उभयोरपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु तथा तारामेताभिस्त्रिभिरूष्मभिः ॥ मात्रामादौ विदित्वा तु ततः क्षेपं प्रयोजयेत् ॥ ६७ ॥ अक्षरं भजते काचित्काचिद्वित्त्वे प्रतिष्ठिता ॥ समानजातिका काचित्काचिदूष्माप्रदायिका ॥ ६८ ॥ यथा बालस्य सर्पस्य निःश्वासो लघुचेतसः ॥ एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता ॥ ६९ ॥ विवृतिं प्रत्ययामूष्मां प्रवदन्ति मनीषिणः ॥ तामेव प्रतिषेधन्ति यथा आ-ई-ऊ-ए इति निदर्शनम् ॥ ७० ॥ अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम् ॥ जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः ॥७१॥ (तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।) पादवृत्तो भवेत्तद्वत्तथाभाव्य इति स्वराः ॥ एकपदे नीचपूर्वः सयवो जात्य इष्यते (अपूर्वोऽपि परस्तद्वत् धान्यं-सुप्प्वा-स्वरित्यपि) ॥ एकपद इत्याह ॥ ७२ ॥ नीचपूर्वः सयकारवकारो वा जात्यः स्वरितो भवति ॥ यथा-जात्यः मनुष्यानिति । सुद्येति । चम्वीव । धान्यम् । कन्या इव । स्वः । वीर्यम् । एवं ह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति ॥ एओआभ्यामुदात्ताभ्यामकारो रिफितश्च यः ॥ अकारो यत्र लुप्येत तं चाभि-

१ तैरोव्यंजनः तैरोविरामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निहितं विदुः ॥ ७३ ॥ यथा–कुक्कुटः असि कुक्कुटोसि ॥ वेदः असि ॥ वेदोसि ॥ भागः असि भागोसि ॥ मारुतः असि मारुतोसि ॥ श्वात्रः असि । श्वात्रोसि ॥ ते अप्सरसाम् तेप्सरसाम् ॥ ते अवन्तु तेवन्तु ॥ कः असि कोसि ॥ सः अहं सोहं ॥ एवं हि यानि चान्यानि ईदृग्लक्षणानि पदानि भवन्ति ॥ इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित् ॥ अनुदात्ते पदे नित्यं विद्यात्क्षैप्रस्य लक्षणम् ॥ ७४ ॥ यथा–त्रि अम्बकम् त्र्यम्बकम् ॥ द्रु अन्नः द्र्वन्नः ॥ वीडु अङ्गः वीड्वङ्गः ॥ वाजी अर्वन् वाज्यर्वन् ॥ एवं ह्याह यानि० ॥ इकारो यत्र दृश्येत इकारेणैव संयुतः ॥ उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥ ७५ ॥ यथा–अभि इन्धताम् अभीन्धताम् ॥ अभि इमम् । अभीमम् ॥ वि इहि वीहि ॥ स्रुचि इव स्रुचीव ॥ चम्वीवेति चम्वीऽइव ॥ एवं ह्याह यानि चान्यानि० ॥ उदात्तपूर्वं[1] यत्किञ्चिच्छन्दसि स्वरितं पदम् ॥ एष सर्वं बहु स्वारस्तैरोव्यञ्जन उच्यते ॥ ७६ ॥ यथा–इडे । रन्ते । हव्ये । काम्म्ये । चन्द्रे । ज्योते । अदिति । सरस्वति ।

---

१ उदात्तपूर्वे स्वरितो व्यञ्जनेन युतो भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महि। विश्श्रुतीति भवन्ति॥ एवं ह्याह यानि भवन्ति॥ अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम्॥ तैरोविरामं तं विद्यादुदात्तो यद्यवग्रहः॥ ७७॥ यथा—गोमदिति गोमत्॥ गोपताविति गोपतौ॥ प्रप्रेति प्र-प्र॥ विततेति वि-तता॥ समिद्ध इति सम्-इद्धः॥ एवं ह्याह यानि० भवन्ति॥ स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते॥ पादवृत्तो भवेत्स्वारः "श्चित्रऽआदित्य" दर्शनम्॥ यथा-श्चित्रः आदित्यानाम्॥ श्चित्रऽआदित्यानाम्॥ पुत्रः ईधे। पुत्रऽईधे॥ दात्रे एधि। दात्रऽएधि॥ कः ईम्। कऽईम्॥ ताः अस्य। ताऽअस्य॥ एवं ह्याह यानि०॥ उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः॥ ताथाभाव्यं भवेत्स्वारः "तनूनप्त्रेति" दर्शनम्॥ ७८॥ यथा-तनूनप्त्रऽइति तनूऽनप्त्रे॥ तनूनपादिति तनूऽनपात्॥ तनूनपातमिति तनूऽनपातम्॥ एवं ह्याह यानि पदानि लक्षणानि भवन्ति॥ इत्यष्टपदसमाम्नाये वैशेषिके याज्ञवल्क्यवचनानां पदानां पाठः समाप्तः॥ ॥ माध्यन्दिनविरोधी स्यात्ताथाभाव्यस्तु यः स्मृतः॥ स्वरौ नैवात्र दृश्येते भिन्नोदात्तानु-

१ उदात्तान्निहितस्वारः स्वरितात्प्रचयो भवेत्। उदात्तात्स्वरितात्पूर्वो नान्यमापद्यते स्वरम्॥ पदकाले यः स्वरितः संहितायां तथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दात्तकौ ॥ १ ॥ स्वराः स्पर्शान्तःस्थोष्माणः ॥ कण्ठ्यजिह्वामूलीयतालव्यमूर्धन्यदन्त्योष्ठ्य-यमा विसर्जनीयनिपाताद्याश्च किंवर्णदैवत्यलिङ्गाः । स्वराः शुक्लाः । नानादैवत्याः ॥ स्पर्शाः कृष्णाः ॥ कपिला अन्तःस्थाः । ऊष्माणोऽरुणाः ॥ नीला यमाः ॥ हरिता नासिक्याः ॥ पीतोऽनुस्वारः ॥ रक्तो जिह्वामूलीयः । पीत उपध्मानीयः ॥ श्वेतो विसर्जनीयः ॥ शबलो रङ्गः ॥ नीलोऽनुनासिक्यः ॥ इत्यन्तर्मध्यमयोर्नासिक्यं विद्यात् ॥ द्विरुदात्ताख्या इति स्मृतः ॥ उदमनुद निपाते आद्ये चोपसर्गे नामाख्याते चोपसर्गनिपाताश्चेति किंदैवत्याः ॥ अक्षराणां च के पुरुषाः ॥ काः स्त्रियः ॥ कानि नपुंसकानि इत्यत्र ब्रूमः ॥ कण्ठ्या आग्नेया अकारादयः ॥ जिह्वा-मूलीया नैर्ऋत्याः ककारादयः ॥ तालव्याः सौम्याश्चकारादयः ॥ वायव्या मूर्धन्याष्टकारादयः ॥

च । स्वरितश्चेद् भवेत्पश्चात्स एव निहितः स्मृतः ॥ उदात्तान्निहितः स्वार्यः स्वारोदात्तौ न तत्परौ ॥ स्वरो यश्च तथाभूतो ज्ञेयः स प्रचयः सदा ॥ उदात्तानुदात्तयोर्योगे स्वरितः स्वर उच्यते । ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोद्भुतः ॥ मात्रिकं वा द्विमात्रिकं वा स्वरितं यदिहाक्षरम् । तस्यादितोऽर्धमात्रा वै शेषं च परतो भवेत् ॥ उच्चस्थानगते हस्ते स्वरितं नोपपद्यते । अधस्तात्तु यदा गच्छेत् स्वरितं न तदा भवेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रौद्रा दन्त्यास्तकारादयः ॥ औष्ठ्या आश्विन्याः पकारादयः ॥ शेषा वैश्वदेवाः ॥ अम् इत्येवमादयः ॥ स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ॥ द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः ॥ २ ॥ वर्गाणां पञ्चमा वैश्या अन्तःस्थाश्च तथैव च ॥ ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्त्तिताः ॥ ३ ॥ शुक्लवर्णानि नामानि आख्याता रोहिता मताः ॥ कपिञ्जलास्तूपसर्गाः कृष्णाश्चैव निपातकाः ॥ ४ ॥ भार्गवगोत्राणि नामानि भारद्वाजा आख्याताः ॥ वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः ॥ पीतवर्णश्चोपसर्गो निपातः कृष्णवर्णकः ॥ सर्वं तु सौम्यमाख्यातं नाम वायव्यं दृश्यते ॥ आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥ ५ ॥ प्रथमाश्च[1] तथान्तःस्थाः स्त्रीलिङ्गाः परिकीर्त्तिताः ॥ शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः ॥ ६ ॥ नाम्नामिन्द्रो देवता वरुण उपसर्गाणामादित्यः सर्वस्याक्षरगणस्य स्वरा विसर्जनीयो यमाश्च पुँल्लिङ्गाः ॥ ङञणनमा यरलवाः स्त्रीलिङ्गाः ॥ शेषाण्यक्षराणि नपुंसकलिङ्गानीति ॥ सन्धिश्चतुर्विधो भवतीति ॥ लोपागमौ वर्ण-

१ आदित्यो मुनिभिः प्रोक्तः सर्वाक्षरगणस्य च । स्वरा विसर्जनीयाश्च यमाः पुँल्लिङ्गकाः स्मृताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकारः प्रकृतिभावश्चेति ॥ तद्यथा । तत्र लोपो भवति । अयक्ष्माः मा । अयक्ष्मामा ॥ शततेजाः वायुः । शततेजावायुः ॥ तिग्मतेजाः द्विषतः ॥ तिग्मतेजाद्विषतः ॥ इति लोपः ॥ आगमो भवति । यथा–प्रत्यङ्सोमः प्रत्यङ्क्सोमः ॥ प्राङ्सोमः प्राङ्क्सोमः ॥ अस्मान् सीते । अस्मान्त्सीते ॥ त्रीन् समुद्रान् । त्रीन्त्समुद्रान् ॥ इति आगमः ॥ विकारो भवति । यथा–आ इदम् । एदम् ॥ आ इमे । एमे ॥ आ इष्टयः । एष्टयः ॥ प्र इषितः । प्रेषितः ॥ इति विकारः ॥ प्रकृतिभावः । यथा–आशुः शिशानः ॥ युञ्जानः प्रथमम् ॥ अदितिः षोडशाक्षरेण ॥ देवो वः सविता ॥ इति प्रकृतिभावः ॥ आकाशस्था यथा विद्युत्स्फुटितं मणिसूत्रवत् ॥ एष च्छेदोविवृत्तीनां यथा बालेषु कर्तरी ॥ ७ ॥ द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते ॥ विवृत्तिस्तत्र विज्ञेया य ईशेति निदर्शनम् ॥८॥ पिपीलिका पाकवती तथा वत्सानुसारिणी ॥ वत्सानुसंसृता (जा) चैव चतस्रस्तु विवृत्तयः ॥ ९ ॥ पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्रिणः ॥ अहरप्रहरो ज्ञेय अइउऋओ इति निदर्शनम् ॥१०॥ पिपीलिका आद्यन्तदीर्घा नाभ्याऽआसीदिति निदर्शनम् ॥ पाकवत्युभयोर्ह्रस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनऽइन्द्रेति निदर्शनम् ॥ ११ ॥ अन्ते च वत्सानुसृजता तानेत्यसौ आवोढमश्विनेति नि० ॥
वत्सानुसारिणी चादौ दीर्घा ताऽअस्येति नि० ॥ १२ ॥ करिणी कुर्विणी चैव हरिणी हारिणीति च ॥
तथा हंसपदा नाम पञ्चैताः स्वरभक्तयः ॥ १३ ॥ करिणी रहयोर्योगे कुर्विणी लहकारयोः ॥
हरिणी र(श)षयोर्योगे हारितं ऋषकारयोः ॥ १४ ॥ या तु हंसपदा नाम सा तु रेफषकारयोः ॥
हरिणी हरयोर्विद्यात्कुर्विणी लृहकारयोः ॥ १५ ॥ देवम्बर्हिरिति करिणी उपह्व(बल्ह)रेति कुर्विणी ॥
हरिणीं अरे(प)षस इत्याहुर्हारिणी शतवल्हेति च ॥ १६ ॥ वर्षोवर्षीयतेसीति तथा हंसपदेति च ॥
स्वरभक्तिं[1] प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत् ॥ १७ ॥ इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥
एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता ॥ १८ ॥ सम्यक् पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥
अर्धमात्रास्वरं किञ्चित्पृथङ्न्यूनमिवोच्चरन् ॥ ऋकारे च हकारे च हृत्कण्ठमनसोनि[2] च ॥ १९ ॥
नैतत्स्वरितपूर्वाङ्गे नापराङ्गे कथञ्चन ॥ न स्वरे न च मात्रायां कथं स्वारो विधीयते ॥ २० ॥

१ रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः । स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते ॥ २ पि च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम् ॥ उभयार्द्धार्द्धसंयोगे स्वारं कुर्याद्विचक्षणः ॥ २१ ॥
संयोगे तु परं स्वार्थं परं संयोगनामकम् ॥ संयुक्तस्य तु वर्णस्य न स्वार्थं पूर्वमक्षरम् ॥ २२ ॥
[1]उदात्तादनुदात्ते तु वामाया भ्रुव आरभेत् ॥ उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्यसेत् ॥ २३ ॥
स्वरितादनुदात्ता ये प्रचयास्तान्प्रचक्षते ॥ एकस्वरानपि च तानाहुस्तत्त्वार्थविचिन्तकाः ॥ २४ ॥
प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः ॥ स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत् ॥ २५ ॥
दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ॥ एवं व्यञ्जनमासाद्य अकारो हरते स्वरम् ॥ २६ ॥
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ॥ अक्षरात्तुल्ययोगाच्च नीचे नीचगतानि च ॥ २७ ॥
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ॥ स्वरप्रधानैस्तैः स्वार्यं व्यञ्जनं तेन सस्वरम् ॥ २८ ॥
व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति सस्वरः ॥ स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रवदन्ति हि ॥ २९ ॥
मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः ॥ आचार्याः समामिच्छन्ति पदच्छेदं तु पण्डिताः ॥ ३० ॥

---

२ अवग्रहे पदच्छेदे उदात्तो दृश्यते यदि । स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम् ॥ स्वरसन्धिविधानेन नीचोच्चत्वं विधीयते । व्यञ्जनाद्वा स्वराद्वापि तत्सन्धौ स्वर उच्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियो[1] मधुरमिच्छन्ति विकृष्टमितरे जनाः ॥ उदात्तं नानुवर्तन्ते नीचन्न स्वरितं तथा ॥ ३१ ॥ विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम् ॥ हरिवरुणवरेण्येषु धारापुरुषेषु च ॥ स्वरिते रेफवैश्वानरो नकारः शेषाकारः स्वरिता नकाराः ॥३२॥ द्वौ वरुणौ च स्वरितौ ॥ उदुत्तमं वरुणधारयंवरोरुधारा उरुधारा च होइते[2] ॥ मात्रिकं वा द्विमात्रं वा स्वरितं यदिहाक्षरम् ॥ तस्यादितोऽर्द्धमात्रा वै शेषं च परतो भवेत् ॥ ३३ ॥ नकारान्ते पदे पूर्वे श्मश्रुभिः परतः स्थिते ॥ छकारं न प्रयुञ्जीत अशसन्धिं समुच्चरेत् ॥ ३४ ॥ ओकारं प्लुतविज्ञेयं प्लुतमन्नाद्वितीयकम् ॥ लाजीं छाचीं तृतीयं च विवेशेति चतुर्थकम् ॥ ३५ ॥ अधःस्विदासीत्पञ्चमं चोपरिस्विदासीच्च षष्ठकम् ॥ सप्तमं तु भ्रुवोः स्मार अष्टमं नैव विद्यते ॥ ३६ ॥ उच्चस्थानगते हस्ते स्वरितं नोपपद्यते ॥ अधःस्था तु यदा गच्छेत्स्वरितं न तदा भवेत् ॥ कचटतपा दृश्यन्ते सन्धिस्थानेषु नित्यशः ॥ स्ववर्गेणैव संयुक्ता मोक्षं तत्र न कारयेत्[3] ॥ तकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ प्रत्यारम्भन्न कुर्वीत पापाविति

१ उदात्तं नानुवर्तेत नीचं न स्वरितं तथा । विस्वरं तु विजानीयाद्दीर्घह्रस्वविवर्जितम् ॥ २ दोहने० । ३ कुर्वीत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निदर्शनम् ॥ ककारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ खसवर्णं विजानीयात् भिखक्सेति निद-
र्शनम् ॥ तकारान्ते पदे पूर्वे चवर्गे परतः स्थिते ॥ मोक्षं तत्र च कुर्वीत यच्च पापौ निदर्शनम् ॥
ङकारान्ते पदे पूर्वे सकारे परतः स्थिते ॥ कसवर्णं विजानीयात्प्राङ्क्सोमेति निदर्शनम् ॥ टका-
रान्ते पदे पूर्वे सकारे परतः स्थिते ॥ टसवर्णं विजानीयात्सम्म्राट्स्म्भृतेति निदर्शनम् ॥ तकारान्ते
पदे पूर्वे सकारे परतः स्थिते ॥ छसवर्णं विजानीयात् तत्सवितुरिति निदर्शनम् ॥ नकारान्ते पदे
पूर्वे सकारे परतः स्थिते ॥ तसवर्णं विजानीयान्नीन्त्समुद्रेति निदर्शनम् ॥ पकारान्ते पदे पूर्वे
शकारे परतः स्थिते ॥ छसवर्णं विजानीयादनुष्टुप्छारदीति निदर्शनम् ॥ मकारान्ते पदे पूर्वे सवर्णे
परतः स्थिते ॥ मसवर्णं विजानीयादिमम्मेति निदर्शनम् ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो
द्विमात्रकः ॥ द्विमात्रे मात्रिको ज्ञेयः संयोगाद्यस्य यो भवेत् ॥ अनुस्वारो द्विमात्रः स्याद्वर्णव्यञ्ज-
नादिगः ॥ ह्रस्वाद्वा यदि वा दीर्घाद्देवानाꣳहृदयेभ्य इति ॥ अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते ॥
दीर्घं तं तु विजानीयाच्छ्रोताग्रावाणेति निदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते ॥
ह्रस्वं तं तु विजानीयात्सꣳस्थेति निदर्शनम् ॥ अनुस्वारश्च यो दीर्घादक्षराद्यो भवेत्परः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स तु ह्रस्व इति ज्ञेयो मन्त्रेष्वेव विभाषया ॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च ॥
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ यथा भावप्रसन्धानमुकारादिपरं पदम् ॥
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ उभावादुत्थितश्चोष्मा तां तु केलिं विनिर्दिशेत् ॥
विवृतं प्रति या ऊष्मा विज्ञेया विकटानना ॥ लीढातिलीढविद्युच्च शषसेषु प्रकीर्तिताः ॥
जिह्वामूले च रेफे च विज्ञेया विठकाशठाः ॥ उपध्मानीयसहितां पुष्पिणीं तां विनिर्दिशेत् ॥
अन्यत्र यो भवेदूष्मा सुलभां तां विनिर्दिशेत् ॥ पादाद्यन्तं पदाद्यन्तं तथावग्रहकालिकम् ॥
ईषत्स्पृष्टं विजानीयात्तस्मिन्काले तु कारयेत् ॥ पादादौ च पदादौ च संयोगावग्रहेषु च ॥
यः(ष)शब्द इति विज्ञेयो योन्यः स य इति स्मृतः ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥
ईषत्स्पृष्टं यथा विद्युत्पदच्छन्दात्परं भवेत् ॥ त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ ॥
आदेराजविकल्पार्था ईषत्स्पृष्टा इति स्मृताः ॥ विभाषायामेकारः स्यात्तथा नेतैः पदात्परः ॥
भवन्तेत्यपि पूर्वैव तथा च सपदादपि ॥ यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ॥
यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते ॥ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूत्तरः ॥ उपांशु त्वरितं चैव योऽधीते हृदि संज्ञकः ॥
अपि रूपसहस्रेषु सदेहेषु प्रवर्तते ॥ पञ्चविद्यां न गृह्णन्ति जडाः स्तब्धाश्च ये नराः ॥
आलस्याश्चैव रोगाश्च येषां च विस्मृतं मनः ॥ अहिरिव गणाद्भीतः संमानान्नरकादिव ॥
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ न भोजनविलम्बी स्यान्न च नारीनिबन्धनः ॥
सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत् ॥ यथा खनन्खनित्रेण नरो वार्यधिगच्छति ॥ तथा गुरुगतां
विद्यां शुश्रूषुरधिगच्छति ॥ सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ॥ सुखिनस्तु कुतो
विद्या सुखं विद्यार्थिनः कुतः ॥ गुणिता शतशो विद्या सहस्रावर्तिता पुनः ॥ आगमिष्यति जिह्वाग्रे
स्थलनिम्नमिवोदकम् ॥ शतेन गुणिता विद्या सहस्रेण च तिष्ठति ॥ शतानां च सहस्रेण प्रत्यश्चद-
वतिष्ठति ॥ जलमभ्यासयोगेन शिलायाः कुरुते क्षयम् ॥ कर्कार्णामृदुतस्तस्य किमभ्यासान्न
साध्यते ॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या चतुर्थं नोपलभ्यते ॥
शुश्रूषारहिता विद्या ह्यल्पमेधागुणैः सह ॥ वन्ध्या च यौवनी तस्या न विद्या फलिनी भवेत् ॥
हयानामिव जात्यानामर्द्धमात्रार्द्धशायिनाम् ॥ न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा पिपीलिकाभिः पांसुभिर्वल्मीकं क्रियते महत् ॥ न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम् ॥ अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम् ॥ अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥ अन्नव्यञ्जनयोर्भागस्तृतीयमुदकस्य च ॥ वायोः सञ्चारणार्थाय चतुर्थमुपकल्पयेत् ॥ हकारं पञ्चमैर्युक्तमन्तस्थैश्चापि संयुतम् ॥ औरसं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ हकारो यत्र पूर्वस्थो ह्यन्तस्थाद्यो भवेत्परः ॥ पदकाले वियुज्येत संहितायां स औरसः ॥ मेघदुन्दुभिनिर्घोषो ज्ञायते पयसो ह्रदात् ॥ एवं नादं प्रयोक्तव्यं सिंहस्य रुदितं यथा ॥ मासे भाद्रपदे मेघाः शब्दं कुर्वन्ति यादृशम् ॥ एवं गह्वरमासाद्य शुक्रं दुदुह्वेति दर्शनम् ॥ शेषाणां वानरा युद्धमुत्पतन्ति पतन्ति च ॥ एवं वर्णाः प्रयोक्तव्या इहेहैषान्निदर्शनम् ॥ यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम् ॥ एवं वर्णाः प्रयोक्तव्या युञ्जानेति निदर्शनम् ॥ दुर्दुरो जयदेशे च प्रफतेषुर्नयाप्यया ॥ एवं वर्णाः प्रयोक्तव्या अपाम्फेनेति निदर्शनम् ॥ यथा भारभराक्रान्ता निश्वसन्ति नरा भुवि ॥ एवं वर्णाः प्रयोक्तव्या अञ्ज्यः सम्भृत इत्यपि ॥ कुक्कुटः कामलुब्धश्च ककारद्वयमुच्चरेत् ॥ एवं वर्णाः प्रयोक्तव्याः कुक्कुटोसीति दर्शनम् ॥ वडवा च हयं दृष्ट्वा योनिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकुरुते यथा ॥ एवं वर्णाः प्रयोक्तव्याः सदुन्दुभेति दर्शनम् ॥ रङ्गे चैव समुत्पन्ने नो ग्रसेत्पूर्वमक्षरम् ॥ स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत् ॥ यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते ॥ एवं रङ्गः प्रवक्तव्यो ङकारः परिवर्जितः ॥ द्विमात्रिको मात्रिको वा नासामूलं समाश्रितः ॥ अन्ते प्रयुञ्जते रङ्गः पञ्चमैः सानुनासिकः ॥ यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते ॥ एवं रङ्गं विजानीयात् ङकारपरिवर्जितम् ॥ अनन्तरं मकारस्य यो रङ्गस्तत्र रञ्ज्यते ॥ सर्वानुनासिकं विद्यादेषा मध्योपधानिका । यरलवशषसहरज्यन्ते चोपधानिका ॥ गर्वान्ते रङ्गते यस्तु सर्वैः सर्वानुनासिका ॥ नासादुत्पद्यते रङ्गः कांस्येन समनिःस्वनः ॥ मृदुश्चैव द्विमात्रः स्याद्वृष्टिमान्स्यान्निदर्शनम् ॥ यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत् ॥ भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ मधुरं च न

---

१ यथा कामातुरा नारी शब्दं कुर्याद्दिने दिने । तच्छब्दं कुरुते प्राज्ञः सि७ंह्यसि निदर्शनम् ॥ पक्षौ वितत्य खे गृध्रो भ्रान्त्या सङ्कुच्य तिष्ठति । एवं वर्णाः प्रयोक्तव्या वार्द्धीनस्ते निदर्शनम् ॥ २ यरलवाः शषसहा अष्टैते चोपधानिनः । वर्गान्तै रज्यते यस्तु सर्वैः सर्वानुनासिकः ॥ ३ नस्तः । ४ यादृशी रत्नवर्णाभा जपायाः कुसुमेऽथवा । तादृशं रञ्जयेद्वर्णं प्रान्ते नासिक्यमाचरेत् ॥ लाक्षारक्तं यथा तोयं नकारान्तं पदं तथा । सर्वं रङ्गं विजानीयाच्छत्रूनिति निदर्शनम् ॥ लुप्ते नकारे यत्खारं रञ्जन्ति शौनकादयः । एवं रङ्गं विजानीयान्नाभ्याऽआसी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाव्यक्तं व्यक्तं चापि न पीडितम् ॥ सनाथस्यैकदेशस्य न वर्णाः शङ्करं[1] गताः ॥ यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत् ॥ एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक् ॥ गीती शीघ्री शिरःकम्पी यथालिखितपाठकः ॥ अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ॥ धैर्यं लयसमत्वं च षडेते पाठका गुणाः ॥ चतुरक्षरषट्कं च निवर्तेत पुनः पुनः ॥ आवर्तते पदं यच्च द्विस्त्रिराम्रेडितं हि तत् ॥ यथा धाम्ने धाम्नेति यजुषे यजुषेति निदर्शनम् ॥ हीयते वर्धते चापि पदं यत्र कृशोदरम् ॥ उपचारः स विज्ञेय उभे सुश्चन्द्रेति निदर्शनम् ॥ अथ सप्तविधाः संयोगपिण्डाः ॥ ॥ अयःपिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो[2] वज्रपिण्डश्चेति ॥ यमान्विद्यादयःपिण्डान्सान्तःस्थं दारुपिण्डवत् ॥ अन्तःस्थं यमवर्जं तु ऊर्णापिण्डं विनिर्दिशेत् ॥ अन्तःस्थं यमसंयोगे विशेषो नोपलभ्यते ॥ अशरीरं यमं विद्यादन्तःस्थः पिण्डनायकम् ॥ ज्वालापिण्डान्सनासिक्यान्सानुस्वाराँस्तु मृन्मयान् ॥ सोपध्मा वायुपिण्डाश्च जिह्वामूले तु वज्रिणः ॥ अयःपिण्डो नाम यथा ॥ अग्नीः । पक्तीः । नातनच्मि ॥ दारुपिण्डो नाम यथा ॥ अश्वः । सूर्यः । विश्वाज-

न्निदर्शनम् ॥ पञ्चरङ्गाः प्रवर्तन्ते घात–निर्घात–वज्रिणः । अहिणः प्रहिणो ज्ञेय आ-ई-ऊ-ऋ ओ-निदर्शनम् । १ सङ्करङ्गताः । २ वायुवज्र ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीति भवति ॥ तत्र ऊर्णापिण्डो नाम यथा ॥ यस्मिन्। अत्यस्मिन् अमुष्मिन्। इति भवति ॥ तत्र ज्वालापिण्डो नाम यथा ॥ ब्रह्मा । वह्निः। गृह्णणामीति भवति ॥ तत्र मृत्पिण्डो नाम यथा ॥ साꣳस्था सꣳस्कर्त्तारः । सꣳस्वर्त्तऽइति ॥ तत्र वायुपिण्डो नाम यथा ॥ देव सवितः । युञ्जानः प्रथमम् । प्रादिवः ककुत्सुप्तमिति भवति ॥ तत्र वज्रपिण्डो नाम यथा ॥ इष्कृतिः । निष्कृतिः । ऋक्साम इति भवति ॥ प्रथममेव षकारेण सकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य अग्निष्वात्तान्निदर्शनम् ॥ प्रथमेन ठकारेण थकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य अधिष्ठाननिदर्शनम् ॥ प्रथममेव णकारेण नकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य त्रिणवत्रयस्त्रिꣳशाविति निदर्शनम् ॥ प्रथममेव रङ्गेण नकारेणैव संयुतम् ॥ एतद्रञ्जितमासाद्य वृष्टिमानिति निदर्शनम् ॥ एते ककारादयो मकारपर्यवसानाः कृष्णा व्याख्याताः ॥ शनैश्चरदैवत्याः ॥ चत्वार्यन्तस्था यरलवाः कपिलवर्णाः अग्निदैवत्याः ॥ चत्वार्यूष्माणः शषसहा अरुणवर्णा आदित्यदैवत्याः ॥ त्रयस्त्रिꣳशद्व्यञ्जनानि स्पर्शा अन्तःस्था ऊष्माणश्चेति ॥ चतुर्विधं करणम्। स्पृष्टमस्पृष्टं संवृतं विवृतं चेति ॥ संवृतो घोषा विवृता अघोषाः ॥ विꣳशतिर्घोषास्ते गजडदबा घझढधभा ङञणनमाः यरलवाश्चेति ॥ त्रयोदश अघोषास्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कचटतपाः खछठथफाः शषसाश्चेति ॥ अष्टौ वर्णस्थानानि भवन्ति ॥ उरःकण्ठ्यमूर्द्धन्यतालु-दन्त्ये । जिह्वामूलयमानुनासिक्याश्चेति ॥ द्वौ औरस्यौ । ह हा इति । अआआ ३ त्रयः कण्ठ्याः ॥ ऋषट्मूर्द्धन्याः । टठडढणष इति ॥ दश तालव्याः चछजझञयशइईई ३ इति ॥ अष्ट दन्त्याः । तथदधनलृलसाः ॥ एकादश ओष्ठ्याः । पफबभमा उऊऊ ३ छउपध्माचेत्यादयः ॥ एको दन्त-मूलयो रेफः ॥ जिह्वामूलीयाः पञ्च । कुंखुंगुंघुंङुंइति ॥ क्मख्मग्मघ्मकुंखुंगुंघुं इति यमाश्चत्वारः ॥ स्क्मेति प्रथमो ज्ञेयः सक् इत्यपरो भवेत् ॥ तृतीयः सघ्म इत्याहुः उपध्मेति चतुर्थकः ॥ प्रथमौ चौष्ठनासिक्यावोष्ठनासे उपाश्रितौ ॥ द्वितीयः कण्ठ्यदन्त्यश्च नासामूलमुपाश्रितः ॥ तृतीयः कण्ठ्यजिह्वाग्रे नासायामेव निर्दिशेत् ॥ चतुर्थो हृदि नासिक्यः कण्ठे चाभिहिता यमाः ॥ आपञ्चमैश्चैकपादः संयुक्तं पञ्चमाक्षरम् ॥ यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः ॥ यत्किं-चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥ सर्वमत्र प्रतिष्ठितमिति ॥ ऋवर्णेतित्परे सादावनुस्वारो द्विमात्रकः ॥ संयोगे परभूतेषु ह्रस्व एवोच्यते बुधैः ॥ इति श्रीयाज्ञवल्क्यशिक्षा समाप्ता ॥

* * * * *

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ प्रतिज्ञासूत्रम् ॥

॥ श्रीगणेशाय नमः ॥ प्रतिज्ञामन्त्रब्राह्मणयोर्वेदनामधेयं तस्मिञ्शुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरितः । एवं जात्यादयोऽभिहिताः ॥ ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ तानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥ अथान्तःस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणं द्विर्भावेऽप्येवमथापरान्तःस्थस्यायुक्तान्यहलसंयुक्तस्योष्मऋकारेकारसहितोच्चारणमेवं तृतीयान्तःस्थस्य क्वचिद्दकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तःस्थानां पदादिमध्यान्तःस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या ॥ २ ॥ अथानुस्वारस्यꣳइत्यादेशः शषसहरेफेषु तस्य त्रैविध्यमाख्यातम् ॥ ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति ॥ ३ ॥ इति कात्यायनपरिशिष्टप्रतिज्ञासूत्रं समाप्तम् ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सर्वानुक्रमसूत्रम् ॥

श्रीगणेशाय नमः ॥ अथ सर्वानुक्रमसूत्रप्रारम्भः ॥ ॐमण्डलं दक्षिणमक्षिहृदयं चाधिष्ठितं येन शुक्लानि यजूꣳषि भगवान्याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिध्याय माध्यन्दिनीये वाजसनेयके यजुर्वेदाम्नाये सर्के सशुक्रियऋषिदैवतछंदाꣳस्यनुक्रमिष्यामो यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते द्रष्टारो ऋषयः स्मर्तारः परमेष्ठ्यादयो देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वानः शाखोखाशम्योपवेषकपालेध्मोलूखलाद-यश्च प्रतिमाभूताश्छन्दाꣳसि गायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यथान्तराश्वगर्त्तं वापद्यते स्थाणुं वार्च्छति प्रमीयते वा पापीयान्भवत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ॥ १ ॥ इषेत्वादि खंब्रह्मान्तं विवस्वानपश्यत्ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणामृषिर्देवा वा प्राजा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्या इषेत्वाशाखानुष्टुब्विनियोगः कल्पकारोक्त एवमूर्जेत्वा वायवो वायव्यं देवोवऽएन्द्रं यजमानस्य शाखावसोर्वायव्यं द्यौर्मातरिश्वन उखा वसोर्वायव्यं देवस्त्वापयः कामधुक्षः प्रश्नः सा विश्वायुस्त्रीणि गव्यानीन्द्रस्यैन्द्रं विष्णोः पयः ॥ २ ॥ योऽअग्नऽइदमाग्नेये कस्त्वा प्राजापत्यं कर्मणे स्रुक्शूर्प प्रत्युष्टं द्वे राक्षसे उरुब्रह्मरक्षोघ्नः सर्वत्र धूरसि धूर्देवानां विष्णुस्त्वानऽउरुह-विष्याऽअपहतः रक्षोयच्छन्ताँहविष्या देवस्य त्वा सावित्रःसर्वत्राग्नये लिंगोक्ते भूताय त्वा हविः स्वः सूर्यो दृः हन्तां गृहाः पृथिव्यास्त्वा हव्यं पवित्रे लिङ्गोक्तः सवितुर्देवीः प्रोक्षिताऽआपा-न्यग्नये लिङ्गोक्ते दैव्याय पात्राणि ॥ ३ ॥ शर्मास्यदित्याः कृष्णाजिनमवधूतः राक्षसमद्रिर्ग्रावोलू-खलेऽअग्नेर्हविर्बृहत्सऽइदम्मौसले हविष्कृदधिदैवतं वागधियज्ञं पत्नी कुक्कुटो वाग्वर्षवृद्धः शूर्प प्रतित्वा हविः परापूतमपहतः राक्षसे वायुर्वो देवो वस्तण्डुला धृष्टिरुपवेषोपाग्नऽआदेवयजनमाग्नेये ध्रुवमसि षण्णां कपालान्यग्ने ब्रह्माग्नेयं धिषणासि दार्षदंदिवः शम्या धिषवणोपलं धान्यमसि षण्णाँहविर्महीनामाज्यम् ॥ ४ ॥ संवपामि हविः समापऽआपं जनयत्त्यै त्वेदृहविरिषेत्वाज्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घर्म्मोसि षण्णां पुरोडाशस्त्रिताय त्रयाणां त्रितोद्वितऽएकतः क्रमेणाददऽइन्द्रस्य स्फ्यः पृथिवी वेदिर्व्रजं पुरीषं वर्षतु वेदिर्बर्धान सावित्रमपाररुमररोऽआसुरे द्रप्सस्ते वेदिर्गायत्रेण त्रीणि वैष्णवानि सूक्ष्मा त्रयाणां वेदिः पुराघशद्ः सोपश्यच्चान्द्रमसीं त्रिष्टुभं प्रोक्षणीः प्रैषो द्विषतः आभिचारिकमनिशितः स्रुवो निशितास्रुगदित्यै विष्णोर्योक्त्रमूर्ज्जे त्रयाणामाज्यद्ःसवितुरार्षं तेजोसिधामाज्यम् ॥५॥ इति० संहितायां प्रथमोऽध्यायः ॥१॥ कृष्णोसीध्मो वेदिर्बर्हिर्लिङ्गोक्तेऽअदित्याऽआप विष्णोः प्रास्तरमूर्णम्रदसं वेदिर्भुवपतये त्रीण्याग्नेयानि गन्धर्वस्त्रयाणां परिधयो वीतिहोत्रं विश्वावसुराग्नेयीं गायत्रीद्ःसमिदाग्नेयद्ःसूर्यस्त्वालिङ्गोक्तद्ःसवितुर्विधृतीऊर्णम्रदसमात्वाप्रास्तरे घृताच्यसि त्रयाणां जुहूपभृद्ध्रुवाः क्रमेण प्रियेण हविर्ध्रुवाऽअसदन्पाहि मां वैष्णवेऽअग्नेवाजजिदाग्नेयं नमोदैवꣳस्वधापित्र्यद्ःसुयमे स्रुचावंघ्रिणा वैष्णवं वसुमतीमाग्नेयमितऽऐंद्रद्ःसꣳयोतिषाज्यं मयीदमाशीः प्रतिग्रहणमुपहूताद्यावापृथिव्यम् ॥ ६ ॥ ब्रह्मत्वं प्रतिष्ठान्तं बृहस्पतिरांगिरसोपश्यद्दग्नेष्ट्वा प्राशित्रमेतन्ते वैश्वदेवमेषा तेऽनुष्टुबाग्नेवाजस्यग्ने वाजजिदाग्नेयमग्नीषोमयोश्चत्वारि लिङ्गोक्तानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुब्भ्यस्त्रयाणां परिधयः सञ्ज्ञानाथाव्यन्तु प्रास्तरे मरुताऽकपिर्बृहतीं प्रास्तरीमन्त्यः पादऽआग्नेयो यम्परिधिं देवलऽआग्नेयीं त्रिष्टुभं विराड्रूपां यजुरन्तामग्नेः प्रियं यजुःसꣳस्त्रवभागाः सोमसूक्ष्मो वैश्वदेवीं त्रिष्टुभं यजुरन्ताꣳस्वाहा वाड्यजुर्घृताचीस्रुचौ यज्ञनमः शूर्प्यां यवमान्कृपिरुद्वालवां धानां तर्वानिति पञ्चार्षे यो यज्ञोदेवताग्नेदब्धायोगार्हपत्योग्नये दक्षिणाग्निः सरस्वत्यै लिङ्गोक्तं वेदोसि वेदो देवामनसस्पतिर्वातदेवत्यांविराजꣳसम्बर्हिर्लिङ्गोक्ता त्रिष्टुब्विराड्रूपा कस्त्वा प्राजापत्यꣳरक्षसाꣳ राक्षसम् ॥ ७ ॥ अथ याजमानꣳसंवर्च्चसा त्वाष्ट्री त्रिष्टुब्दिविविष्णुस्त्रीणि वैष्णवान्यस्माद्भागोस्यै भूमिरगन्मै दैवꣳसञ्ज्योतिषाऽऽहवनीयः स्वयम्भूः सूर्यस्य सौरेऽअग्ने गृहपते गार्हपत्यः सूर्य्यस्य सौर-मग्नऽइदमाग्नेये॥ ८॥ पितृयज्ञः प्रजापतेरार्षमग्नये सोमाय द्वे दैवे स्वाहाकारश्रुतेरपहताऽआसुरं ये रूपाणि कव्यवाहनोऽग्निस्त्रिष्टुब् अत्रामीमदन्त पित्र्यै नमोवः षड्लिङ्गोक्तानि परे पित्र्यैऽआधत्त पित्र्यागायत्र्यूर्ज्जमापिविराट् ॥ ९ ॥ इति० संहितायां द्वितीयोऽध्यायः ॥ २ ॥ अग्न्याधेयं प्रजा-पतेरार्षं देवानामग्नेर्गन्धर्वाणां वा समिधाग्नेय्यश्चतस्रो गायत्र्यः समिधाविरूपऽआङ्गिरसः सुस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिद्धाय वसुश्रुतस्तन्त्वां भरद्वाजो भूर्भुवःस्वस्तिस्रो महाव्याहृतयोऽग्निवायुसूर्यदेवत्याः क्रमेण द्यौरिव यजमानाशीर्लिङ्गोक्तदेवताऽआयङ्गौः सार्पराज्ञस्तृचो गायत्र्योऽग्निः परावररूपेण देवता ॥ १० ॥ अग्निहोत्रं प्रजापतेरार्षं अग्निर्ज्योतिः सप्तलिङ्गोक्तदेवता गायत्र्य आद्याः पञ्चैकपदाः अग्निर्वर्चो द्वे तक्षापश्यत्परा जीवलश्चैलकिः ॥ ११ ॥ यजमानाय्युपस्थानं बृहद्देवानामार्षम् उपप्रयन्तऽइत्यनुवाकऽआद्ये द्वे आग्नेय्यौ गायत्र्यावुपवत्या गोतमो राहूगणो मूर्द्धन्वत्या विरूपः उभावां भरद्वाजऽ ऐन्द्राग्नीं त्रिष्टुभमयन्ते देवश्रवा देववातश्च भारतावाग्नेयीमनुष्टुभमयमिह वामदेवो जगतीमस्य प्रत्नामवत्सारोगव्यां वाग्नेयीं वा पयो देवत्यां वा गायत्रीं तनूपाऽआग्नेयानिऽइन्धानाऽआग्नेयीं महापङ्क्तिर्यवसाना ॥ १२ ॥ चित्रावसोरात्रिदेवत्यमृषयो पश्यन्सन्त्वमाग्नेयमन्धःस्थरेवतीःसꣳहितेति त्रीणि गव्यानि । उपस्त्वाग्नेयं तृचं गायत्रं मधुच्छन्दा वैश्वामित्रोऽग्नेत्वं चतस्रो द्विपदाऽआग्नेयीर्बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुरेकैकशऽइडेकाम्याकव्ये सोमानं ब्राह्मणस्पत्यं तृचं गायत्रं ब्रह्मणस्पतिर्मेधातिथिर्वामहित्रीणाꣳसत्यधृतिर्वारुणिरादित्यदैवतं तृचं गायत्रं पथि स्वस्त्ययनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचनैन्द्रीं पथ्याबृहतीं मधुच्छन्दास्तत्सवितुर्विश्वामित्रः सावित्रीं गायत्रीं परिते वामदेवऽआग्नेयीमनिरुक्तां गायत्रीम् ॥ १३ ॥ क्षुल्लकोपस्थानमासुरेरार्षं, भूर्भुवः स्वः प्रवत्स्यदुपस्थानमागतोपस्थानं चादित्यस्यार्षं नर्षगार्हपत्यःशꣳस्याहवनीयोथर्वदक्षिणाग्निरागन्माहवनीयोनुष्टुबयमग्निर्न्यंकुसारिणीबृहती गार्हपत्योयमग्निरन्वाहार्यपचनोऽनुष्टुब्गृहामा त्रिष्टुब्विराड्रूपा येषामानुष्टुबुपहूतामहापंक्तिस्त्र्यवसानास्तिस्रोऽपि वास्तवीः शंयुर्बार्हस्पत्यः ॥ १४ ॥ चातुर्मास्यानि प्रजापतेरार्षं, प्रघासिनो मारुती गायत्री यद्ग्रामेमारुत्यनुष्टुबनिरुक्तामोषूणोगस्त्यऐन्द्रामारुतीं विराजमक्रंननिरुक्ताग्नेय्यनुष्टुब् अवभृथयज्ञदैवतं पूर्णादर्विद्वे और्णवाभऽऐन्द्र्यावनुष्टुभावक्षंद्वे गोतमऽऐन्द्र्यौ पङ्क्ती मनोनुमानसं तृचं बन्धुर्गायत्रं वयꣳसौमीं गायत्रीं बन्धुरेषते द्वे रौद्रे अवरुद्रꣳरौद्र्यावेकापंक्तिरपराककुप् त्र्यम्बकं द्वे अनुष्टुभौ पूर्वस्या वसिष्ठऽ एतदास्तारपंक्तिस्त्र्यायुषं नारायणऽउष्णिहं यजमानाशीर्षꣳशिवोनाम क्षौरं निवर्त्तयामिलिङ्गोक्तदैवतमाशीःप्रायम् ॥ १५ ॥ इति० संहितायां तृतीयोऽध्यायः ॥ ३ ॥ अग्निष्टोमः प्रजापतेरार्षं, एदंद्वेऽअत्यष्टीत्र्यवसाने आद्यावर्द्धर्चौ देवयजनदेवत्याविमाऽआपऽओषधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुशतरुणꣳस्वधितेक्षौरमापोऽअस्मानापन्दीक्षातपसोर्वासोमहीनां नवनीतं व्वृत्रस्याजनं चित्पतिर्द्वे प्राजापत्ये देवोमा सावित्रमावोदैव्यनुष्टुबाशीःस्वाहायज्ञं चतुर्णां यज्ञऽआकूत्यै चतुर्णामौद्भृभणानाम-ग्निरापोदेवीर्लिंगोक्तदेवताविराट् ॥१६॥ विश्वोदेवस्य स्वस्त्यात्रेयः सावित्रीमनुष्टुभपृक्सामयोः कृष्णा-जिनेशर्मासि कृष्णाजिनमूर्गस्यांगिरोभिर्दृष्टंमैखलꣳसोमस्यनीविर्विष्णोर्वासऽइन्द्रस्य सुसस्याः कृष्ण-विषाणोच्छ्रयस्वदण्डोव्रतंयज्ञेदैवींधीर्येदेवावाक्प्राणोदानौ चक्षुःश्रोत्रमध्यात्ममग्निर्मित्रावरुणावादि-त्यो विश्वेदेवाऽअधिदैवतꣳश्वात्राऽआपोजगतीयंते लोष्टमपोमूत्रंपृथिव्यालोष्टमग्नेत्वमाग्नेय्यनुष्टु-प्पुनर्मनऽआग्नेयं त्वमग्ने वत्सऽआग्नेयींगायत्रीꣳरास्वेयत्सौम्यमेषातेहिरण्ण्याज्यदैवतंजूरसिवाग्दै-वतꣳशुक्रमसिहिरण्ण्यं चिदसि गौःसोमक्रयणी वाग्रूपाध्यारोपकल्पनया ॥ १७ ॥ वस्व्यस्यनुष्टुब्बृ-हतीसोमक्रयण्यास्तुतिरदित्याऽआज्यमस्मेषण्णां लिङ्गोक्तादेवताः समख्येपल्याशीरास्तारपंक्तिरेषते-लिङ्गोक्तदैवतमास्माकोसि सौम्यमभित्यꣳसावित्र्यष्टिः प्रजाभ्यस्त्वा प्रजास्त्वा शुक्रन्त्वा सौम्यानि सग्मेस्मेलिङ्गोक्तेतपसोर्द्धेजार्द्धे सोमोमित्रो नऽइन्द्रस्य सौम्ये स्वानादीनिधिष्ण्यानामानिपरिमाग्नेयी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरस्ताद्बृहती प्रतिपन्थामनुष्टुप्पथिदेवत्यादित्याः कृष्णाजिनमदित्यै सौम्यमस्तभ्नात्त्रिष्टुभौ वारुण्यौ सूर्यस्थानुष्टुप्कृष्णाजिनमुस्त्रावूर्ध्वबृहत्यानडुही भद्रो[1] मे सौम्यं नमोमित्रस्याभितपनः सूर्यः सौरीं जगतीं वरुणस्य पञ्चवारुणानि यातेसौमीं त्रिष्टुभं गौतमः ॥ १८ ॥ इति० संहितायां चतुर्थोऽध्यायः ॥ ४ ॥ अग्नेस्तनूरसिपञ्च वैष्णवान्यग्नेः शकलं वृषणौदर्भतरुणैकेऽउर्वश्यसित्रयाणां लिंगोक्ता देवता गायत्रेण त्रीण्याग्नेयानि भवतन्नः पंक्तीरग्नावग्निर्विराडेतयोर्निर्मथ्याहवनीयावग्नीदेवतेऽआपतयेवायव्यमनाधृष्टमाज्यमग्नेव्रतपाऽआग्नेयमꣳशूरꣳशुः प्रकृतिश्चतुरवसाना सौम्यन्त्योर्द्धर्चो लिंगोक्तदैवतोयातेत्रीण्याग्नेयानि तप्तायनीचत्वारि पार्थिवानि विदेदाग्नेयमग्नेऽअङ्गिरो योस्यामनुत्वालिंगोक्तानि सिꣳह्यसित्रयाणां वेदिरिंद्रघोषश्चतुर्णामुत्तरवेदिरिदमहमापाꣳसिꣳह्यसि पञ्चानां वाग्भूतेभ्यः स्रुग्ध्रुवोसिपरिधयस्त्रयाणामग्नेः संभारागुल्गुल्वादयः ॥ १९ ॥ युञ्जतेऽश्यावाश्वः सावित्रीं जगतीम्। इदंविष्णुर्मेधातिथिर्वैष्णवीं गायत्रीमिरावतीवसिष्ठस्त्रिष्टुभं देवश्रुतावक्षधुरौप्राचीस्वंगोष्ठमत्रहविर्द्धानेविष्णोर्नुतिस्त्रो वैष्णव्यस्त्रिष्टुभऽआद्ये द्वे यजुरंते विष्णोर्नुप्प्रद्दीर्घतमाऔतथ्यो विष्णो-

सं. ७२

१ भद्रोमेमित्रस्या.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रराटंपंच वैष्णवान्याददेऽभ्रिरिदमहꣳरक्षोघ्नं बृहन्नौपरवाणीदमहं पंच लिंगोक्तानि स्वराडस्यौ पर्वाणि चत्वारि रक्षोहणौवः सप्त वैष्णवानि यवोसि यवोदिवेत्वौदुंबरी शुंधंतां पित्र्ये उद्दिवं पंचानामौदुंबरी घृतेनद्यावापृथिव्यमिंद्रस्यैंद्रं परित्वा मधुच्छंदाऽअनिरुक्तामैंद्रीमनुष्टुभमिंद्रस्यैंद्राणि त्रीणि चतुर्थं वैश्वदेवम् ॥ २० ॥ विभूरस्यष्टानां धिष्ण्या अग्नयः सम्राडाहवनीयः परिषद्योबहिष्पवमानदेशोनभोसि चात्वालः मृष्टोसि शामित्रःऋतधामौदुंबरीसमुद्रोसि ब्रह्मासनम् ज्योतिरसि शालाद्वार्योहिरसिप्राजहितो वागसिसदऋतस्य द्वार्येअध्वनाꣳसूर्योमित्रस्यर्त्विजोग्नयो धिष्ण्याः ॥ २१ ॥ ज्योतिरसि वैश्वदेवं त्वꣳसोमक्रतुर्भार्गवः सौमीं गायत्रीमनवसानां जुषाणो असुदेवत्यैकपदाविराड्यजुरंताऽग्नेनयागस्त्यऽआग्नेयीं त्रिष्टुभमयन्नस्त्रिष्टुब्यजुरंताग्नेयी उरुविष्णोवैष्णव्यनुष्टुब्यजुरंता देवसवितः सावित्रमेतत्त्वꣳसौम्यꣳस्वाहा निर्लिंगोक्तदेवतामग्नेव्रतपाऽआग्नेयमत्यन्यान्वनस्पतिरोषधेकुशतरुणꣳस्वधितेपरशुर्द्यामातस्त्वंवनस्पतिः ॥ २२ ॥ इति० संहितायां पंचमोऽध्यायः ॥ ५ ॥ अग्रेणीः शकलं । देवस्त्वायूपः सुपिप्पलाभ्यश्च । बालंद्यामग्रेणयूपो याते दीर्घतमायूपदेवत्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिष्टुभं ब्रह्मवनि ब्रह्मद्दृह यूपदेवत्ये विष्णोः कर्माणि द्वे मेधातिथिर्वैष्णव्यौ गायत्र्यौ परिवीर्यूपो-
दिवस्वरुरेषते यूपऽउपावीस्तृणमुपदेवां लिंगोक्तमृतस्यत्वा पशुरग्नीषोमाभ्यां लिंगोक्तमध्योपां
पशुरापोदेवीरापद्दृसंते पशुर्घृतेन स्वरुशासौरेवतीवाग्वर्षोतृणꣳस्वाहादैवे ॥ २३ ॥ माहिर्भूरज्जुर्न-
मस्ते यज्ञोदेवीरापोर्द्धमापमर्द्धमाशीर्वाचंते मनस्तेपशुः शांलिंगोक्तमोषधे तृणꣳस्वधितेसीरक्षसां
लिंगोक्तं निरस्तमिदमहद्दृरक्षोहणीघृतेनद्यावापृथिव्यंवायोवायव्यमग्निराज्यस्याग्नेयꣳस्वाहाकृतेवपा-
श्रपण्याविदमापआपीमहापंक्तिरुव्यवसानापावमानश्चांत्यःपादःसंते हृदयद्दृरेडसिवसाप्रयुतं लिंगोक्तं
घृतं वैश्वदेवं दिशः पंचदिश्यान्यैंद्रः प्राणः पश्वंगः प्राणदानं लिंगोक्तं देवत्वाष्ट्री त्रिष्टुप् ॥ २४ ॥
समुद्रंलिंगोक्तानि द्वादशदिवंते स्वरुर्मापोहृदयशूलं धाम्नो धाम्नोवारुणं यदाहुर्वारुणी गायत्र्यनव-
साना सुमित्रियानऽआपद्दृहविष्मतीर्लिङ्गोक्तदेवतानुष्टुबग्नेर्वश्चत्वार्यापाद्यमूरापीं गायत्रीं मेधाति-
थिर्हृदेत्वा सौम्यनुष्टुप् सोमराजन्त्सौम्ये श्रृणोतु लिंगोक्तदेवतात्रिष्टुब्देवीरापऽआपीपंक्तिः कार्षि-
राज्यमनुष्टुप्समुद्रस्य समापऽआपो यमग्नेमधुच्छंदाऽआग्नेयीं गायत्रीमाददेग्रावानिग्राभ्याआपमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रायत्वा पञ्चसौम्यानि यत्तेसौमी विपरीता बृहती श्वात्राःपथ्याबृहती माभेः सौम्यमर्द्धंयावा-
पृथिव्यमर्द्धंप्रागपाक्सौम्युष्णिक् त्वमंगगोतमऽऐन्द्रीं पथ्याबृहतीम् ॥ २५ ॥ इति० संहितायां
षष्ठोऽध्यायः ॥ ६ ॥ वाचस्पतयेप्राणदेवत्याविराट् मधुमतीर्लिङ्गोक्तं यत्ते सौम्यꣳस्वाहोरुयजुषी-
लिङ्गोक्ते स्वाङ्कृतोस्युपाꣳशुर्देवेभ्यस्त्वादैवं देवाꣳशोलिङ्गोक्तमाभिचारिकं प्राणायाग्रहोव्याना-
यउपाꣳशुसवनऽउपयामगृहीतोस्यंतरैन्द्रमन्तस्ते मघवदेवत्यात्रिष्टुबुदानायग्रहः आवायो वसिष्ठो-
वायव्यां त्रिष्टुभमिन्द्रवायू मधुच्छन्दा ऐन्द्रवायवींगायत्रीमयंवागृत्समदोमैत्रावरुणीꣳरायावयं
त्रसदस्युस्त्रिष्टुभं यावां मेधातिथिराश्विनीं गायत्रीं तंप्रत्नथावत्सारः काश्यपोवैश्वदेवीं जगतीम-
च्छिन्नस्यसौम्यꣳसा प्रथमैन्द्रीत्रिष्टुप्तृपंत्वयाडग्नीलिङ्गोक्ते ॥ २६ ॥ अयं वेनोवेनस्य त्रिष्टुप् सोम-
स्तुतिरधिदैवतमधियज्ञं च मनोनत्रिष्टुप्सोमस्तुतिरधियज्ञानुवादिन्यपमृष्टः शंडोपमृष्टोमर्कऽ-
आभिचारिके देवास्त्वा शुक्रामंथिनावनाधृष्टासिदक्षिणोत्तरवेदिश्रोण्यौसुवीरः सुप्रजाः शुक्रामंथिनौ
निरस्तोद्वे आभिचारिके शुक्रस्य मंथिनः शकलं येदेवासः परुच्छेपोवैश्वदेवीं त्रिष्टुभमाग्रयणोसि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गोक्तदैवतम् ॥ २७ ॥ सोमः पवते वैश्वदेवमिन्द्रायत्वा पञ्च लिङ्गोक्तानि । मूर्द्धानं भरद्वाजो वैश्वानरीं त्रिष्टुभं ध्रुवोसिध्रुवोध्रुवं ध्रुवेण बृहती पूर्वोर्द्धर्चोध्रौवउत्तरऽऐन्द्रोयस्ते देवश्रवाः सौमीं त्रिष्टुभं यजुरंतान्देवानां चात्वालदैवतं प्राणायमे लिंगोक्तदेवतान्येकादश कोसिप्राजापत्योष्णिग्वर्द्धमानामधवेत्वा लिङ्गोक्तदेवतानि त्रयोदश ॥ २८ ॥ इंद्राग्नीं विश्वामित्रऽऐंन्द्राग्नीं गायत्रींमाघत्रिशोकऽआग्न्यैंद्रीमोमासोमधुच्छंदा वैश्वदेवीं विश्वेदेवासो यृत्समदऽइंद्रमरुत्वश्चतस्त्रो-विश्वामित्रऽऐन्द्रामारुतीस्त्रिष्टुभोमरुतांत्वायजुर्मरुत्वतीयंमहाँ२ऽइंद्रोभरद्वाजोमाहेंद्रीत्रिष्टुभं षऽओजसा वत्सोगायत्री मुदुत्यंप्रस्कण्वः सौरीं गायत्रीं चित्रं कुत्सऽआंगिरसस्त्रिष्टुभ६रूपेण वोदक्षिणाश्चतुर्णां ब्राह्मणमद्य लिङ्गोक्तदेवतान्यष्टौ ॥ २९ ॥ इति० संहितायां सप्तमोऽध्यायः ॥ ७ ॥ विष्णोवैष्णवं कदाचनादित्यदेवत्येबृहत्यौ यज्ञोदेवानां कुत्सस्त्रिष्टुभं विवस्वन्यजुः श्रदस्मै जगत्याशीर्वाममद्य भरद्वाजोबार्हस्पत्यः सावित्रींत्रिष्टुभ६सावित्रोसिसावित्र६सुशर्मासि वैश्वदेवं बृहस्पतिसुतस्य लिंगोक्तमहंप्रजापतिरूपेणाऽत्मादेवतात्रिष्टुबन्ना३ऽइपत्नीवन्नाग्नेयं प्रजापतिः प्राजापत्य६हरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रस्यृक्सामेहर्योर्यस्तेलिङ्गोक्तेदेवकृतस्याऽग्नेयानि षट् ॥ ३० ॥ समिन्द्रात्रिर्वैश्वदेवीं त्रिष्टुभं धातालिं-
गोक्तबहुदेवत्यासुगावोदेवीर्याँ२ऽआवहोवयमाग्नेय्यौयज्ञायज्ञमेषतेलिंगोक्तेयजुषीउरुꣳहिशुनःशेपो-
वारुणींत्रिष्टुभं नमोवारुणमग्नेरनीकमाग्नेयी त्रिष्टुप् समुद्रेते सौमी विराड्देवीरापःपंक्तिर्बृहती वा
पूर्वोर्द्धर्चऽआपऽउत्तरःसौम्योदेवानामाग्नेयमेजतुत्र्यवसानामहापंक्तिर्यस्यैते वशापुरुदस्मोगर्भोमरुतो-
यस्य गोतमोमारुतीं गायत्रीं महीद्यौर्मेधातिथिर्द्यावापृथिव्यामित्यग्निष्टोमः ॥ ३१ ॥ अथषोड-
श्यातिष्ठगोतमऽऐन्द्रीमनुष्टुभं । युक्ष्वाहि मधुच्छंदाः । इंद्रमिद्गोतमः । यस्मान्नैंद्री त्रिष्टुप्परब्रह्म-
रूपेण षोडशिनस्तुतिरिंद्रश्चैंद्रावारुणीषोडशिदेवत्यावायजुरंताग्नेपवस्व वैखानसऽआग्नेयीं गायत्री-
मुत्तिष्ठन्कुरुस्तुतिरैन्द्रीमहश्रं प्रस्कण्वः सौरीं अतिस्रोपियजुरन्ताः उदुत्यं देवानामार्षमाजिघ्रेडे-
कौसुरुबिंदुर्गव्ये महापंक्तिःप्रस्तारपंक्तिः विनःशासोभारद्वाजऽऐन्द्रीमनुष्टुभं वाचस्पतिं वैश्वकर्मणीं
त्रिष्टुभं विश्वकर्मन्नैंद्रीवैश्वकर्मण्यग्नयेत्वा देवार्षाण्यदाभ्यदेवत्यानिव्रेशीनांत्वा सौम्यानि ॥ ३२ ॥
सत्रोत्थानं देवानामार्षमिहरातिः पशुदैवतमुपस्पृजन्नुष्णिगाग्नेयी सत्रस्य बृहती यजमानानामात्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुतिर्युवंतंपरुच्छेपऽऐंद्रीमत्यष्टिंत्र्यवसानामाद्योर्द्धर्चऽऐंद्रापार्वतः परमेष्ठीनैमित्तिकान्याध्याद्वसिष्ठ-
स्यार्षं लिंगोक्तदेवतानि चतुस्त्रिꣳशद्ययोर्वैष्णववारुणीं त्रिष्टुब्देवान्दिवमाशीर्लिंगोक्तदेवताश्चतुस्त्रिꣳ-
शद् वर्मदेवत्यापंक्तिस्त्रिष्टुब्वायज्ञस्य यज्ञदेवत्या त्रिष्टुबापवस्व सौमीं गायत्रीं नैध्रुविः कश्यपः ॥ ३३ ॥
इति० संहितायां अष्टमोऽध्यायः ॥ ८ ॥ अथ वाजपेयोबृहस्पतेरार्षम् इंद्रस्य च देवसवितःसावित्री
त्रिष्टुप् ध्रुवसदमैंद्राणित्रीण्यपाꣳरसदेवत्यानुष्टुब्महालिंगोक्तदेवतानुष्टुप्संपृचौ यजुषीन्द्रस्य रथोवा-
जस्य पार्थिव्यतिजगत्यंत्यःपादःसावित्रोऽप्स्वन्तरश्वदेवत्यानवसानापुरऽउष्णिग्वातोवातिस्रोश्वस्तु-
तयऽउष्णिक्त्रिष्टुब्जगत्योवाजिनोश्वाःदेवस्याहं लिंगोक्तानि वाजिनोश्वाऽएषस्य द्वे दधिक्रावावाम-
देव्योश्वदेवत्ये जगत्यौ शन्नोवसिष्ठोविराजंतेनोनाभानेदिष्ठोजगतीं वाजेवाजे वसिष्ठस्त्रिष्टुभमामा-
प्राजापत्यांवाजिनोश्वाः ॥३४॥ आपयऽआयुर्यज्ञेनप्राजापत्यानि प्रजापतेः स्वरमृतायजमानोस्मेदिशो-
नमः पृथिवीयमासंदीयंतासुन्वन्वाजस्य प्राजापत्यं तृचं त्रैष्टुभꣳसोमं तृचंतापसऽआद्या वैश्वदेव्य-
निरुक्तानुष्टुब्द्वितीया लिंगोक्तदेवता तृतीयाग्नेयीप्रनोलिंगोक्ता गायत्री सरस्वत्यैसुन्वन्नग्निःसप्तदश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिंगोक्तदेवतानि ॥ ३५॥ अथ राजसूयोवरुणस्यार्षम् एषते पार्थिवमग्निनेत्रेभ्यो देवार्षाण्याध्याया-
द्दशाद्यानि दैवान्यग्नेसहस्व देवश्रवादेववातश्च भारतावाग्नेयीमनुष्टुभमुपाꣳशोस्त्रीणि रक्षोघ्नानि
सविताद्वेयजमानः ॥ ३६ ॥ इति० संहितायां नवमोऽध्यायः ॥९॥ अपोदेवाऽआपीत्रिष्टुप् वृष्णऽऊर्मि-
र्लिङ्गोक्तानि मधुमतीरनाधृष्टाआपेसोमस्य चर्माग्नये लिंगोक्तान्यनिभृष्टमापꣳसधमादोवारुणीत्रिष्टुप्
क्षत्रस्य चतुर्णांतार्प्पपांड्वाधीवासोष्णीषाणींद्रस्यधनुर्म्मित्रस्य बाहूत्वयायंधनुर्द्दवाषाणामिषवऽआविः
प्राजापत्यंपराणि लिंगोक्तानि ॥ ३७ ॥ अवेष्टामृत्युनाशनं प्राचीं पंचानां यजमानःप्रत्यस्तमासुरं
मृत्योरोजोसिरुक्मोहिरण्ययरूपौ मैत्रावरुणीत्रिष्टुब्यजुरन्तासोमस्यसुन्वन्प्रपर्वतस्यापीत्रिष्टुब्विष्णो-
स्त्रीणिलिंगोक्तानि सुन्वन्प्रजापतेन प्राजापत्यात्रिष्टुब्यजुर्मध्याअयममुष्यजूरुद्रयद्रौद्रम् ॥ ३८ ॥
इंद्रस्यलिंगोक्तानिमाते संवरणः प्राजापत्यऽऐंद्रींत्रिष्टुभमग्नये लिंगोक्तानि पृथिविमातर्भूमिर्हꣳ-
सोवामदेवः सौरीꣳसप्रपंचपरब्रह्माभिधायिनीमतिजगतीमियच्छतमानावूर्गसिशाखेन्द्रस्य बाहूस्यो-
नास्यासंदीक्षत्रस्याधीवासꣳस्योनाꣳसुन्वन्निषसाद शुनःशेपोवारुणीं गायत्रीमभिभूरस्यक्षायज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानोवाब्रह्मँस्त्वमामंत्रणानि पंच लिंगोक्तानींद्रस्य स्फ्योग्निः पृथुराग्नेयꣳस्वाहाकृता अक्षाः सवित्रालिंगोक्तदैवतम् ॥ ३९ ॥ अथ चरकसौत्रामण्यश्विनोरार्षम् अश्विभ्यां त्रीणि लिंगोक्तानि वायुः सौमी गायत्री कुवित्तृचꣳसुकीर्तिः काक्षीवतऽआद्या सौम्यनिरुक्ता त्रिष्टुब्युवमनुष्टुप्पुत्रमिवत्रिष्टुबश्विसरस्वतींद्रदेवत्येअश्विसरस्वतींद्रदेवत्ये ॥ ४० ॥ इति० संहितायां दशमोऽध्यायः ॥१०॥ इतिसर्वानुक्रमणिकायां प्रथमोऽध्यायः ॥ १ ॥ अथाग्निंप्रजापतिरपश्यत् ॥ साध्यावापश्यन्त्सोग्निः-पंचचितिकः प्रथमाचितिः ॥ प्रजापतेर्द्वितीयादेवानांतृतीयेंद्राग्न्योर्विश्वकर्मणश्चतुर्थ्यर्षीणां पंचमी परमेष्ठिनोऽथ प्रतिकर्मदर्शिनो युञ्जानोष्टौसावित्राणिसवितापश्यदाद्यातृतीयाचानुष्टुप्चतुर्थीषष्ठ्यौ जगत्यौ द्वितीयागायत्रीपंचमीत्रिष्टुबिमंनोयजुरंतागायत्र्यनवसानाऽआददेभ्रिर्हस्तेनुष्टुब्यजुरंता ॥ १ ॥ प्रतूर्त्तनाभानेदिष्टऽआश्वीमास्तारपंक्तिंयुंजाथां कुश्रिर्गार्दभीं गायत्रींयोगेयोगेशुनःशेप आर्जीप्रतूर्वस्त्रिष्टुब्विराड्रूपायजुर्गर्भोरुयजुःपृथिव्यास्त्रीण्याग्नेयान्यन्वग्निराग्नेयीं त्रिभष्टुं पुरोधसऽआगत्य मयोभुवऽआश्वीमनुष्टुभमाक्रम्यानुष्टुप् द्यौस्तेबृहत्युत्क्रामविराडुदक्रमीत्रिष्टुबात्वाद्वे गृत्समम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दआग्नेय्यौपरिसोमकोगायत्रीं परित्वापायुरनुष्टभंत्वामग्नेगृत्समदोजगतीम् ॥ २ ॥ पृथिव्याऽआग्नेयं। अपांपुष्करपर्णंऽस्वराट्पंक्तिःशर्मद्वेऽअनुष्टुभौकृष्णाजिनपुष्करपर्णे पुरीष्योग्निस्त्वामग्नेतृचंभारद्वाजऽआग्नेयं गायत्रꣳसीदहोतर्देवश्रवादेववातश्च त्रिष्टुभं निहोतागृत्समदःसꣳसीदस्वप्रस्कण्वोबृहतीम् ॥ ३ ॥ अपोदेवीः सिंधुद्वीपऽआपीन्यंकुसारिणीऽं संतेत्रिष्टुप्पार्थिवोर्द्धोवायव्योर्द्धः सुजातोनुष्टुबाग्नेयीऽउदुतिष्ठविश्वमनाः पथ्याबृहतीमूर्द्धःकण्वऽउपरिष्टाद्बृहतीऽंसजातस्त्रितस्त्रिष्टुभऽंस्थिरोरासभेय्यनुष्टुबुष्णिग्वाशिवोभवाजीपथ्या बृहती प्रैतुलिंगोक्तामहापंक्तिस्त्र्यवसानाग्नेगायत्र्येकपदाग्नेय्यातमग्निमाग्नेये ओषधयस्त्रिष्टुबनुष्टुभावोषधिदेवत्येअव्यस्यन्नाग्नेयोर्द्धर्चविपाजसोत्कीलःकात्यआग्नेयीं त्रिष्टुभम् ॥ ४ ॥ आपोह्यापꣳसिंधुद्वीपस्तृचंगायत्रंमित्रउपरिष्टाद्बृहतीमैत्रीरुद्रा अनुष्टुब्रौद्रीसꣳसृष्टां द्वे सिनीवालीदेवत्येउखामादित्यामखस्य मृत्पिंडोवसवस्त्वा लिंगोक्तानि सर्वत्रादित्यैरास्नादितिरौषंकृत्वायादित्योष्णिगदितिरावटंदेवानां पंचौखानि मित्रस्यविश्वामित्रोमैत्रीं देवस्त्वा

१ गायत्रीं.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावित्री बृहत्युत्थायपूर्वोर्द्धर्चऔषऽउत्तरोमैत्रः ॥ ५ ॥ आकूति लिंगोक्तान्यौद्भृभणानि मास्वौख्यौ-
गायत्री त्रिष्टुभावग्निश्च पादाआग्नेयोद्वन्नः सोमाहुतिराग्नेयीं गायत्रीं परस्याविरूपऽआंगिरसः
परमास्याऽआरुणिरनुष्टुभं यदग्नेद्वेजमदग्निःअहरहर्नाभानेदिष्ठस्त्रिष्टुभौ याःसेनाऽअनुष्टुभः सर्वाऽ-
आग्नेय्योंत्योपरिष्टाद्बृहती ॥ ६ ॥ इति० संहितायां एकादशोऽध्यायः ॥ ११ ॥ दृशानोवत्सप्री
त्रिष्टुभ॒रौक्मींन्नक्तोषासा कुत्सऽआग्नेयीं विश्वाश्यावाश्वःसावित्रीं जगतीꣳसुपर्णः कृतिश्चतुर-
वसानागारुत्मती विषघ्नी विष्णोर्लिंगोक्तान्यक्रंदद्वत्सप्रीराग्नेयीं त्रिष्टुभमग्नऽऊर्ध्वबृहत्यग्ने महाबृहती
पुनर्गायत्र्यावात्वाध्रुवोऽनुष्टुभमुदुत्तम॒शुनःशेपोवारुणींत्रिष्टुभमग्नेत्रितऽआग्नेयीꣳह॒सऽउक्ताजग-
तीह यजुरन्तांतेबृहद्यजुःसीदत्वमाग्नेयीं त्रिष्टुभमंतरग्नेनुष्टुभौ ॥ ७ ॥ दिवस्पर्याग्नेयंत्रैष्टुभंद्वादशर्च्चं
वत्सप्रीर्भालंदनः समिधाग्निं विरूपाक्षऽआंगिरसऽआग्नेयं गायत्रीमुदुत्वातापसोनुष्टुभं प्रेदनुष्टुप्प्र-
प्रायमग्नेयीं वसिष्ठस्य त्रिष्टुभमापोदेवीराप्यप्स्वग्ने विरूपऽआग्नेयींगायत्रींगर्भोऽअसितिस्त्रोऽनुष्टुभो-
बोधामे दीर्घतमास्त्रिष्टुभ॒ःसबोधिसोमाहुतिराग्नेयीं यजुरंतां गायत्रीं यजुर्वैश्वकर्म्मणं पुनस्त्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिष्टुबाग्नेयी ॥ ८ ॥ अपेतालिंगोक्तबहुदेवत्यासंज्ञानमूषदैवत्यमग्नेः सिकताश्चितः परिश्रितोयद्ध्सः पंचर्च्चमाग्नेयं त्रैष्टुभं विश्वामित्रश्चतुर्थ्यनुष्टुप्अयंतेनुष्टुप्त्विदैष्टकेलोकंलिंगोक्तानुष्टुप्ताऽअस्यापींद्रियमेधऽऐंद्रऽइंद्रजेतामाधुच्छंदसऐंद्रीॐसमितंचतस्रोद्व्यग्निदेवत्याउष्णिगुपरिष्टाद्बृहत्युष्णिक्पंक्तयोमातेवो खास्तुतिस्त्रिष्टुप् ॥९॥ असुन्वंतं नैर्ऋतं तृचं त्रैष्टुभं यतेयजमानदेवत्यानमोविड्भूतिदेवत्येकपदानिवेशनऽआग्नेयीं त्रिष्टुभं विश्वावसुर्द्देवगंधर्वः सीराद्वे सीरदेवत्येबुधः सौम्योगायत्री त्रिष्टुभौशुनंचतस्रः सीतादेवत्याः कुमारहरितोद्वे त्रिष्टुभौ तृतीयापंक्तिश्चतुर्थ्यनुष्टुब्विमुच्यध्वमानडुहीगायत्री सजूर्लिंगोक्तदैवतम् ॥ १० ॥ याऽओषधीःसप्तविंशतिरनुष्टुभऽओषधिस्तुतिमाथर्वणोभिषङ्मुंचंतुबंधुर्द्वादशानारभ्याधीताःमामाहिरण्यगर्भः कार्यींत्रिष्टुभमभ्यावर्त्तस्वोष्णिगाग्नेयी अग्नेयद्गायत्रीयं त्रिष्टुबग्नेतवपावकोग्निराग्नेयद्ध्षडृचंप्रथमेविष्टारपंक्तिस्तिस्रःसतोबृहत्यऽउपरिष्टाज्ज्योतिः षष्ठ्याप्यायस्वगोतमः सौम्योगायत्री त्रिष्टुबुष्णिहः आतेवत्सारस्तुभ्यंताद्वेविरूपस्तिस्रो गायत्र्यऽआग्नेय्यः ॥११॥ इति० संहितायां द्वादशोऽध्यायः ॥ १२ ॥ मयिककुबाग्नेयीब्रह्मादित्यदेवत्यात्रिष्टुप्हिरण्यगर्भः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यीत्रिष्टुभन्द्रप्सोदेवश्रवाऽआदित्योनमोस्तुसार्प्यंतृचमानुष्टुभंकृणुष्वपंचप्रतिसराराक्षोघ्नादेवाना-
मार्षꣳसर्वास्त्रिष्टुभऽआग्नेयीर्वामदेवश्चापश्यदग्नेष्ट्वायजुराग्नेयमिंद्रस्यैंद्रंभुवस्त्रिशिराऽआग्नेयींत्रिष्टुभम्
॥ १२ ॥ ध्रुवास्यूर्ध्वबृहतीप्रजापतिरनुष्टुप्भूरसिप्रस्तारपंक्तिरासाऽंस्वयमातृणादेवताविश्वस्साइत्ये-
तस्य च यजुषः कांडात्कांडादानुष्टुभंद्व्यृचमग्निनादृष्टंदूर्वेष्टकादैवतं यास्तऽआग्नेयं द्व्यृचमानुष्टुभमिन्द्रा-
ग्निभ्यां दृष्टं विराडयंलोकःस्वराडसौलोकः प्रजापतिष्ट्वाविश्वज्योतिषं मधुश्चर्तुदैवतमषाढासिसविता-
पश्यद्देवावापश्यन्निष्टकादैवतम् ॥ १३ ॥ मधुवातावैश्वदेवंतृचंगायत्रंगोतमोपांगंभन्पङ्क्तिस्त्रीन्त्समुद्रां-
स्त्रिष्टुप्कौर्म्यं द्व्यृचं ध्रुवासित्रिष्टुबिषेबृहत्यौरवंद्व्यृचमग्नेयुक्ष्वाग्नेयंद्व्यृचं गायत्रमाद्यायां भरद्वाजोद्वितीय-
स्यां विरूपः सम्यक्त्रिष्टुब्लिंगोक्तदेवताऋचेत्वाबृहत्यग्निर्ज्योतिषोष्णिगादित्यंगर्भं पंचर्चमाग्नेयं त्रैष्टु-
भमिमंमापंचर्चमाग्नेयं त्रैष्टुभमेवद्वेद्वेचांतेयजुषीत्वंयविष्ठोशनाः काव्यआग्नेयीमनिरुक्तांगायत्रीमपां-
त्वाविꣳशतिरैष्टकान्यर्यपुरःपंचाशत्प्राणभृद्देवत्यानि लोकंताऽइंद्रं तिस्रः प्रतीकोक्ताः एवꣳसर्वत्र
॥ १४ ॥ इति० संहितायां त्रयोदशोऽध्यायः ॥ १३ ॥ अथ द्वितीया चितिः ॥ ध्रुवक्षितिः पंचाश्वि-

सं. ७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यस्तासां प्रथमाविराट्वतस्त्रस्त्रिष्टुभो यजुरंताः शुक्रश्चर्तव्यꣳसजूःपंच विश्वेषां देवानामार्षं ता एव देवताः प्राणं मे पंच वायव्याग्न्यपः पंचायानि मूर्द्धावय एकोनविꣳशतिर्लिंगोक्तदैवतानि ॥ १५ ॥ अथतृतीयेंद्राग्नीअनुष्टुप् पूर्वोर्द्धर्चऐंद्राग्नऽउत्तरः स्वयमातृणादैवतोविश्वकर्मावायव्यꣳराज्यसि पंचदिग्दैवत्यानिविश्वकर्मावायव्यं नभश्चैषश्चर्तव्येआयुर्मे दश लिंगोक्तदैवतानि माच्छंदश्चषट्त्रिꣳशन्मूर्द्धानुष्टुब्यंत्रीपरोष्णिक्चतुर्दशयजूꣳषि प्राणदैवत्यानि ॥ १६ ॥ अथचतुर्थ्याशुरष्टादशाग्नेर्दशैकया सप्तदश सर्वाणि लिंगोक्तदैवतानि सहश्चर्तव्यम् ॥ १७ ॥ इति० संहितायां चतुर्दशोऽध्यायः ॥ १४ ॥ अथ पंचमी अग्नेजातानाग्नेय्यौत्रिष्टुभौषोडशीचतुश्चत्वारिꣳशल्लिंगोक्ते अग्नेस्त्रिष्टुप्एवश्चत्वारिꣳशद्रश्मिनैकोत्रिꣳशद्राज्यसि पंचायंपुरः पंचैतानि सर्वाणि लिंगोक्तदैवतानि ॥१८॥ अग्निर्मूर्द्धाग्नेयोनुवाकः प्रथमस्तृचोगायत्रोद्वितीयस्त्रैष्टुभोभुवंस्तृतीयोजागतोऽयमिहचतुर्थआनुष्टुभः सखायःसं पंचमःप्रगाथएनावस्तत्रपूर्वा बृहती सतोबृहत्युत्तराताभ्यां तिस्रोबृहत्यः संपादिताः षष्ठऔष्णिहोग्नेवाजस्य गोतमःसप्तमः पुनः ककुभः प्रगाथोभद्रोनस्तत्रपूर्वाककुप्सतोबृहत्युत्तराताभ्यां तिस्रः ककुभः संपादिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः पांक्तोग्निंतंपदपांक्तोनवमोग्नेतमग्निꣳहोतारमतिछंदाश्चयवसानाग्नेत्वंद्वैपदस्तृचः ॥ १९ ॥ अयमग्निर्विरूपोबोधिबुधगविष्ठिरोजनस्यसुतम्भरः सखाय इषःसꣳसमित्संवननस्त्वांप्रस्कण्व एनावो वसिष्ठोऽग्नेवाजस्यगोतमोभद्रोनः सौभरिरग्निं तं कुमारवृषौ येनाष्टावाग्नेय्यः षट्त्रिष्टुभो द्वे अनुष्टुभौ तदश्चर्त्तव्यंपरमेष्ठीसौरं प्रोथदश्वोवसिष्ठस्त्रिष्टुभमाग्नेयीमायोर्द्वेस्वयमातृणदैवत्ये सहस्रस्थपंचाग्नेयानि ॥ २० ॥ इति० संहितायां पंचदशोऽध्यायः ॥ १५ ॥ रौद्रोऽध्यायः परमेष्ठिन आर्षं देवानां वा प्रजापतेर्वाऽद्योनुवाकः षोडशर्च्च एकरुद्रदेवत्यः प्रथमागायत्रीतिस्रोऽनुष्टुभस्तिस्रःपङ्क्तयः सप्तानुष्टुभोद्वेजगत्यौ मानोद्वेकुत्सः ॥ २१ ॥ अंत्यानुवाकेसप्तैकरुद्रस्तुतिः आद्योपरिष्टाद्बृहती द्वितीया जगती कुत्सस्य तृतीयानुष्टुब्द्वे त्रिष्टुभौ द्वे अनुष्टुभावसंख्याता बहुरुद्रदेवत्यादशानुष्टुभोमंत्राऽअवतानसंज्ञकास्ततोंऽत्यानित्रीणियजूꣳषि बहुरुद्रदेवत्यानि प्रत्यवरोहसंज्ञकामंत्राः ॥२२॥ मध्ये सर्वाणि यजूꣳषिहिरण्यबाहवइति तिस्रोऽशीतयोरुद्राणां तेषामुभयतोनमस्कारा अन्येन्यतरतोनमस्कारा अपरेजातानामरुद्राः सभाभ्यइत्यादयो नमोवःकिरिकेभ्यइत्यग्निवायुसूर्यहृदयभूताः पंचव्याहृतयोबहु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रदेवत्याः ॥ २३ ॥ इति० संहितायां षोडशोऽध्यायः ॥ १६ ॥ अश्मन्मारुतमश्मँस्ते श्मामय्या-
शीर्य्यद्विष्मऽआभिचारिकमिमामऽआग्नेयमृतवोबृहतीपंक्तिर्वा समुद्रस्य द्वे गायत्र्यावुपज्मं जगती
त्रिष्टुब्वाऽपामिदं बृहत्यग्नेपावकवसूयवः सनोमेधातिथिःपरेतेआग्नेय्यौ गायत्र्यौ पावकया जगतीं
भरद्वाजो नमस्ते बृहतीमाग्नेयीमृषिसुता लोपामुद्रा ॥ २४ ॥ नृषदे पंचाग्नेयानि ये देवा जगत्यौ
प्राणदेवत्ये प्राणदा बृहतीपंक्तिर्वाऽऽग्नेय्याग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजोयऽइमा वैश्वकर्म्मणी-
स्त्रिष्टुभोविश्वकर्माभौवनः ॥२५॥ आशुरैन्द्रीर्द्वादश त्रिष्टुभोऽप्रतिरथोवस्रष्टानुष्टुबिषुदेवत्याप्रेतयोध्द्रु-
न्तस्तौत्यनुष्टुबसौयामारुतीत्रिष्टुब्यत्रलिंगोक्तदेवता पंक्तिर्मर्म्माणि लिंगोक्तैवत्रिष्टुबुदेनंतिस्रोनुष्टुभ-
ऽआद्याग्नेयीद्वितीयैंद्री तृतीया लिंगोक्तदेवता पंचदिशः पंचयज्ञाग्निसाधनवादिन्यऽआद्येद्वे त्रिष्टुभौ
तृतीया पंक्तिर्बृहती वा चतुर्थीबृहत्येवान्त्यात्रिष्टुब्विमानो द्वे आदित्यदेवत्येऽआद्या विश्वावसोर्द्वितीया-
प्रतिरथस्यदेवहूर्विधृतिरनुष्टुब्यज्ञदेवत्या वाजस्यैंद्र्यनुष्टुबुद्ग्राभमैंद्राग्न्यनुष्टुबेव ॥२६॥ क्रमध्वंपंचाग्नेय्य-
ऽआद्यानुष्टुप्ततस्त्रिष्टुप्ततोबृहतीपिपीलिकमध्या ततोनुष्टुप्त्रिष्टुबंत्या अग्नेसहस्राक्षविराडाग्नेयीसुप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्णोद्वेपंक्तित्रिष्टुभौताऽंसवितुःसावित्रीं त्रिष्टुभं पुरस्ताज्ज्योतिषंकण्वोददर्श विधेमाग्नेयीं गृत्समदस्त्रि-
ष्टुभमस्यास्त्रिस्थानाग्निर्देवता प्रेद्धोविराडाग्नेयी वसिष्टस्य चित्तिं वैश्वकर्मण्यतिजगती सप्तऽआग्नेयी
त्रिष्टुप्सप्तऽऋषीणाम् ॥ २७ ॥ शुक्रज्योतिः षण्मारुत्यऽआद्या चतुर्थीचोष्णिग्द्वितीयातृतीयाचगा-
यत्री पंचमीजगती षष्ठीगायत्र्युष्णिग्वाइन्द्रंदैवीर्मारुतमिमंत्रयोदशर्चऽआग्नेयस्त्रैष्टुभोऽनुवाको यज्ञ-
स्तुतिर्घृतस्तुतिर्वावसोर्द्धाराभिवादिनी वा घृतंमिमिक्षेगृत्समदः समुद्राद्वामदेवश्चत्वारिशृङ्गायज्ञ-
पुरुषदेवत्यऽऋषभोमंत्रः ॥ २८ ॥ इति० संहितायां सप्तदशोऽध्यायः ॥ १७ ॥ वाजश्चदेवानामार्षम्
एतैर्यजुर्भिर्यजमानोग्नेः कामान्याचते वाजप्रसवीयꣳसप्तर्चं विश्वेत्रैष्टुभं वैश्वदेवं लुशोधानाकः
वाजोनस्तिस्रोन्नदेवत्या आद्यानुष्टुब्द्वे त्रिष्टुभौ संमाविराजावाग्नेय्यौ सरस्वत्यै लिंगोक्तदेवतम् ॥ २९ ॥
ऋताषाड्गन्धर्वाप्सरसः सनः प्राजापत्या प्रस्तारपंक्तिः समुद्रोसि वायव्यानि त्रीणि रुचमाग्नेय्यनु-
ष्टुप्त्वा वारुणीं त्रिष्टुभꣳशुनःशेपः स्वर्णाग्नेयानि पंचाग्निंयुनज्म्याग्नेय्यस्तिस्रऽआद्येद्वे त्रिष्टुभौ पंक्ति-
स्तृतीयादिवोद्वेआग्नेय्यौ परौष्णिङ्महापदपंक्तीऽइष्टोयज्ञोद्यूचं यजमानाग्निदैवत्यं गालवऽआद्योष्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्द्वितीयागायत्री ॥ ३० ॥ यदाकूतादष्टर्चमाग्नेयम् विश्वकर्म्मणस्तृतीया दैवीवाद्याजगती तिस्रस्त्रि-
ष्टुभश्चतस्रोनुष्टुभोग्निरस्म्यश्यद्वैतवादिनीं त्रिष्टुभं देवश्रवादेववातश्च भारतावृचोयजुर्येअग्नेयोनुष्टुबा-
ग्नेयी ॥ ३१ ॥ वार्त्रहत्याय सप्तर्च्चमिन्द्रोऽपश्यत् । आद्ये द्वे वार्त्रघ्न्यौगायत्रीत्रिष्टुभौ विश्वामित्रस्य
चविनोऽनुष्टुप्मृगोनत्रिष्टुप्प्रथमाऽंशासोभारद्वाजोद्वितीयांजयऽऐंद्रोद्वेवैश्वानर्य्यौगायत्रीत्रिष्टुभौ
पृष्ठोदिविकुत्सस्य चाश्यामद्वेत्रिष्टुभावाग्नेय्यौ कामवत्यावश्यामभरद्वाजस्य च वयंते कात्यस्योत्कीलस्य
च धामच्छदनुष्टुब्वैश्वदेवी ॥ ३२ ॥ इति० संहितायां अष्टादशोऽध्यायः ॥ १८ ॥ अथ सौत्रामणी
प्रजापतेरार्षम् अश्विनोः सरस्वत्याश्च स्वाद्वींत्वानुष्टुप्सुरासोमदेवत्या सोमोसि चत्वारि सौराणि परि-
तोभारद्वाजः सौमीं बृहतीं वायोस्तृचोगायत्रः सौम्यऽआभूतेर्ब्रह्मक्षत्रं त्रिष्टुप्सुरासोमदेवत्या नानाहि
जगती सुरासोमदेवत्या तेजोसि पयोदेवत्यान्योजोसि सुरादेवत्यानि याव्याघ्रहैमवर्च्चैरनुष्टुब्विषूचि-
कास्तुतिर्यदापिपेषाग्नेयी बृहती सम्पृचस्थपयोग्रहाः विप्रचस्थ सुराग्रहाः देवायज्ञंब्राह्मणानुवाको वि-
शतिरनुष्टुभःसोमसंपत् ॥ ३३ ॥ सुरावंतंचतुर्ऋचंत्रैष्टुभं अश्विसरस्वतींद्रदेवत्यंपितृभ्यः सप्त पित्र्याणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनन्तुमा नवर्च्चं पावमानमाद्येद्वे पित्र्येअनुष्टुभौ प्रजापतिस्तृतीयां वैखानसऽआग्नेयीं गायत्रीं चतुर्थीलिंगोक्तदेवतानुष्टुप्पंचम्याग्नेयीगायत्री षष्ठ्याग्नेयीब्राह्मी च गायत्री ब्राह्मस्तृतीयःपादःसौमी-
सावित्र्यष्टमी नवमीत्रिष्टुब्वैश्वदेवी येसमानाऽअनुष्टुभौपित्र्याद्या द्वितीया यजमानाशीर्द्वेस्तृती
त्रिष्टुब्देवपानपितृपाणौपंथानौब्रवीतीद्ꣳहविरुत्र्यवसानाष्टिर्यजमानाशीः ॥ ३४ ॥ उदीरतांत्रयोदश-
र्च्चंपैत्र्यं त्रैष्टुभꣳशंखएकादशी तु जगत्याच्याजानुदशर्च्चोनुवाकोनवपित्र्या दशम्यैंद्रीगायत्री तृतीया-
चतुर्थीनवम्योऽनुष्टुभस्त्रिष्टुभऽइतराः सोमोराजाष्टर्चमश्विसरस्वतीन्द्राऽ अपश्यन्नद्यास्तिस्रोमहाबृ-
हत्यऽउपान्त्याचचतुर्थ्यन्ते अतिजगत्यौ शेषेअतिशक्वर्यौत्र्यवसाने सीसेनतंत्रमश्विसरस्वतींद्रदेवत्याः
षोडशजगत्यः ॥ ३५ ॥ इति० संहितायां एकोनविंशोऽध्यायः ॥ १९ ॥ क्षत्रस्यषोनिर्द्विपदागायत्री-
आसन्दीदेवताकामात्वाकृष्णाजिनं मृत्योरुक्मावश्विनोर्भैषज्येनलिंगोक्तदेवतानि त्रीणि कोसिप्रा-
जापत्यागायत्री शिरोमेपंचर्चमिन्द्रशरीरावयवदेवताकं तृतीयागायत्र्यंत्यामहापंक्तिरुत्र्यवसानानुष्टु-

---

१ सप्तमी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोंत्याः प्रतिक्षत्रे वैश्वदेवं त्रयादेवा दैवीपंक्तिस्त्र्यवसाना प्रथमाद्वितीयैर्वैश्वदेवमाशीर्लिंगं लोमान्य-
नुष्टुब्लिंगोक्तदेवता ॥ ३६ ॥ यद्देवास्तिस्रोऽग्निवायुसूर्यदेवत्याऽअनुष्टुभः कूष्माण्डीर्यद्ग्रामे लिंगोक्त-
देवतꣳसमुद्रेतेद्विपदा विराडापी द्रुपदादिवानुष्टुबाप्युद्वयꣳसौर्य्यनुष्टुप्प्रस्कण्वस्यापोऽअद्याग्नेयी
पंक्तिरेधोसिसमिद्देवत्ये यजुषी समाववर्त्यनिरुक्तागायत्री वैश्वानरज्योतिर्यजुरभ्यादधाम्याग्नेयं तृच-
मानुष्टुभमाश्वतराश्विरꣳशुनासौर्य्यनुष्टुप्सिंचंतिपरिसौर्यैन्द्रीचानुष्टुब्धानावंतमैंद्रीगायत्री विश्वा-
मित्रस्य च बृहदिंद्राय बृहती नृमेधपुरुषमेधयोरध्वर्योगायत्री ॥ ३७ ॥ योभूतानामात्मप्रवादा-
पंक्तिर्नारायणीयाकौण्डिन्यस्यप्राणपामे द्वे अनुष्टुबुपरिष्टाद्बृहत्यौ लिंगोक्तदेवते समिद्धऽइंद्रऽएका-
दशाप्रीस्त्रिष्टुभऽआंगिरसऽइध्मस्तनूनपान्नराशꣳ सऽइडोबर्हिर्द्वारऽउषासानक्ता दैव्याहोतारा तिस्रो-
देवीस्त्वष्टा वनस्पतिः स्वाहाकृतयऽइत्येताऽआप्रीदेवताऽआयातु सप्तत्रिष्टुभऐंद्र्यऽआमन्द्रैर्बृहत्यायातु
वामदेवस्त्रातारं गर्ग्गऽआमन्द्रैर्विश्वामित्रऽएवेद्वसिष्ठः ॥ ३८ ॥ अथहोत्रंत्रिपशोः समिद्धोऽअग्नि-
राप्रीर्द्वादशविदर्भिरश्विसरस्वतीन्द्रदेवत्या अनुष्टुभोश्विनाहविस्तिस्रोनुष्टुभऽएकैकाश्विसरस्वतींद्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवत्याःयइंद्रंसवितृवरुणदेवत्यास्तिस्रोऽनुष्टुभोऽश्विनागोभिस्तिस्रोनुष्टुभो युवंपुत्रमिवानुष्टुप्त्रिष्टु-
भौयस्मिन्नश्वासऽआग्नेय्यौ जगतीत्रिष्टुभावश्विनातेजसैकादशर्च्चꣳशस्त्रंगोमद्वृत्समदस्तृचमाश्विनं
गायत्रं पावकानो मधुच्छंदाः सारस्वतमिंद्रायाह्येंद्रंमधुच्छंदाएवानुक्तमानुष्टुभमश्विसरस्वतींद्रदेव-
त्यम् ॥ ३९ ॥ इति० संहितायां विंशोऽध्यायः ॥ २० ॥ इमंमे गायत्रीत्रिष्टुभौवारुण्यौशुनःशेपस्त्वन्न-
स्त्रिष्टुभावावारुण्यौ वामदेवो महीमूषुत्रिष्टुबादित्या सुत्रामाणंगयः प्लातः सुनावन्नौखर्य्यागायत्र्या-
नोमैत्रावरुणींगायत्रींविश्वामित्रः प्रबाहवावसिष्ठस्त्रिष्टुभꣳ समिद्धोऽअग्निरेकादशाप्रमानुष्टुभꣳस्वस्त्या-
त्रेयस्यार्षं वयोधाइंद्रोदेवता वसंतेनऽऋतुना षडचामानुष्टुभंलिंगोक्तदेवतꣳहोतायक्षद्वादशाप्रीः
प्रैषाअश्विसरस्वतींद्रदेवत्या अश्विनौछागस्यसप्तलिंगोक्तदेवताःप्रैषाः वनस्पतिमभियूपोऽग्निꣳस्विष्ट-
कृदग्निर्देवंबर्हिरेकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याऽअग्निमद्यसूक्तवाकप्रैषोलिंगोक्तदेवतो-
लिंगोक्तदेवतः ॥ ४० ॥ इति० संहितायां एकविंशोऽध्यायः ॥ २१ ॥ इति सर्वानुक्रमणिकायां

---

१ इंद्र. २ तस्विष्टꣳकृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयोऽध्यायः ॥ २ ॥ ॐअथाश्वमेधश्चतुरोऽध्यायान्प्रजापतिरपश्यत् तेजोसिसौवर्णं निष्क्रमिमाम-
गृभ्णन्संवत्सरो यज्ञपुरुषस्त्रिष्टुभमभिधालिंगोक्तानि योऽअर्वन्तंगायत्र्यर्द्धेनाश्वस्तुतिः परोर्द्धेलिंगो-
क्ताऽग्नयेलिंगोक्तान्येव हिंकारायेत्यश्वस्यैकोन्नपंचाशच्चेष्टितानि हिरण्यपाणिंपंचर्च्चꣳसावित्रं गायत्र-
माद्यां मेधातिथिरग्निꣳस्तोमेनाग्नेयंतृचंगायत्रꣳसुतंभरोविश्वामित्रोविरूपोयथासंख्यमजीजनोहि-
पावमानींकृतिंपिपीलिकमध्यामनुष्टुभं त्र्यरुणत्रसद्दस्यूर्बिभूरश्वदैवतं देवादैवमिहरातिराग्नेयानि
चत्वारि कायौद्रृभणानिलिंगोक्तान्याब्रह्मलिंगोक्तान्येवाध्यायात् ॥ १ ॥ इति० संहितायां द्वाविंशो-
ऽध्यायः ॥ २२ ॥ प्रजापतये प्राजापत्यम् यस्ते देवं यः प्राणतस्त्रिष्टुप्कायी हिरण्यगर्भस्य युञ्जन्ति-
मधुच्छन्दाआदित्यदेवत्यांगायत्रीं युंजंत्यस्याश्वस्तुतिर्यद्वातोबृहतीमौ वसवस्त्वालिंगोक्तानिलाजीं ३
नश्वदेवत्यंकःस्विच्चतस्रोऽनुष्टुभःप्रश्नप्रतिप्रश्नभूताब्रह्मोद्ये होतुर्ब्रह्मणश्चवायुष्ट्वा लिंगोक्तानि सꣳशित-
स्तिस्रोश्वदेवत्याअनुष्टुब्विराड्त्रिष्टुभोऽग्निः पशुराश्वानित्रीण्यंबेऽनुष्टुबश्वस्तुतिर्गणानांत्वाचत्वारि-
लिंगोक्तानि ॥ २ ॥ उत्सक्त्थ्यागायत्र्याश्री येकादशर्च्चमानुष्टुभं द्वितीयातूपरिष्टाद्बृहत्यध्वर्य्वादीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमार्य्यादिभिरश्लीलभाषणं ताऽएवदेवताः दधिक्राव्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभ-
माश्वींगायत्रीऽषडृचमाश्वमुष्णिगाद्याश्चतस्रोनुष्टुभोंऽत्यात्रिष्टुप्कस्त्वाषडृचमाश्वमाद्यागायत्रीपंचा
नुष्टुभः कःस्विदष्टादशर्च्चं ब्रह्मोद्यꣳहोत्रादीनां प्रश्नप्रतिप्रश्नभूतमाद्याश्चतस्रोनुष्टुभः कास्विदाद्याश्च-
तस्रोनुष्टुभः कास्विदाद्याश्चतस्रश्चांत्यादशात्रिष्टुभः सुभूरनुष्टुब्लिंगोक्तदेवताहोतायक्षत्प्राजापत्यः प्रैष-
प्रजापतेर्हिरण्यगर्भः प्राजापत्यांत्रैष्टुभम् ॥ ३ ॥ इति० संहितायां त्रयोविंशोऽध्यायः ॥ २३ ॥ अश्व-
स्तूपर इत्यादयः पशवोऽध्यायेनोक्ता देवतावापर्यग्यास्तथारोहितादयोगुणयुक्ताऽआरण्याश्च कपिंज-
लादयऽआध्यायात् शादंदद्भिरित्यादित्वगित्येतदंतं द्रव्यदैवतमुक्तम् अश्वस्तूपरोब्राह्मणोऽध्यायः॥४॥
इति० संहितायां चतुर्विंशोऽध्यायः ॥ २४ ॥ शादंदद्भिस्त्वचांतश्चजुंबकायवारुणीं द्विपदां मुंडिभ
ओदन्यएषा चाघनाशन्यंतर्जले यस्येमे कार्ष्यौत्रिष्टुभौ हिरण्यगर्भःप्राजापत्यऽआनोदशर्च्चं जागतं
वैश्वदेवं गोतमःस्वस्तिनो विराट्स्थाना भद्रंकर्णेभिस्तृचं त्रैष्टुभं मानोश्वस्तोमीयंदीर्घतमास्त्रैष्टुभं-
द्वाविꣳशत्यृचमश्वस्तुतिस्तृतीयाषष्ठ्यौ जगत्याविमानुद्वैपदं वैश्वदेवं तृचं भौवनआप्त्यो वा साधन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भौवनो वा ॥ ५ ॥ इति० संहितायां पञ्चविंशोऽध्यायः ॥ २५ ॥ अग्निश्चसप्तलिंगोक्तानिप्रियोदेवानां लौगाक्षिरनुष्टुभमनवसानां बृहस्पतेगृत्समदोब्राह्मींत्रिष्टुभमिंद्रगोमन्नैंद्र्यौगायत्र्यौरम्याक्षिर्ऋतावानं प्रादुराक्षिर्वैश्वानरीयांवैश्वानरस्य त्रिष्टुभं कुत्सोग्निर्ऋषिराग्नेयीं गायत्रीं वसिष्ठभरद्वाजौमहाँ२ ऽइंद्रो माहेंद्रींवसिष्ठस्तंव ऐंद्रींपथ्याबृहतींनोधागोतमोयद्वाहिष्ठंवसूयवआग्नेयीमनुष्टुभमेहिभरद्वाजोगायत्री मृतवस्तेबृहतीत्युपह्वरेवत्सो गायत्रीं ॥ ६ ॥ उच्चाते गायत्रं तृचꣳसौम्यमामहीयवोनुवीरैर्मुद्गलो यज्ञपुरुषस्त्रिष्टुभमग्नेपत्नीर्मेधातिथिराग्नेयीं गायत्रीमभियज्ञंतृचमृतुदैवतं मेधातिथिस्तवायमैंद्रीत्रिष्टुभंविश्वामित्रोऽमेवनोजगतींगृत्समदःस्वादिष्ठया मधुच्छंदाः सौम्यावनुक्तानांगायत्रम् ॥ ७ ॥ इति० संहितायां षड्विंशोऽध्यायः ॥ २६ ॥ समास्त्वाग्निकोध्यायः प्रजापतेरार्षꣳसामिधेन्यो नवाग्नेय्यस्त्रिष्टुभोऽग्निनादृष्टाऽअग्निर्ऋषिः कर्मांगभूतमग्निꣳस्तौत्यूर्ध्वाद्वादशर्चमाप्रियमौष्णिहं विषमपदं प्राजापत्यमाग्नेयमग्निरपश्यदग्निर्हिप्रजापतित्वेन संस्तूयते तेन प्राजापत्यम् ॥ ८ ॥ पीवोऽअन्ना द्वे वायव्ये त्रिष्टुभौवसिष्ठऽआपोहद्वे प्राजापत्ये हिरण्यगर्भः प्राजापत्यः प्रयाभिर्द्वे वायव्ये वसिष्ठोनियुत्वान्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यव्याः षड्वायोशुक्रोऽनुष्टुबेकया च त्रिष्टुवंत्यागायत्र्यो नियुत्वान्वायोयेंगृत्समदोवायोशुक्रः पुरुमीढा-
जमीढौ तवद्वायोव्यश्वऽआङ्गिरसोभित्वा वसिष्ठऐंद्रंप्रगाथं प्रथमाबृहती द्वितीयासतोबृहती त्वामि-
देवꣳशंयुर्बार्हस्पत्यः कयानऐंद्रं तृचं गायत्रं वामदेवोंऽत्यातु पादनिचृद्यज्ञायज्ञावऽऊर्जोनपातꣳशंयुः
पाहिनोगर्भः प्रागाथएतं तृचं प्रागाथमाग्नेयंद्वेबृहत्यौ तृतीयासतोबृहती संवत्सरोऽस्याग्नेयम् ॥ ९ ॥
इति० संहितायां सप्तविंशोऽध्यायः ॥ २७ ॥ इन्द्रमिडः सौत्रामणिकोऽध्यायः एकादशप्रयाजप्रैषा-
ऐंद्रा आप्रीदेवत्या आद्येऽनुवाके देवंबर्हिरनुयाजप्रैषाऐंद्राएकदशैवाग्निमद्यैन्द्रः सूक्तवाकप्रैषस्त्वामद्य
प्रतीक उभयत्रापि समिधानं महद्वायोधस आप्रिय एकादश प्रयाजप्रैरवास्तथैव देवंबर्हिरनुयाज-
प्रैरवाऽअग्निमद्यवायोधसः सूक्तवाकप्रैषः ॥ १० ॥ इति० संहितायां अष्टाविंशोऽध्यायः ॥ २८ ॥
समिद्धोऽअञ्जन्नाश्वमेधिकोऽध्याय आद्या आप्रीस्त्रिष्टुभएकादशाश्वस्तुतिर्बृहदुक्थोवामदेव्योददर्शा-
श्वोवासामुद्रिर्य्यदक्रंदस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभोभार्गवोजमदग्निर्ददर्शदीर्घतमाश्च समिद्धोऽअद्यद्वा-
दशाप्रीस्त्रिष्टुभोजमदग्निः ॥ ११ ॥ केतुं कृण्वन्नाग्नेयीमनिरुक्तां गायत्रीं मधुच्छन्दाः जीमूतस्येव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पायुर्भारद्वाजः संग्रामांगान्यृक्षोस्तौषीत्सन्नाहंकार्मुकं गुणमार्त्नीतूणं जगत्यर्द्धेन सारथिमर्द्धेन रश्मीन् हरीन् रथगोपायितॄन् जगत्यालिंगोक्तदेवता द्वाभ्यां त्रिष्टुबनुष्टुब्भ्यामिषुमनुष्टुभाकशां ततोहस्तघ्नं ततस्तृचौ रथदुन्दुभिदेवत्यावैन्द्रोर्द्धर्चोन्त्यः सर्वास्त्रिष्टुभोऽनुक्ता आग्नेय्यः कृष्णग्रीव इत्याद्या एकादशिन्योर्द्वयोः पशुदेवता अग्नये गायत्रायेति दश हविषोवेष्टेर्देवता ॥ १२ ॥ इति० संहितायां एकोनत्रिंशोऽध्यायः ॥ २९ ॥ देवसवितर्द्वावध्यायौ पुरुषमेधोनारायणः पुरुषोददर्श विश्वानिदेवगायत्रीॐसावित्रीॐश्यावाश्वोविभक्तारंमेधातिथिर्ब्रह्मणेब्राह्मणमिति द्वे कंडिके तपसेऽनुवाकश्च ब्राह्मणम् ॥ १३ ॥ इति० संहितायां त्रिंशोऽध्यायः ॥ ३० ॥ सहस्रशीर्षाषोडशर्चमानुष्टुभं त्रिष्टुबंत्यं-पुरुषोजगद्बीजमत्रदेवताद्भ्यः षडृचउत्तरनारायणोमंत्र आद्यास्तिस्रस्त्रिष्टुभौद्वे अनुष्टुभावंत्यात्रिष्टुप् ॥ १४ ॥ इति० संहितायां एकत्रिंशोऽध्यायः ॥ ३१ ॥ तदेवसर्वमेधोऽध्याय आत्मदैवतः सप्तमेऽहनि सर्वहोमे विनियुक्तः सर्वमेधं ब्रह्म स्वयंभ्वैक्षत तदीयं मंत्रगणं प्रवायुमच्छेत्येतस्मादाद्यद्वे अनुष्टुभौ नतस्य द्विपदागायत्री हिरण्यगर्भश्चतस्रोमामाहिꣳसीद्यस्मान्नद्वे एताः प्रतीकचोदिता ब्रह्मयज्ञेऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्येयाः सर्वत्रैवमेषोहचतस्त्रस्त्रिष्टुभ आपोहयश्चित्प्रतीकचोदिते ॥१५॥ वेगस्तत्पश्च त्रिष्टुभः सदसस्पतिं तृचेन मेधाकामो मेधां याचते प्रथमा गायत्री लिंगोक्तदेवता द्वितीयाग्नेय्यनुष्टुप्तृतीयालिंगोक्त-देवतानुष्टुबिदंमे मांत्रवर्णिक्यनुष्टुबे तयादेवेभ्यःश्रीकामोयाचते श्रियम् ॥ १६ ॥ इति० संहितायां द्वात्रिंशोऽध्यायः ॥३२॥ अस्याजरासः सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमेऽहनि पुरोरुचआग्नेय्यऽआद्ये द्वे ऐंद्रवायवस्यास्याजरासोवत्सप्रीर्हरयोधूमकेतवो विरूपोयजमानो द्वे मैत्रावरुणस्य यजमानो गोत-मोद्वे विरूपे शुक्रस्य कुत्सोयमिहमंथिनोवैश्वदेवग्रहग्रहणे त्रीणिशता विश्वामित्रऐंद्राग्नस्याग्निर्वृत्राणि भरद्वाजो वैश्वदेवस्य विश्वेभिः सोम्यंमेधातिथिरायन्मरुत्वतीययोर्द्वे आयत्पराशरः शाक्त्योऽग्नेशर्द्धा-त्रिदुहिताविश्ववारा त्वाꣳहि भरद्वाजस्त्वे अग्नेद्वे बृहत्यावादित्यस्य त्वेऽअग्ने वसिष्ठः श्रुधिप्रस्कण्व आदित्यग्रहग्रहणे विश्वेषामदितिर्वामदेवो गोतमो महोअग्नेः सावित्रस्य लुशोधानाकोऽनुक्तंगयात्रं त्रैष्टुभम् ॥ १७ ॥ इन्द्रस्तुत्युक्थ्येद्वितीयेऽहनि ऐन्द्र्यःपुरोरुचो द्वादशप्रतीकचोदिते च द्वे तिस्रश्चा-पश्चिद्वसिष्ठो गावऽउपपुरुमीढाजमीढौ यदद्य वसिष्ठऽआसुते सुनीतिरातिष्ठतं विश्वामित्रः प्रवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुचीकोबृहन्नित्रिशोकऽइंद्रेहि मधुच्छन्दाऽइन्द्रोवृत्रं विश्वामित्रः कुतस्त्वमगस्त्यऽआतद्गौरीवीतिः शाक्त्यऽइमान्ते कुत्सो जगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥ १८ ॥ सूर्यस्तुत्युक्थ्ये तृतीयेऽहनि सौर्यश्चतुर्दश पुरोरुचस्तिस्रश्च प्रतीकोक्ताः विभ्राड्बृहज्जगतीं विभ्राट्सौर्यऽउदुत्यं तिस्रः प्रस्कण्वऽआनोगस्त्यो यदद्य श्रुतकक्षः सुतकक्षौ तरणिः प्रस्कण्वस्तत्सूर्यस्य द्वे कुत्सो बण्महाँ २ द्वे जमदग्निर्बृहतीसतोबृहत्यौ श्रायंतइवनृमेधोबृहतीमद्यादेवाः कुत्सऽआकृष्णेन हिरण्यस्तूप आङ्गिरसो नाख्यातꣳसौर्यं गायत्रं त्रैष्टुभम् ॥ १९ ॥ वैश्वदेवस्तुतिश्चतुर्थेऽहनि वैश्वदेव्यः पुरोरुच एकादश षट् च प्रतीकोक्ताः प्रवावृजे वसिष्ठस्त्रिष्टुभं इन्द्रवायूबृहस्पतिंद्वे मेधातिथिरधिनः कुसीदीकाण्वोऽग्न इन्द्रप्रतिक्षत्र इन्द्राग्नीमित्रावरुणा जगतीं काश्यपोऽवत्सारोऽस्मेरुद्राः प्रगाथोर्वाचो अद्यकूर्म्मोगार्त्समदो विश्वेअद्य लुशोधानाको विश्वेदेवाः सुहोत्रोदेवेभ्योहि वामदेवो जगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥२०॥ अथाऽनारस्याधीतं मंत्रगणं अर्वाक्पितृमेधादादित्ययाज्ञवल्क्यौ ददृशतुः प्रवायुं पंचदशर्च्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते प्रवायुमृजिश्वो मित्रꣳहुवे द्वे मधुच्छन्दामित्रं लिंगोक्ता दस्रामुवाकवऽआ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्विनीं विद्यद्यैन्द्रीं कुशिको नहिस्पशं विश्वामित्रो वैश्वानरीमुग्राविघनिनैन्द्राग्नीं भरद्वाजऽउपास्मै सौमीं देवलोसितोवा येत्वा विश्वामित्रो जनिष्ठाऽउग्रो गौरिवीतिरातु वामदेवस्तृचमैन्द्रं त्वमिन्द्रै-न्द्यौनृमेधः पथ्याबृहतीसतोबृहत्यौ यज्ञोदेवानां कुत्सोऽदब्धेभिः सावित्रीं जगतीं भरद्वाजः ॥ २१ ॥ प्रवीरयापंचदशर्च्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते प्रवीरया वसिष्ठोवायव्यां काव्ययोराजानेषु दक्ष-स्तिरश्चीनः परमेष्ठीं प्रजापतिर्भाववृत्तं तृचमारोदसीं जगतीं विश्वामित्र उक्थेभिर्वृत्रहंतमा वसिष्ठ-ऽउपनः सुहोत्रो वैश्वदेवीं ब्रह्माणिमेऽगस्त्यो द्वे इंद्रमरुत्संवादे तदिदाथर्वणो बृहद्दिवऽइमाऽउत्वा द्वे बृहत्यौ मेधातिथिरयꣳ सहस्रं मेधातिथिः सतोबृहतीम् ॥ २२ ॥ आनस्त्रयोदशर्च्चः पुरोरुग्गणश्चतु-र्ऋचं प्रतीकचोदितं चानोवायव्यां जमदग्निरिन्द्रवायूसुसन्दृशैन्द्रवायव्यान्तापसऋधगित्थामैत्राव-रुणीं जमदग्निरायातमाश्विनीं वसिष्ठः प्रैतु वैश्वदेवींकण्वश्चन्द्रमाः अप्स्वैन्द्रीमारुतीपरिणामवादिनीं त्रितआस्यो देवंदेवंवो मनुर्वैवस्वतो वैश्वदेवीं दिविपृष्ठोमृधऐन्द्रऽइन्द्राग्नीऽअपात्सुहोत्रोदेवासोहिम-नुरपाधमद्वेनृमेधोस्येन्मेधातिथिर्दशम्येकादश्यन्त्याश्चसतोबृहत्यः शेषाबृहत्यः शेषाबृहत्यः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति० संहितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ इति सर्वानुक्रमणिकायां तृतीयोऽध्यायः ॥ ३ ॥ यज्जाग्रतः षड्ऋचं मानसं त्रैष्टुभꣳशिवसंकल्पः पितुन्नूष्णिहमगस्त्योन्नस्तुतिमन्विच्चतुर्ऋचमानुष्टुभं द्वयोरनुमितिर्द्वयोः सिनीवालीसरस्वत्यौ सिनीवालीपृथुष्टुके द्वे गृत्समदस्त्वमग्नेद्वे आग्नेय्यौ जगत्यौ हिरण्यस्तूप आंगिरसः उत्तानायां द्वे देवश्रवादेववातश्च भारतावाद्यात्रिष्टुब्द्वितीयानुष्टुप्प्रमन्महे नोधाद्यृचमैन्द्रं त्रैष्टुभमिच्छन्तित्वा द्यृचमैन्द्रंत्रैष्टुभमेव देवश्रवादेववातश्च भारतौ ॥ १ ॥ अषाढं युत्सुगोतमश्चतुर्ऋचं त्रैष्टुभꣳसौम्यमष्टौव्यख्यच्चतुर्ऋचं त्रैष्टुभꣳसावित्रमांगिरसोहिरण्यस्तूपो द्वितीयाजगत्युभापिबतमाश्विनं तृचमुभापिबतं प्रस्कण्वो गायत्रीमप्नस्वतीमश्विना त्रिष्टुभौ कुत्स अरात्रि पथ्याबृहतीऔरात्रिन्देवत्यां कशिपाभरद्वाजदुहितोषस्तदुषस्यापरोष्णिहं गोतमः प्रातरग्निं वसिष्ठः सप्तर्चमाद्याजगती बहुदेवत्या पंचभगदेवत्यास्त्रिष्टुभोंत्योषस्याः ॥ २ ॥ पूषन्तव सुहोत्रः पथस्पथः परिपतिमृजिश्वैतेपौष्ण्यौ गायत्रीत्रिष्टुभौ त्रीणिपदा वैष्णव्यौ गायत्र्यौ मेधातिथिर्घृतवतीभुवनानां भरद्वाजो द्यावापृथिव्यां जगतीं येनोर्लिंगोक्तदेवतां त्रिष्टुभं विहव्याऽआनासत्या हिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यस्तूप आश्विनीमेषवोमारुतीं त्रिष्टुभमगस्त्यः सहस्तोमा ऋषिस्तृष्टिप्रतिपादिका त्रिष्टुभं यज्ञः प्राजापत्य आयुष्यं वर्च्चस्यं तृचं दक्षउष्णिक्शक्करीत्रिष्टुभोहिरण्यस्तुतिरुतनऋत्विजो बहुदेवत्या-त्रिष्टुभमिमागिरः कूर्मोगार्त्समदआदित्यदेवत्यां त्रिष्टुभꣳसप्तऋषयोऽध्यात्मवादिनी जगत्युत्तिष्ठं-तृचोब्रह्मणस्पत्य आद्ये बृहत्यौ कण्वोघोरोन्त्यांत्रिष्टुभं गृत्समदोयइमा चतुर्ऋचं प्रतीकोक्तम् ॥ ३ ॥ इति० संहितायां चतुस्त्रिंशोऽध्यायः ॥३४॥ अपेतोऽध्यायः पित्र्यआदित्यस्य देवानां वाआद्यागायत्री परंषजुःसवितातेगायत्री वायुः पुनातु चत्वारि लिंगोक्तानि सवितातेगायत्री परंमृत्यो संकसुकस्त्रि-ष्टुभं मृत्युदेवत्याꣳशंवातोऽनुष्टुप्बृहत्यौ वैश्वदेव्यावश्मन्वती सुचीकस्त्रिष्टुभं वैश्वदेवीमपाघं लिंगो-क्तदेवतामनुष्टुभꣳशुनःशेपोदुःस्वप्ननाशनीमनड्वाहमानडुह्यनुष्टुप् इमंजीवेभ्यः संकसुकोमृत्युदेवत्यां त्रिष्टुभमायुष्मानग्नआग्नेयीं त्रिष्टुभं वैखानसःपरीमेऽनुष्टुभमैंद्रीं भारद्वाजः शिरिंबिहः क्रव्यादमग्निं त्रिष्टुभमाग्नेयीं दमनो वहवपां जातवेदसी त्रिष्टुप् स्योनापृथिवी मेधातिथिः पार्थिवीं गायत्रीमस्मा-त्वमाग्नेयी गायत्र्यनिरुक्ता ॥ ४ ॥ इति० संहितायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ ऋचंवाचं पंचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायीं द्ध्यङ्ङाथर्वणोददर्शाग्निकाश्वमेधिकवर्ज्जमाद्योऽध्यायः शान्त्यर्थोवैश्वदेव आद्यानि यजूꣳषि यन्मे बार्हस्पत्या पंक्तिः कयात्वमैंद्र्यनिरुक्ता गायत्रींद्रोविश्वस्यविराड् द्विपदा शन्नोद्वे अनुष्टुभावहानि द्विपदागायत्री शन्नऽइन्द्राग्नी त्रिष्टुब् गायत्र्यावन्त्याशीर्द्यौः शांतिर्यजूꣳषि नमस्ते अस्त्वनुष्टुभौ तच्चक्षुः पुरऽउष्णिक्सौरी ॥ ५ ॥ इति० संहितायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ आददेनारिरस्यभ्रिदैवतं देवीद्यावापृथिव्यं देव्योवक्र्यो वल्मीकवपेयत्यग्रेवराहविहतामिंद्रस्यौजआदाराः प्रैतु मखस्याश्वस्यर्ज्जवेषमायदेवस्त्वार्च्चिरसि घर्मदेवत्यानि योघर्मःसआदित्योयएषतपत्यनाधृष्टापुरस्तात्सप्तपार्थिवानि यजमानाशीर्मधुप्राणदेवत्यानि गर्भोदेवानामवकाशा मामाहिꣳसीरित्येतदन्ताघर्मदेवत्या धर्तादिवऽऊर्ध्वबृहत्यपश्यङ्गोपां त्रिष्टुभं दीर्घतमाह्रदेत्वा परोष्णिक्त्वष्ट्रमन्तः पत्न्याशीरहःकेतुना यजुषी घर्मदेवत्ये ॥ ६ ॥ इति० संहितायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ आददेदित्यै रज्जुः इडऽएहि गौर्यस्ते त्रिष्टुभं दीर्घतमाः इन्द्राश्विना वैश्वदेवानि समुद्रायत्वा वातनामानि स्वाहाघर्मायघर्मदेवत्ये विश्वाऽआशा आश्विन्यनुष्टुब् दिविधा घर्मदेवत्यमाश्विनाघर्ममुष्णिगपातां ककुबमेन्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मेखरः स्वाहापूष्णे सप्तलिंगोक्तदेवतानिस्वाहासंपयोदेवत्यं मधुहुतं घर्म्मो भीमं गायत्रीबृहत्याव-
नवसाने अतिशक्करी वाग्नेयी समस्ता त्र्यवसाना यातेघर्मक्षत्रस्य बृहती चतुःस्त्रक्तिर्महाबृहती
घर्मैतदनुष्टुबचिक्रदत्परोष्णिक् यावतीद्यावापृथिवी दधिघर्मो मयित्यत्पंक्तिर्यजमानाशीः पयसो
रेतोगायत्र्यनवसाना विषःसंवृग्दधिघर्मोऽनुक्तं घर्मदैवतम् ॥ ७ ॥ इति० संहितायां अष्टात्रिंशो-
ऽध्यायः ॥ ३८ ॥ स्वाहाप्राणेब्भ्यो मांत्रवर्णिक्योदेवतामनसःकाममनुष्टुब्यजमानाशीः श्रीर्देवता
प्रजापतिःसंभ्रियमाणो यथाकालं प्रायश्चित्तदेवताः सविताप्रथमेहन्प्रत्यहं क्रमेणोग्रश्च मारुती
गायत्री विमुखाख्यो मंत्रोऽग्नौ विनियुक्तस्तस्मादाग्निकऽएवास्य ऋषिः परमेष्ठी प्राजापत्योवाग्निर्हृद-
येनाश्वमेधिकानि त्रीणि तंत्रोक्त एव ऋषिर्लोमब्भ्यःस्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिंशत्
॥ ८ ॥ इति० संहितायां एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ ईशावास्यमात्मदेवत्य आनुष्टुभोऽध्यायः
अनेजदेकं त्रिष्टुप् सपरि जगती वायुरनिलं यजुषि ॐ ३ मिति परमाक्षरस्य योगिनामालम्ब-
भूतस्य परस्य ब्रह्मणः प्रणवाख्यास्यास्थूलादिगुणयुक्तस्य ब्रह्म ऋषिछन्दोगायत्रं परमात्मा देवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मारंभे विरामे च यागहोमादिषु शांतिपुष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिषु सर्वेषु विनियोगोऽस्यक्रतोत्रिभिर्ऋग्यजुर्भिरंते यज्ञान्योगी स्मारयत्यग्नेनयान्तेनमस्कारोक्तिर्हिरण्मयेनादित्योपासनम् ॐ ३ मिति नामनिर्देशो ब्रह्मणः खंब्रह्मेत्याकाशरूपमन्ते ब्रह्म ध्यायेत् ॥ ९ ॥ ॥ ४० ॥ अथातश्छन्दोदेवता गायत्र्या अग्निरुष्णिहः सवितानुष्टुभः सोमोबृहत्याबृहस्पतिः पंक्तेर्वरुणस्त्रिष्टुभऽइन्द्रोजगत्या विश्वेदेवाविराजोमित्रः स्वराजोरुणोतिच्छन्दसः प्रजापतिर्विच्छन्दसो वायुर्द्विपदायाः पुरुषऽएकपदाया ब्रह्मा सर्वा ऋच आग्नेय्यः सर्वाणि यजूꣳषि वायव्यानि सर्वाणि सामानि सौराणि सर्वाणि ब्राह्मणानि च स्वाहाकारस्याग्निर्वषट्कारस्य विश्वेदेवाः कर्मारंभे मंत्राणां देवता वेदितव्याः संन्यस्यमनसिदेवतां ततो हविर्हूयते देवतामविज्ञाय योजुहोति देवास्तस्य हविर्नजुषन्ते स्वाध्यायमपियोऽधीते मंत्रदेवज्ञः सोऽमुष्मिंल्लोके देवैरपीड्यते तस्माच्च देवता वेद्या मंत्रे मंत्रे प्रयत्नतो मंत्राणां देवताज्ञानान्मंत्रार्थमधिगच्छति मंत्रार्थज्ञानात्तु विधूतपाप्मा नाकमभ्येति न हि कश्चिदविज्ञाय याथातथ्येन देवताः श्रौतानां कर्मणां विप्रः स्मार्तानां चाश्नुते फलम् ॥ १० ॥ अना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिष्टमध्वरादौ सर्वांतकर्मणी परिभाषितं मंत्रगणं वक्ष्यामः सर्वमाग्नेयं गायत्रं गौतमी यꣳसर्वꣳसा-
वित्रमौष्णिहंभारद्वाजीयꣳसर्वꣳसौम्यमानुष्टुभमाथर्वणिकꣳसर्वं बार्हस्पत्यं बार्हतमाङ्गिरसꣳसर्वं
वारुणं पांक्तमालंबायनीयꣳ सर्वमैंद्रं त्रैष्टुभं याज्ञवल्कीयꣳसर्वमादित्यदैवतं जागतं कौत्सम् ॥ ११ ॥
ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामो दीक्षायां भृगुरग्नाविष्णूगायत्री प्रायणीय आंगिरसोऽदितिरु-
ष्णिक्त्रये विश्वामित्रः सोमोऽनुष्टुबातिथ्ये वसिष्ठो विष्णुर्बृहती प्रवर्ग्ये कश्यप आदित्यपङ्क्तिरुप-
सत्स्वात्रेयउपसद्देवता त्रिष्टुबग्नीषोमीयेऽगस्त्योऽग्नीषोमौ जगती प्रायणीयेऽतिरात्र आग्निवेश्योऽहो-
रात्रे अतिजगतीचतुर्विꣳशत्यहेसौकरायणः संवत्सरः शक्वर्यभिप्लवे षडहे सौपर्णोऽर्द्धमासामासाश्चा-
तिशक्करीपृष्ठ्येषडहे सायकायनऋतवोष्टिरभिजितिप्रियघृतोग्निरत्यष्टिः स्वरसामसु सरस्वत्यापोधृति-
र्विषुवति रौहिणायन आदित्योतिधृतिर्विश्वजिति सौभरऽइंद्रः कृतिर्गोआयुषो बाष्कलिर्मित्रावरुणौ
प्रकृतिर्दशरात्र आचार्यो विश्वेदेवा आकृतिर्द्वादशरात्रिके पृष्ठ्ये षडहे भाल्लवेयो दिशोविकृतिश्छ-
न्दोमेषु शौल्वायन इमे लोकाः संकृतिर्दशमेहनि पराशरःसंवत्सरोभिकृतिर्महाव्रते शैलिनः प्रजा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिरुत्कृतिरुदयनीयेतिरात्रे भौवायनो वायुश्छन्दाᳬंसि सर्वाणि ॥ १२ ॥ ऋषिभिरुपलक्षितं वाक्यं ऋषयश्छंदोभिरुपलक्षिता देवता मंत्रवर्णादृग्यजुषयोर्विनियोगतश्च विज्ञेयाः सर्वमेतच्छन्दोदैवतमार्षं च विज्ञाय यत्किंचिज्जपहोमादिकरोति तस्य फलमश्नुते ब्रह्मयज्ञारंभे यथाविधि स्नात्वा छन्दःपुरुषमेनोनिर्णोदनᳬशरीरं न्यसेत्तिर्य्यग्बिलश्चमसऊर्द्ध्वबुध्नस्तस्याक्षिणी गोतमभरद्वाजौ श्रोत्रे विश्वामित्रजमदग्नी नासिके वसिष्ठकश्यपौ वागत्रिर्गायत्रीछंदोऽग्निर्देवताᳬंशिरसि विन्यसेदेवमेवोष्णिहᳬसवितारं ग्रीवास्वनूकेबृहतीं बृहस्पतिं बाह्वोर्बृहद्रथन्तरे द्यावापृथिवीमध्येत्रिष्टुभमिन्द्रᳬश्रोण्योर्जगतीमादित्यं मेंढ्रेऽतिछंदसं प्रजापतिं पायौ यज्ञायज्ञियं वैश्वानरमूर्वोरनुष्टुभं विश्वान्देवानष्ठीवतोः पंक्ति मरुतः पादयोर्द्विपदाविष्णुं प्राणेषु विछन्दसं वायुं न्यूनातिरिक्तेष्वङ्गेषु न्यूनाक्षरं छन्द आपोदेवतेत्येवᳬसर्वांगेषु योजयित्वा वेदमयः संपद्यते शापानुग्रहसमर्थो भवति ब्राह्मं तेजश्च वर्द्धते न कुतश्चिद्भयं विन्दते ऋङ्मयो यजुर्मयः साममयस्तेजोमयो ब्रह्ममयोऽमृतमयः संभूय ब्रह्मैवाभ्येति तस्मादेवं नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्रेऽनुब्रूयादनेनाधीतेन चांद्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यणाब्दफलमवाप्नोत्यनेन च सम्यग्ज्ञातेन ब्रह्मणः सायुज्यꣳसलोकतामाप्नोत्याप्नोति ॥ १३ ॥ इति सर्वानुक्रमणिकायां चतुर्थोऽध्यायः ॥ ४ ॥ ॥ अथ छन्दाꣳसि गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगती शक्वर्यतिशक्वर्यष्ट्यत्यष्टीधृत्यतिधृतयः कृतिप्रकृत्याकृतिर्विकृतिसंकृत्यभिकृत्युकृतयश्चतुर्विꣳशत्यक्षरादीनि चतुरुत्तराण्यूनाधिकेनैकेननिचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेदाद्ये तु सप्तवर्गे पादविशेषान् संज्ञाविशेषांस्ताननुक्रामन्त एवोदाहरिष्यामो विराड्रूपाविराट्स्थानाश्च बहूनामपि त्रिष्टुभ एवेत्युद्देशस्तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति संज्ञा अनादेशेष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ १ ॥ प्रथमं छन्दस्त्रिपदा-गायत्री पञ्चकाश्चत्वारषट्कश्चैकश्चतुर्थश्चतुष्को वा पदपंक्तिः षट्सप्तैकादशा उष्णिग्गर्भास्त्रयः सप्तकाः पादनिचृन्मध्यमः षट्कश्चेदतिनिचृद्दशकश्चेद्यवमध्या यस्यास्तु षट्सप्तकाष्टकाः सा वर्द्धमाना विपरीता प्रतिष्ठा द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी ॥ २ ॥ द्वितीयमुष्णिक्त्रिपदान्त्यो द्वादशक आद्यश्चेत्पुरउष्णिङ्मध्यमश्चेत्ककुप्त्रैष्टुभजागतचतुष्काः ककुभ्यंकुशिरैकादशिनोःपरःषट्कस्तनुशिरा मध्ये

सं. ७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत्पिपीलिकमध्याद्यःपंचकस्त्रयोऽष्टका अनुष्टुब्गर्भाश्चतुःसप्तकोष्णिगेव ॥ ३ ॥ तृतीयमनुष्टुप्चतुष्पदाथ पञ्चपञ्चकाः षट्कश्चैकौ महापदपंक्तिर्जागतावष्टकश्च कृतिर्मध्ये चेदष्टकः पिपीलिकमध्या नवकयोर्मध्ये जागतः कविराणनववैराजत्रयोदशैर्नष्टुरूपादेकास्त्रयो विराडेकादशका वा ॥ ४ ॥ चतुर्थं बृहतीतृतीयो द्वादशक आद्यश्चेत्पुरस्ताद्बृहती द्वितीयश्चेन्न्यंकुसारिण्युरोबृहती स्कन्धो ग्रीवीवान्त्यश्चेदुपरिष्टाद्बृहत्यष्टिनोर्मध्ये दशकौ विष्टारबृहती त्रिजागतोर्द्ध्वबृहती त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या नवकाष्टकैकादशाष्टिनो विषमपदाचतुर्नवका बृहत्येव ॥ ५ ॥ पञ्चमं पंक्तिः पञ्चपदाऽथ चतुष्पदाविराट्दशका अयुजौ जागतौ सतो बृहती युजौ चेद्विपरीता आद्यौ चेद्विष्टारपंक्तिरन्त्यौ चेदास्तारपंक्तिराद्यान्त्यौ चेत्सँस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपंक्तिः ॥६॥ षष्ठं त्रिष्टुप् त्रैष्टुभपदा द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुब्वैराजौ जागतौ चाभिसारिणी नवकौ वैराजस्त्रिष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्चाविराट्स्थानैकादशिनस्त्रयोऽष्टकश्च विराड्रूपा द्वादशि-

१ प्रस्तार.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्त्रयोष्टकश्च ज्योतिष्मती यतोऽष्टकस्ततो ज्योतिश्चत्वारोऽष्टका जागतश्च महाबृहतीमध्ये जागतश्चे-
द्यवमध्याद्यौदशकावष्टकास्त्रयः पंक्त्युत्तरा विराट्पूर्वा वा ॥ ७ ॥ सप्तमं जगती जागतपदाष्टिनस्त्रयः
स्त्रौ च द्वौ महासतो बृहत्यष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापंक्तिर्माध्यन्दिनीये
वाजसनेयके सर्वानुक्रमणिकैषा कृतिर्भगवतः कात्यायनस्यैषा कृतिर्भगवतः कात्यायनस्य ॥ ८ ॥
इति सर्वानुक्रमणिकायां पञ्चमोऽध्यायः ॥ ५ ॥ कंडिका संख्या ॥ १२४ ॥ समाप्ता ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीशुक्लयजुर्वेदिनां पारस्करगृह्यसूत्रम् ॥

॥ श्रीगणेशाय नमः । अथातो गृह्यस्थालीपाकानां कर्म परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः सँस्कृत्यार्थवत्प्रोक्ष्य निरुप्याऽऽज्यमधिश्रित्य पर्यग्नि कुर्यात्स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः ॥ १ ॥ आवसथ्याधानं दारकाले दायाद्यकाल एकेषां वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वमरणिप्रदानमेके पञ्चमहायज्ञा इति श्रुतेरग्न्याधेय-

१ "छन्दोवत्सूत्राणि" इत्युच्चारणे याजुषां नियमः । ये ये धर्माश्छन्दसि ते सर्वे सूत्रेष्वपि ज्ञेयाः । अतोऽध्ययनवेलायामेव तत्र तत्र गुरोः सकाशाद् यकारोच्चारणं खकारोच्चारणं द्वित्त्वादिकञ्चावगन्तव्यं तज्ज्ञानेच्छुना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवताभ्यः स्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाज्याऽऽहुतीर्जुहोति त्वन्नोऽअग्ने, स त्वन्नोअग्न इमं मे वरुण, तत्त्वायामि, ये ते शतमयाश्चाग्नऽउदुत्तमं, भवतन्न इत्यष्टौ पुरस्तादेवमुपरिष्टात्स्थाली-पाकस्याज्याधेयदेवताभ्यो हुत्वा जुहोति स्विष्टकृते चायास्यग्नेर्वषट्कृतं यत्कर्मणाऽत्यरीरिचं देवा गातुविद इति बर्हिर्हुत्वा प्राश्नाति ततो ब्राह्मणभोजनम् ॥ २ ॥ षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति प्रतिसंवत्सरानर्हयेयुर्यक्ष्यमाणास्त्वृत्विज आसनमाहार्याह साधु भवाना-स्तामर्चयिष्यामो भवन्तमित्याहरन्ति विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृत-मपिहितङ्काꣳस्ये काꣳस्येनान्यस्त्रिस्त्रिः प्राह विष्टरादीनि विष्टरं प्रतिगृह्णाति वर्ष्मोस्मि समानाना-मुद्यतामिव सूर्यः ॥ इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपविशति पादयोरन्यं विष्टर आसीनाय सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमं विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इत्यर्घं प्रतिगृह्णात्यापः स्थ युष्माभिः सर्वान्कामा-नवाप्नवानीति निनयन्नभिमन्त्रयते, समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टा अस्माकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरा मा परासेचिमत्पय इत्याचामत्यामागन्यशसा सꣳसृज वर्चसा ॥ तं मा कुरु प्रियं प्रजानाम-
धिपतिं पशूनामरिष्टिन्तनूनामिति मित्रस्य त्वेति मधुपर्कं प्रतीक्षते देवस्य त्वेति प्रतिगृह्णाति सव्ये
पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते
निष्कृन्तामीत्यनामिकाङ्गुष्ठेन च त्रिर्निरूक्षयति तस्य त्रिः प्राश्नाति यन्मधुनो मधव्यं परमꣳरूपम-
न्नाद्यम् ॥ तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति मधुमती-
भिर्वा प्रत्यृचं पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात्सर्वं वा प्राश्नीयात्प्राग्वा सञ्चरे
निनयेदाचम्य प्राणान्सम्मृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वो-
रोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहेत्याचान्तोदकाय शासमादाय गौरिति त्रिः प्राह प्रत्याह
माता रुद्राणां दुहिता वसूनाꣳस्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय
मागामनागामदितिं वधिष्ट ॥ मम चामुष्य च पाप्मानꣳ हनोमीति यद्यालभेताथ यद्युत्सिसृक्षे-
न्मम चामुष्य च पाप्माहत ओमुत्सृजत तृणान्यत्त्विति ब्रूयान्न त्वेवामाꣳ सोऽर्घस्यादधियज्ञम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिविवाहं कुरुतेत्येव ब्रूयाद्यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृताघ्र्या एवैनं याजयेयुर्नाकृताघ्र्या-
इति श्रुतेः ॥ ३ ॥ चत्वारः पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति पञ्चसु बहिःशालायां विवाहे
चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इत्युपलिप्त उद्धृतावोक्षितेऽग्निमुपसमाधाय निर्मन्थ्य-
मेके विवाह उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्त्रिषु त्रिषूत्तरादिषु स्वातौ
मृगशिरसि रोहिण्यां वा तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य सर्वेषाꣳशूद्रा-
मप्येके मन्त्रवर्जमथैनां वासः परिधापयति जराङ्गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा ॥
शतं च जीव शरदः सुवर्चा रयिञ्च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वास इत्यथोत्तरीयं
या अकृन्तन्नवयं या अतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वायु-
ष्मतीदं परिधत्स्व वास इत्यथैनौ समञ्जयति समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ ॥ सम्मा-
तरिश्वा सन्धाता समुदेष्ट्री दधातु नाविति पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति यदैषि मनसा
दूरं दिशोऽनु पवमानो वा ॥ हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसावित्यथैनौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समीक्षयत्यघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ॥ वीरसूर्देवकामा स्योनाशन्नो भव द्विपदे शं चतुष्पदे ॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ॥ तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥ सोमोऽदद्गन्धर्वाय गन्धर्वोऽददग्नये ॥ रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥ सा नः पूषा शिवतमामेरय सा न ऊरू उशती विहर ॥ यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या इति ॥ ४ ॥ प्रदक्षिणमग्निं पर्याणीयैके पश्चादग्नेस्तेजनीङ्कटं वा दक्षिणपादेन प्रहृत्योपविशत्यन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतन्नित्यꣳ सर्वत्र प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतदावापस्थानं विवाहे राष्ट्रभृत इच्छञ्जयाभ्यातानाँश्च जानन्येन कर्मणेर्छेदिति वचनाच्चित्तश्च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्करीश्च दर्शश्च पौर्णमासं च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु ॥ तस्मै विशः समनमन्तः सर्वाः स उग्रः स इहव्यो बभूव स्वाहेत्यग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाꣳसमुद्रः स्रोत्या-
नामन्नꣳसाम्राज्यानामधिपति तन्मावतु सोम ओषधीनाꣳ सविता प्रसवानाꣳ रुद्रः पशूनां त्वष्टा
रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेऽवरे ततास्त-
तामहाः ॥ इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देव-
हूत्याꣳ स्वाहेति सर्वत्रानुषजत्यग्निरैतु प्रथमो देवतानाꣳ सोस्यै प्रजां मुञ्चतु मृत्युपाशात् ॥
तदयꣳराजा वरुणोऽनुमन्यतां येथयꣳ स्त्री पौत्रमघन्नरोदात्स्वाहा ॥ इमामग्निस्त्रायतां गार्हपत्यः
प्रजामस्यै नयतु दीर्घमायुः ॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यता-
मियꣳ स्वाहा ॥ स्वस्ति नो अग्ने दिवा पृथिव्या विश्वानि धेह्ययथा यजत्र ॥ यदस्यां महि दिवि
जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा ॥ सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये
ह्यजरन्न आयुः ॥ अपैतु मृत्युरमृतम्म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहेति परं मृत्यविति
चैके प्राशनान्ते ॥ ५ ॥ कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति तां जुहोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सꣳहतेन तिष्ठत्यर्यमणं देवङ्कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ॥ इयन्नार्युपब्रूते लाजानावपन्तिका ॥ आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव ॥ मम तुभ्यं च संवननं तदग्निरनुमन्यतामियꣳस्वाहेत्यथास्यै दक्षिणꣳहस्तं गृह्णाति साङ्गुष्ठं गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ॥ भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ अमोहमस्मि सा त्वꣳसात्वमस्यमोअहम् ॥ सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वम्। तावेहि विवहावहै सह रेतो दधावहै ॥ प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून् ॥ ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ ॥ पश्येम शरदः शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतमिति ॥ ६ ॥ अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेनारोहेममश्मानमश्मेव त्वꣳस्थिरा भव ॥ अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायत इत्यथ गाथां गायति सरस्वति प्रेदमव सुभगे वाजिनीवती ॥ यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः ॥ यस्यां भूतꣳसमभवद्यस्यां विश्वमिदं जगत् ॥ तामद्य गाथां गास्यामि या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीणामुत्तमं यश इत्यथ परिक्रामतस्तुभ्यमग्रे पर्यवहं सूर्यां वहतु ना सह ॥ पुनः पतिभ्यो जाया-
न्दाग्ने प्रजया सहेत्येवं द्विरपरं लाजादि चतुर्थꣳशूर्पकुष्ठया सर्वाँल्लाजानावपति भगाय स्वाहेति त्रिः परि-
णीतां प्राजापत्यꣳ हुत्वा ॥ ७ ॥ अथैनामुदीचीꣳ सप्त पदानि प्रक्रामयत्येकमिषे द्वे ऊर्जे त्रीणि
रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव
विष्णुस्त्वानयत्विति सर्वत्रानुषजति निष्क्रमणप्रभृत्युदकुम्भꣳस्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः
स्थितो भवत्युत्तरत एकेषान्तत एनां मूर्धन्यभिषिञ्चत्यापः शिवाः शिवतमाः शान्ताः शान्ततमा-
स्तास्ते कृण्वन्तु भेषजमित्यापोहिष्ठेति च तिसृभिरथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरित्यथास्यै दक्षि-
णाꣳसमधिहृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽअस्तु ॥ मम वाच-
मेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमित्यथैनामभिमन्त्रयते सुमङ्गलीरियं वधूरिमाꣳसमेत
पश्यत ॥ सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतनेति तान्दृढपुरुष उन्मथ्य प्राग्वोदग्वानुगुप्त आगार-
आनडुहे रोहिते चर्मण्युपवेशयतीह गावो निषीदन्त्विहाश्वा इह पूरुषाः ॥ इहो सहस्रदक्षिणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञ इह पूषा निषीदन्त्विति ग्रामवचनं च कुर्युर्विवाहश्मशानयोर्ग्रामं प्राविशनादिति वचनात्त-स्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेराचार्याय वरं ददाति गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो वैश्यस्याधिरथꣳशतं दुहितृमतेऽस्तमिते ध्रुवं दर्शयति ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधिपोष्ये मयि मह्यं त्वादात् ॥ बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतमिति सा यदि न पश्येत्पश्या-मीत्येव ब्रूयात् त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शय्याताꣳ संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳषड्रात्रं त्रिरात्रमन्ततः ॥ ८ ॥ उपयमनप्रभृत्यौपासनस्य परिचरणमस्तमितानुदित-योर्दध्ना तण्डुलैरक्षतैर्वाग्नये स्वाहा प्रजापतये स्वाहेति सायꣳसूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ ॥ पुमानिन्द्रश्च सूर्यश्च पुमाꣳसंवर्ततां मयि पुनः स्वाहेति पूर्वाङ्गर्भकामा ॥ ९ ॥ राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाऽऽज्यꣳसंस्कृत्येहरतिरिति जुहोति नानामन्त्राभ्यामन्यद्यान-मुपकल्प्य तत्रोपवेशयेद्राजानꣳस्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्षमिति चैतया धुर्यो दक्षिणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्तिस्ततो ब्राह्मणभोजनम् ॥ १० ॥ चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोत्यग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति । स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति हुत्वा हुत्वैतासामाहुती-नामुदपात्रे सꣳस्रवान्समवनीय तत एनां मूर्द्धन्यभिषिञ्चति या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहासावित्यथैनाꣳस्थालीपाकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राशयति प्राणैस्ते प्राणान्सन्दधाम्यस्थिभिरस्थीनि मा॑सैर्मा॑सानि त्वचा त्वचमिति तस्मादेवं विच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति तामुदुह्य यथर्त्तुप्रवेशनं यथा कामी वा काममाविजनितोः सम्भवामेति वचनादथास्यै दक्षिणा॑समधिहृदयमालभते यत्ते सुशीमे हृदयं दिवि चन्द्रमसि श्रितम् ॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमित्येवमत ऊर्ध्वम् ॥११॥ पक्षादिषु स्थालीपाक॑ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाग्नये स्विष्टकृते स्वाहेति प्राशनान्ते बाह्यतः स्त्रीबलिꣳ हरति नमः स्त्रियै नमः पुꣳसे वयसेऽवयसे नमः शुक्लाय कृष्णदन्ताय पापिनां पतये नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददत्विति शेषमद्भिः प्रक्षाल्य ततो ब्राह्मणभोजनम् ॥१२॥ अथ गर्भाधान॑ स्त्रियाः पुष्पवत्याश्चतुरहादूर्ध्व॑ स्नात्वा विरजायास्तस्मिन्नेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवा आदित्यङ्गर्भमित्यादित्यमवेक्षते गृहे वा स्नापयित्वा तामभिगच्छेदिति श्रुतेस्तस्मिन्प्रजायाः सम्भवकाले निशायां कुर्याद्यदि दिवा मैथुनं व्रजेत्क्लीबा अल्पवीर्या अल्पायुषाश्च प्रसूयन्ते तस्मादेतद्वर्जयेत्प्रजाकामो गृही श्रुतिस्मृतिविरोधाभ्यां दक्षिणेन पाणिनोरू प्रसार्य प्रजास्थानमभिमृशति पूषा भगः सविता मे ददातु रुद्रः कल्पयति ललामगुं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति सं सृजेथास्तेजो वैश्वानरो दद्याद् ब्रह्माणमामन्त्रयते ब्रह्मा गर्भं दधात्विति प्राङ्मुख उदङ्मुखो वोपविष्टो मन्यते रेतो मूत्रमिति चैके श्रावणं कुर्यात् ॥ १३ ॥ अथर्तुमतीं जायामधिगच्छेत्पिण्डपितृयज्ञेन यजेत मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा तत एतामाहुतिं जुहोत्याधत्त पितर इत्यलङ्कारमवजिघ्रत्यायन्तु न इति जपत्येवमथर्तुमतीं जायाहृदयमालभ्य पूर्ववत्सव्येन पाणिनोपस्थमभिमृशति भगप्रणेतरिति प्रायुतेदानीमिति रेतोमूत्रमिति सन्धत्ते गायत्रेणेति प्रतिमन्त्रं मन्थयति पुत्रकामोऽभिगच्छेन्नित्यम् ॥ १४ ॥ सा यदि गर्भं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न दधीत सिꣳह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीयमोषधी त्रायमाणा सहमाना सरस्वती ॥ अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति ॥ १५ ॥ अथ पुꣳसवनं पुरा स्पन्दत इति मासे द्वितीये तृतीये वा यदहः पुꣳसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याऽऽप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गाँश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनꣳ हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याङ्कुशकण्टकꣳ सोमाꣳशुं चैके कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोसीति प्राग्विष्णुक्रमेभ्यः ॥१६॥ अथ सीमन्तोन्नयनम् ॥ पुꣳसवनवत् प्रथमगर्भे मासे षष्ठेऽष्टमे वा तिलमुद्गमिश्रꣳस्थालीपाकꣳ श्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्भद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जुलैस्त्रेण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्द्ध्वं विनयति भूर्भुवःस्वरिति प्रतिमहाव्याहृतिभिर्वा त्रिवृतमावध्नात्ययमूर्ज्जावतो वृक्ष उर्ज्जीव फलिनी भवेत्यथाऽऽह वीणागाथिनौ राजानꣳसङ्गायेतां यो वाऽप्यन्यो वीरतर इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियुक्तामप्येके गाथामुपोदाहरन्ति सोम एव नो राजेमा मानुषीः प्रजाः ॥ अविमुक्तचक्र आसीरँस्तीरे तुभ्यमसाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति ततो ब्राह्मणभोजनम् ॥१७॥ सोष्यन्तीमद्भिरभ्युक्षत्येजतु दशमास्य इति प्राग्यस्यैत इत्यथावरावपतनमवैतु प्रश्निशेवलꣳ शुने जराय्वत्तवे नैव माꣳसेन पीवरीं न कस्मिँश्चनायतनमवजरायुपद्यतामिति जातस्य कुमारस्याच्छिन्नायान्नाड्यां मेधाजननाऽऽयुष्ये करोत्यनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवःस्वः सर्वं त्वयि दधामीत्यथास्याऽऽयुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपत्यग्निरायुष्मान्स वनस्पतीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि सोम आयुष्मान्सौषधीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ब्रह्माऽऽयुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि देवा आयुष्मन्तस्तेऽमृतेनाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि यज्ञ आयुष्मान्स दक्षिणाभिरायुष्माँ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि समुद्र आयुष्मान्स स्रवन्तीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि त्रिस्त्रिरुयायुषमिति च स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेद्दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात्प्राणेति व्यानेति दक्षिणोऽपानेत्यपर उदानेत्युत्तरः समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु स यस्मिन्देशे जातो भवति तमभिमन्त्रयते वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम् ॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतमित्यथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमश्रुतं भव ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यथास्य मातरमभिमन्त्रयत इडासि मैत्रावरुणी वीरे वीरमजीजनथाः ॥ सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदित्यथास्यै दक्षिणꣳस्तनं प्रक्षाल्य प्रयच्छतीमꣳ स्तनमिति यस्ते स्तन इत्युत्तरमेताभ्यामुदपात्रꣳशिरस्तो निदधात्यापो देवेषु जाग्रथ यथा देवेषु जाग्रथ ॥ एवमस्याꣳ सूतिकाया सपुत्रिकायां जाग्रथ इति द्वारदेशे सूतिकाग्निमुपसमाधायोत्थाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सन्धिवेलयोः फलीकरणमिश्रान्सर्षपानश्नावावपति शण्डामर्का उपवीरः शौण्डिकेय उलूखलः ॥ मलिम्लुचो द्रोणासश्यवनो नश्यतादितः स्वाहा ॥ आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिर्हत्रीमुखः सर्षपारुणश्यवनो नश्यतादितः स्वाहेति यदि कुमार उप-द्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताङ्क आधाय जपति कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ॥ यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ॥ यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेत्यभिमृशति न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसीति ॥ १८ ॥ अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामो यस्य भार्या गौर्दासी महिषी वडवा वा विकृतं प्रसवे प्रायश्चित्ती भवेत्पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमुपसङ्ग-हरेत् प्लक्षवटौदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषामपो हिरण्यदूर्वाङ्कुराम्रपल्लवैरष्टौ कलशान्प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्य सर्वौषधीनां दम्पती स्नापयित्वाऽऽपो हिष्ठेति तिसृभिः कयानश्चित्र इति द्वाभ्यां पञ्चैन्द्रेण पञ्च वारुणेनेदमापः प्रवहतेत्यपाघमिति स्नापयित्वालङ्कृत्य तौ दर्भेषूपवेश्य तत्र मारुतꣳस्थालीपाकꣳ-श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा पवमानाय स्वाहा पावकाय स्वाहा मरुताय स्वाहा मारुताय स्वाहा मरुद्भ्यः स्वाहा यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहाग्नये स्विष्टकृते स्वाहेत्येतदेव गृहोत्पातेषूलूक-कपोतगृध्रः श्येनो वा प्रविशेत्स्तम्भः प्ररोहेद्वल्मीकं मधुजालं वा भवेदुदकुम्भप्रज्वलनाशनशयन-यानभङ्गेषु गृहगोधिकाकृकलासशरीरसर्पण इत्येवं छत्रध्वजविनाशे सार्पे नैर्ऋते गण्डयोगेष्वन्येष्व-प्युत्पातेषु भूकम्पोल्कापातकाकसर्पसङ्गमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशान्त्योक्तेन विधिना कृत्वा-ऽऽचार्याय वरं दत्त्वा ब्राह्मणान्भोजयित्वा स्वस्ति वाच्याशिषः प्रतिगृह्य शान्तिर्भवति शान्तिर्भवति ॥ १९ ॥ अथातो यमलचरुं मारुतं व्याख्यास्यामो यस्य च यमलौ पुत्रौ दारिका वा प्रजायते पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमाहृत्याश्वत्थप्लक्षन्यग्रोधौदुम्बराश्चत्वारो विधवाः स्नापयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मचारिणो वा शुक्लवासस ऐन्द्रीं दिशमुदिचीं वा मङ्गलं पूर्ववद्गायन्त्यो यमलिनीः स्नापयन्त्याचार्यः स्नापयति वसोः पवित्रेण शतधारेण चाष्टाभिः कलशैः स्नात्वाऽप्रतिरथं जपेदिद्मापः प्प्रवहतेति तौ स्नापितौ वरं प्रयच्छत्यानडुहमातृभ्यश्च हिरण्यं वस्त्रमेव परीतोषणं वाजेवाजेवतेति पतेपद्याद्वादित्याघारं मारुतं चरुं जुहोति मरुताय स्वाहा मारुती स्वाहा मरुद्भ्यो विष्णवे प्रजापतयेऽग्नये स्विष्टकृते स्वाहेति प्राशनान्ते शेषं चरुं गृहीत्वाऽश्वत्थं प्रदक्षिणीकृत्योपविशेत्तदेव तत्रः समाप्य ततो ब्राह्मणभोजनम् ॥ २० ॥ अथातो मूलविधिं व्याख्यास्यामो मूलांशे प्रथमे पितुर्नेष्टो द्वितीये मातुस्तृतीये धनधान्यस्य चतुर्थे कुलशोकावहः स्वयं पुण्यभागी स्यान्मूलनक्षत्रे मूलविधानं कुर्यात्सर्वौषध्यात्सर्वगन्धैश्च सञ्युक्तं तत्रोदकुम्भं कृत्वा स वस्त्रगन्धपुष्परत्नसहितꣳश्वेतसिद्धार्थकुसुमायुक्तं कुर्यात्तस्मिन्रुद्रं जपित्वाऽप्रतिरथः राक्षोघ्नं च सूक्तं द्वितीयोदकुम्भं कृत्वा चतुःशतपाठः प्रस्रवणसञ्युक्तन्तस्मिन्नुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बद्ध्वा तस्मिन्प्रधानानि मूलानि वक्ष्यामि हिरण्मयमूलः सप्त धान्यं प्रथमाकाष्मर्या सहदेव्याऽपराजिता बाला पाठा शङ्खपुष्प्यधोपुष्पी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुयष्टिका चक्राङ्किता मयूरशिखा काकजङ्घा कुमारीद्वयं जीवन्त्यपामार्गभृङ्गारकलक्ष्मणाः सुलक्ष्मणा जाती व्याघ्रपत्रश्चक्रमर्द्दकः सिद्धेश्वरोऽश्वत्थोदुम्बरपालाशप्लक्षवटार्कदूर्वारोहितकशमीशतावरीत्येवमादिमूलशतं पूरयित्वा तस्मिन्निषिद्धानि मूलानि वक्ष्यामि बैल्वधवनिम्बकदम्बराजवृक्षोक्षशालाप्रयालुदधिकपित्थकोविदारश्लेष्मान्तकबिभीतकशाल्मलीररलुसर्वकण्टकिवर्जं तत्राभिषेकं कुर्यात्पितुः शिशोर्जनन्या देवस्य त्वेत्यौदुम्बर्यात्सन्दीमुदगग्रामास्तृणाति तत्रासीनान्सम्पातेनाभिषिञ्चति शिरसोऽध्यनुलोमꣳशिरो मे श्रीर्यश इति यथालिङ्गमङ्गानि सम्मृशति स्नानादूर्ध्वं नैर्ऋतं पायसꣳ श्रपयित्वा काश्मर्यमयꣳ स्रुक्स्रुवं प्रतप्य सम्मृज्यान्वारब्ध आघारावाज्यभागौ हुत्वाऽसुन्वन्तमिति चतस्रः स्थालीपाकेन जुहुयात्पञ्चदशाऽऽज्याहुतीश्चतुर्गृहीतेन जुहोति कृणुष्व पाज इति पञ्च मा नस्तोक इति द्वे या ते रुद्र शिवा तनूरिति षडग्नी रक्षाꣳसि सधेति शुक्रज्योतिरमर्त्यः शुचिः पावक ईड्य इति त्वन्नः सोम विश्वतो रक्षा राजन्नघायतो न रिष्ये त्वावतः सखेति स्विष्टकृदादि प्राशनान्ते कृष्णा गौः कृष्णाश्च तिला हेममयमूलꣳसप्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धान्यसञ्युक्तमाचार्याय वरं दद्यात्कृष्णोऽनड्वान्ब्रह्मणे दद्यान्नक्षत्रसूचकेभ्यो वासो दद्यादन्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात्कृसरापायसेन ब्राह्मणान्भोजयेत्सार्पदैवते गण्डजात एष एव विधिः कात्यायनेनोक्तः कात्यायनेनोक्तः ॥ २१ ॥ दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तःस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षरमाकारान्तꣳ स्त्रियै तद्धितꣳशर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य चतुर्थे मासि निष्क्रमणिका सूर्यमुदीक्षयति तच्चक्षुरिति ॥ २२ ॥ प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत्पुत्रं दृष्ट्वा जपत्यङ्गादङ्गात्सम्भवसि हृदयादधिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यथास्य मूर्द्धानमवजिघ्रति प्रजापतेष्ट्वाहिंकारेणावजिघ्रामि सहस्त्रायुषाऽसौ जीव शरदः शतमिति गवां त्वा हिंकारेणेति च त्रिर्दक्षिणेऽस्य कर्णे जपत्यस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः ॥ अस्मे शतꣳशरदो जीवसेऽधा अस्मे वीराञ्छश्वत इन्द्रशिप्रिन्नितीन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ॥ पोषꣳरयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिन त्वमह्ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति सव्ये स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीम् ॥ २३ ॥ षष्ठे मासेऽन्नप्राशनꣳस्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ॥ सा नो मन्द्रेषमूर्जन्दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति वाजो नो अद्येति च द्वितीयाꣳ स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहेति प्राशनान्ते सर्वान्रसान्सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत्तूष्णीꣳहन्तेति वा हन्तकारं मनुष्या इति श्रुतेर्भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य कपिञ्जलमाꣳसेनान्नाद्यकामस्य मत्स्यैर्जवनकामस्य कृकषाया आयुष्कामस्याऽऽव्या ब्रह्मवर्चसकामस्य सर्वैः सर्वकामस्यान्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम् ॥ २४ ॥

इति पारस्करगृह्यसूत्रे प्रथमं काण्डं समाप्तम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयं काण्डम् ।

सांवत्सरिकस्य चूडाकरणं तृतीये वाऽप्रतिहते षोडशवर्षस्य केशान्तो यथामङ्गलं वा सर्वेषां ब्राह्मणान्भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशत्यन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिञ्चत्युष्णेन वाय उदकेनेह्यदिते केशान्वपेति केशश्मश्रिवति च केशान्तेऽथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति तत आदाय दक्षिणं गोदानमुन्दति सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूम् ॥ दीर्घायुत्वाय वर्चस इति त्र्येण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति शिवो नामेति लोहक्षुरमादाय निवर्त्तयामीति प्रवपति, येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेदमस्याऽऽयुष्यं जरदष्टिर्यथासदिति सकेशानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाण एवं द्विरपरं तूष्णीमितरयोश्चोन्दनाद्यथ पश्चात् त्र्यायुषमित्यथोत्तरतो येन भूरिश्चरा दिवं ज्योक् च

सं.अ.७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चाद्धि सूर्यम् ॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते यत्क्षुरेण मज्जयता सुपेशसा वस्वा वाऽऽवपति केशान्छिन्धि शिरो माऽस्याऽऽयुः प्रमोषीर्मुखमिति च केशान्ते ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छत्यक्षण्वं परिवपेति यथामङ्गलं केशशेषकरणमनुगुप्तमेतꣳसकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वाऽऽचार्याय वरं ददाति गां केशान्ते संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः ॥ १ ॥ (अथ कर्णवेधो वर्षे तृतीये पञ्चमे वा पुष्येन्दुचित्राहरिरेवतीषु पूर्वाह्णे कुमारस्य मधुरं दत्त्वा प्राङ्मुखायोपविष्टाय दक्षिणं कर्णमभिमन्त्रयते भद्रं कर्णेभिरिति सव्यं वक्ष्यन्तीवेदिति चाथ भिन्द्यात्ततो ब्राह्मणभोजनम् ॥ २ ॥) अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वैकादशवर्षꣳराजन्यं द्वादशवर्षं वैश्यं यथामङ्गलं वा सर्वेषां ब्राह्मणान्भोजयेत्तं च पर्युप्तशिरसमलङ्कृतमानयन्ति पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति ब्रह्मचार्यसानीति चाथैनं वासः

१ वप्त्रेति जयरामः । वप्त्वा (मुण्डयित्वा) इति गदाधरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिधापयति येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् ॥ तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चस इति मेखलां बध्नीत इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् ॥ प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयमिति युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वा तूष्णीं वात्र यज्ञोपवीतपरिधानम् ॥ (यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनो-पनह्याम्मीत्यथाजिनं प्रयच्छति मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳसमिद्धम् ॥ अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहमिति तूष्णीं वा) दण्डं प्रयच्छति तं प्रति-गृह्णाति यो मे दण्डः परापतद्वैहायसोऽधिभूम्याम् ॥ तमहं पुनराददे आयुषे ब्रह्मणे ब्रह्मवर्चसायेति दीक्षावदेके दीर्घसत्रमुपैतीति वचनादथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयत्यापोहिष्ठेति तिसृभिरथैनꣳ-सूर्यमुदीक्षयति तच्चक्षुरित्यथास्य दक्षिणाꣳसमधि हृदयमालभते मम व्रते ते हृदयं दधामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम चित्तमनु चित्तं ते अस्तु ॥ मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमि-
त्यथास्य दक्षिणꣳहस्तं गृहीत्वाऽऽह को नामासीत्यसावहं भो ३ इति प्रत्याहाथैनमाह कस्य
ब्रह्मचार्यसीति भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासावित्यथैनं
भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः
परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा
भूतेभ्यः परिददाम्यरिष्ट्या इति ॥ ३ ॥ प्रदक्षिणमग्निं परीत्योपविशत्यन्वारब्ध आज्याहुतीर्हुत्वा
प्राशनान्तेऽथैनꣳसꣳशास्ति ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिध-
माधेह्यपोऽशानेत्यथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय
समीक्षिताय दक्षिणतस्तिष्ठत आसीनाय वैके पच्छोर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्संवत्सरे
षण्मास्ये चतुर्विꣳशत्यहे द्वादशाहे षडहे त्र्यहे वा सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै
ब्राह्मण इति श्रुतेस्त्रिष्टुभꣳराजन्यस्य जगतीं वैश्यस्य सर्वेषां वा गायत्रीम् ॥ ४ ॥ अत्र समिदाधानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिनाऽग्निं परिसमूहत्यग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं माऽ-सुश्रवः सौश्रवसं कुरु ॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति प्रदक्षिणमग्निं पर्युक्ष्योत्तिष्ठन्त्समिधमादधात्यग्नये समिधमहार्षं[2] बृहते जात-वेदसे ॥ यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाऽऽचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳस्वाहेत्येवं द्वितीयां तथा तृतीयामेषा त इति वा समुच्चयो वा पूर्ववत्परिसमूहनपर्युक्षणे पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि ॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु ॥ मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति। (अङ्गान्यालभ्य जपत्यङ्गानि च म आप्या-यन्तां वाक्प्राणश्चक्षुः श्रोत्रं यशो बलमिति त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेऽꣳसे

---

१ पर्युक्ष्योत्त्थायेति बहूनां पाठः सम्मतः । २ माहार्यमित्यपि पाठो दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदि च त्र्यायुषमिति प्रतिमन्त्रम्) ॥ ५ ॥ अत्र भिक्षाचर्यचरणम् । भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्मध्याꣳराजन्यो भवदन्त्यां वैश्यस्तिस्रोऽप्रत्याख्यायिन्यः षड् द्वादशापरिमिता वा मातरं प्रथमामेक आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येकेऽहिꣳसन्नरण्यात्समिधमाहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजतेऽधःशाय्यक्षारालवणाशी स्याद्दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या मधुमाꣳसमज्जनोपर्यासनस्त्रीगमनानृतादत्ताऽऽदानानि वर्जयेदष्टाचत्वारिꣳशद्वर्षाणि वेदब्रह्मचर्यं चरेद्द्वादश द्वादश वा प्रतिवेदं यावद्ग्रहणं वा वासाꣳसि शाणक्षौमाविकान्यैणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवꣳ राजन्यस्याऽऽजं गव्यं वा वैश्यस्य सर्वेषां वा गव्यमसति प्रधानत्वान्मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्य मुञ्जाभावे कुशाश्मन्तकबल्वजानां पालाशो ब्राह्मणस्य दण्डो बैल्वो राजन्यस्यौदुम्बरो वैश्यस्य केशसम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य घ्राणसम्मितो वैश्यस्य सर्वे वा सर्वेषामाचार्येणाऽऽहुत उत्थाय प्रतिशृणुयाच्छयानं चेदासीन आसीनं चेत्तिष्ठँस्तिष्ठन्तं चेदभिक्रामन्नभिक्रामन्तं चेदभिधावन्स एवं वर्त्तमानोऽमुत्राद्य वसत्यमुत्राद्य वस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीति तस्य स्नातकस्य कीर्तिर्भवति त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति समाप्य वेदमसमाप्य व्रतं यः समावर्त्तते स विद्यास्नातकः समाप्य व्रतमसमाप्य वेदं यः समावर्त्तते स व्रतस्नातक उभयꣳ समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इत्याषोडशाद्वर्षाद्ब्राह्मणस्यानतीतः[1] कालो भवत्याद्वाविꣳशाद्राजन्यस्याचतुर्विꣳशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रीका भवन्ति नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः कालातिक्रमे नियतवत्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च तेषाꣳ संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्व्यवहार्या भवन्तीति वचनात् ॥ ६ ॥ सूत्रस्यार्द्धः ॥ खण्डानि ॥ ३० ॥ अथोपनीतो ब्राह्मणस्त्रिशिखः शिखी जटिलो मुण्डो वाऽक्षारालवणाशी स्यात्सावित्रꣳ षड्रात्रं त्रिरात्रꣳ सद्यःकालं वा चरेत्तदेव व्रतमुदीक्ष्य दण्डमपो निधाय मेखलां यज्ञोपवीतं चाप्स्वन्तरिति प्रत्यृचं नमो वरुणायेति त्रिमधुरं दत्त्वा ततोऽस्याऽऽग्नेयं प्रथमं वेदव्रतमादिशेद्ब्राह्मणक्षत्रियविशां पञ्च सांवत्सरिकाणि

---

१ अनतीतः काल इति हरिहरगदाधरजयरामाः । नातीतः काल इति कर्कः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदव्रतानि भवन्त्याग्नेयꣳशुक्रियमौपनिषदꣳ शौलभं गोदानमिति पञ्च सांवत्सरिकाणि वेदव्रतानि चरित्वा स्नात्वोपव्रतं चरेत्त्रिष्ववगुण्ठनꣳ शुक्रियादिषु शुक्रियꣳ शुक्रभिः श्रावयेदौपनिषदमौपनिषद्भिः शौलभꣳ शौलभिनीभिरथवा विद्यमान आब्रह्मन्नुदीरतामानो भद्रा आशुः शिशान इमानुकमिति च वेदशिरसाऽवगुण्ठयेदवगुण्ठनीं त्रिवलिं पञ्चवलिं वा नाभिदेशात्प्रच्छाद्य वाग्यतोऽरण्येऽधः शयीत ग्रामे गोष्ठे देवतायतने वा व्युष्टायामवगुण्ठनीमरण्ये विसृजेद्दृश्श्रमस्योदुत्त्यं चित्रन्देवानामित्युदितेऽर्के जपति वर्षति द्यौः शान्तिरिति शान्तिं करोति शान्तिभाजनं गुरवे दद्यादेवमेवावगुण्ठनीं च गोदाने गोमिथुनं तस्माद्गोदानमिति तस्माद्गोदानमिति ॥ ७ ॥ वेदꣳसमाप्य स्नायाद्ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकं द्वादशकेऽप्येके गुरुणाऽनुज्ञातो विधिर्विधेयस्तर्कश्च वेदः षडङ्गमेके न कल्पमात्रे कामं तु याज्ञिकस्योपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाऽष्टानामुदकुम्भानां येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूदूषुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहीत्वा तेनाभिषिञ्चते तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति येन श्रियमकृ-
णुतां येनावमृशताꣳसुरां येनाक्ष्यावभ्यषिञ्चतां यद्वा तदश्विना यश इत्यापोहिष्ठेति च प्रत्यृचं
त्रिभिस्तूष्णीमितरैरुदुत्तममितिमेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायाऽऽदित्यमुपतिष्ठत
उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मागम-
योद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा-
गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वा-
विदन्मा गमयेति दधि तिलान्वा प्राश्य जटालोमनखान्[1] सꣳहृत्यौदुम्बरे दन्तान्धावेताऽन्नाद्याय
व्यूहध्वꣳसोमो राजाऽयमागमत् ॥ स मे मुखं प्रमार्क्ष्यते यशसा च भगेन चेत्युत्साद्य पुनः
स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे तर्पय[2] चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेति
पितरः शुन्धध्वमिति पाण्योरवनेजनं दक्षिणानिषिच्यानुलिप्य जपेत्सुचक्षा अहमक्षीभ्यां भूयास-

१ "नखानि" इत्यपि पाठः । २ समानव्यानौ मे तर्पय इति पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६ सुवर्चा मुखेन ॥ सुश्रुत्कर्णाभ्यां भूयासमित्यहतं वासो धौतं वाऽमौत्रेणाच्छादयीत परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरशिम ॥ शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्य इत्यथोत्तरीयं यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती ॥ यशो भगश्च मा विन्दद्यशो मा प्रतिपद्यतामित्येकं चेत् पूर्वस्योत्तरवर्गेण प्रच्छादयीत सुमनसः प्रतिगृह्णाति या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन चेत्यथावबध्नीते यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु ॥ तेन सङ्ग्रथिताः सुमनस आबध्नामि यशो मयीत्युष्णीषेण शिरो वेष्टयते युवा सुवासा इत्यलङ्करणमसि भूयोऽलङ्करणं भूयादिति कर्णवेष्टकौ वृत्रस्येत्यपङ्क्तेऽक्षिणी रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो मामन्तर्द्धेहीति प्रतिष्ठेस्थो विश्वतो मा पातमित्युपानहौ प्रतिमुञ्चते विश्वाब्भ्यो मा नाष्ट्राब्भ्यस्परिपाहि सर्वत इति वैणवं दण्डमादत्ते दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः ॥ ८ ॥ स्नातस्य यमान्वक्ष्यामः । कामादितरो नृत्यगीतवादित्राणि न कुर्यान्न च गच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कामं तु गीतं गायति वैव गीते वा रमत इति श्रुतेर्ह्यपरं क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेदुदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धिसर्पणविवृतस्नानविषमलङ्घनशुष्कवदनसन्ध्याऽऽदित्यप्रेक्षणभैक्षणानि न कुर्यान्न ह वै स्नात्वा भिक्षेतापह वै स्नात्वा भिक्षां जयतीति श्रुतेर्वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदित्यप्स्वात्मानं नावेक्षेताजातलोम्नीं विपुꣳसीꣳषण्ढं च नोपहसेन्न गच्छेद्गर्भिणीं विजन्येति ब्रूयात्सकुलमिति नकुलं भगालमिति कपालं मणिधनुरितीन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीतोर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात्स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत विकृतं वासो नाच्छादयीत दृढव्रतो वधत्रः स्यात्सर्वत आत्मानं गोपायेत् सर्वेषां मित्रमिव ॥ (शुक्रियमध्येष्यमाणः पाठः) ॥९॥ तिस्रो रात्रीर्व्रतं चरेदमाꣳसाश्यमृण्मयपायी स्त्रीशूद्रशबकृष्णशकुनिशूनां च दर्शनमसम्भाषणं च तैः शवशूद्रसूतकान्नानि च नाद्यान्मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्सूर्याच्चात्मानं नान्तर्दधीत तप्तेनोदकार्थान्कुर्वीताऽवज्योत्य रात्रौ भोजनꣳसत्यवदनमेव वा दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवाँश्चेत् ॥ १० ॥ इति षोडशकर्म समाप्तम् ॥ अथातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्च महायज्ञा वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयाद्ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै धात्रे विधात्रे च द्वार्ययोः प्रतिदिशं वायवे दिशां च मध्ये त्रीन्ब्राह्मणेऽन्तरिक्षाय सूर्याय विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरत उषसे भूतानां च पतये परं पितृभ्यः स्वधा नम इति दक्षिणतः पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त इत्युद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्तत इति यथार्हं भिक्षुकानतिथींश्च सम्भजेरन् बालज्येष्ठा गृह्या यथार्हमश्नीयुः पश्चाद्गृहपतिः पत्नी च पूर्वो वा गृहपतिः तस्मादु स्वादि(द्वि)ष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेरहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात् ॥११॥ अथातो धर्मजिज्ञासा। केशान्तादूर्ध्वमपत्नीक उत्सन्नाग्निरनग्निको वा प्रवासी ब्रह्मचारी चान्वग्निरिति ग्रामाग्निमाहृत्य पृष्ठो दिवीत्यधिष्ठाप्य त्रिभिश्च सावित्रैः प्रज्वाल्य ताꣳसवितुस्तत्त्सवितुर्विश्वानि देवसवितरिति पूर्ववदक्षतैर्हुत्वा पाकं पचेत्तत्र वैश्वदेवं ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृतऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युपस्पृश्य पूर्ववद्बलिकर्मैवं कृते न वृथा पाको भवति न वृथा पाकं पचेन्न वृथापाकमश्नीयादत्र पिण्डपितृयज्ञः पश्चाद्याग्रायणानि कुर्यात् ॥ १२ ॥ अथातोऽध्यायोपाकर्मौषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याꣳ श्रावणस्य पञ्चमीꣳ हस्तेन वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पृथिव्या अग्नय इत्यृग्वेदेऽन्तरिक्षाय वायव इति यजुर्वेदे दिवे सूर्यायेति सामवेदे दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय इति चैतदेव व्रतादेशनविसर्गेषु सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या ब्रह्मचारिणश्च पूर्वकल्पेन शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुर्दधिक्राव्ण्ण इति दधि भक्षयेयुः स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन्प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि छन्दोगानाꣳसूक्तान्यथर्वणानाꣳ

सं. ७८ सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म ॥ इन्द्रस्तद्वेद येन यथा न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्विषामह इति त्रिरात्रं नाधीयीरँल्लोमनखानामनिकृन्तनमेके प्रागुत्सर्गात् ॥ १३ ॥ वातेऽमावास्यायामिति सर्वानध्यायः ॥ श्राद्धाशने चोल्कावस्फूर्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाकालमुत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा भुक्त्वाऽऽर्द्रपाणिरुदके महानिशायाꣳसन्धिवेलयोरन्तःशवे ग्रामे ग्रामान्तर्दिवाकीर्त्ये[1] धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालं नीहारे वादित्रशब्द आर्त्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरिते च तत्कालं गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत्सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रमेकरात्रमसब्रह्मचारिण्यर्द्धषष्ठान्मासानधीत्योत्सृजेयुरर्द्धसप्तमासान्वाऽथेमामृचं जपन्त्युभा कवी युवा यो नो धर्मः परापतत् ॥ परिसख्यस्य धर्मिणो विसख्यानि विसृजामह इति त्रिरात्रꣳसहोष्य विप्रतिष्ठेरन् ॥ १४ ॥ पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेयुरुदकान्तं गत्वाऽद्भिर्देवाँश्छन्दाꣳसि वेदानृषीन्पुराणाचार्यान् गन्धर्वानितराचार्यान्त्संवत्सरं च सावयवं पितॄनाचार्यान्स्वाँश्च तर्पयेयुः सावित्रीं

१ दिवाकीर्तिरिति कर्कसम्मतः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुरनुद्रुत्य विरता स्म इति प्रब्रूयुः क्षपणं प्रवचनं च पूर्ववत् ॥ १५ ॥ पुण्याहे लाङ्गलयोजनं ज्येष्ठया वेन्द्रदैवत्यमिन्द्रं पर्जन्यमश्विनौ मरुत उदलाकाश्यपꣳ स्वातिकारीꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहौ मधुघृते प्राशयेत्सीरा युञ्जन्तीति योजयेच्छुनꣳसुफाला इति कृषेत् फालं वा लभेत न वाऽन्युपदेशाद्वपनाषङ्गाच्चाश्यमभिषिच्याकृष्टं तदा कृषेयुः स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्सीतायज्ञे च ततो ब्राह्मणभोजनम् ॥१६॥ (अथातो वापी-कूपतडागारामदेवतायतनानां[1] प्रतिष्ठापनं व्याख्यास्यामस्तत्रोदगयन आपूर्यमाणपक्षे पुण्याहे तिथि-वारनक्षत्रकरणे च गुणान्विते तत्र वारुणं यवमयं चरुꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्वन्नोऽअग्ने स त्वन्नोऽअग्नऽइमम्मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्नऽउदुत्तममुरुꣳहि राजा वरुणस्योत्तम्भनमग्नेरनीकमिति दशर्चꣳ हुत्वा स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा वरुणाय स्वाहा यज्ञाय स्वाहोग्राय स्वाहा भीमाय स्वाहा शतक्रतवे स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहेति

१ पुष्करिण्याम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथोक्तꣳ स्विष्टकृत्प्राशनान्ते जलचराणि क्षिप्त्वाऽलङ्कृत्य गां तारयित्वा पुरुषसूक्तं जपन्नाचार्याय वरं दत्त्वा कर्णवेष्टकौ वासाꣳसि धेनुर्दक्षिणा । ततो ब्राह्मणभोजनम् ॥) ॥ १७ ॥ अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्याꣳस्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोत्यप श्वेतपदा जहि पूर्वेण चापरेण च ॥ सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा ॥ न वै श्वेतस्याध्याचारेऽहिर्ददर्श कञ्चन ॥ श्वेताय वैदर्व्याय नमः स्वाहेति स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति धानावन्तमिति धानानां घृताक्तान्सक्तून्सर्पेभ्यो जुहोत्याग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपतये स्वाहा श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहाऽभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहेति सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति प्राशनान्ते सक्तूनामेकदेशꣳशूर्पे न्युप्योपनिष्क्रम्य बहिःशालायाः स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वाग्यतः सर्पानवनेजयत्याग्नेयपाण्डुपार्थिवानाꣳसर्पाणामधिपतेऽवनेनिक्ष्व श्वेतवायवान्तरिक्षाणाꣳसर्पाणामधिपतेऽवनेनिक्ष्वाभिभूःसौर्यदिव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वेति यथावनिक्तं द्रव्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरत्याग्नेयपाण्डु-
पार्थिवानाꣳ सर्पाणामधिपत एष ते बलिः श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष ते बलि-
रभिभूःसौर्यदिव्यानाꣳसर्पाणामधिपत एष ते बलिरित्यवनेज्य पूर्ववत्कङ्कतैः प्रलिखत्याग्नेयपाण्डु-
पार्थिवानाꣳ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपते प्रलिखस्वाभिभूः-
सौर्यदिव्यानाꣳसर्पाणामधिपते प्रलिखस्वेत्यञ्जनानुलेपनꣳस्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति
सक्तुशेषꣳस्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्प्पेभ्य इति तिस्रभिः स यावत्का-
मयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयादपश्वेतपदा
जहीति द्वाभ्यां दर्वीं शूर्पञ्च प्रक्षाल्य प्रतप्य प्रयच्छति द्वारदेशे मार्जयन्त आपोहिष्ठेति तिस्रभि-
रनुगुप्तमेतꣳसक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य द्रव्योपघातꣳसक्तून्सर्पेभ्यो बलिꣳ
हरेदाग्रहायण्यास्तꣳ हरन्तन्नान्तरेण गच्छेयुर्द्रव्याचमनं प्रक्षाल्य निदधाति धानाः प्राश्नन्त्यसꣳ

१ स्थालीपाकस्य जुहोतीन्द्राय स्वाहेति वैदिकपाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यूतास्ततो ब्राह्मणभोजनम् ॥ १८ ॥ प्रौष्ठपद्यामिन्द्रयज्ञः । पायसमैन्द्रꣳश्रपयित्वाऽपूपाँश्चापूपैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति प्राशनान्ते मरुद्भ्यो बलिꣳ हरत्यहुतादो मरुत इति श्रुतेराश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनाच्छुक्रज्योतिरिति प्रतिमन्त्रं विमुखेन च मनसा नामान्येषामेतानीति श्रुतेरिन्द्रं दैवीरिति जपति ततो ब्राह्मणभोजनम् ॥ १९ ॥ आश्वयुज्यां पृषातकाः पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहेति दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन मातृभिर्वत्सान्सꣳसृज्य ताꣳरात्रिमाग्रहायणीं च ततो ब्राह्मणभोजनम् ॥ २० ॥ अथ सीतायज्ञो व्रीहियवाणां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत्कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳस्थालीपाकꣳश्रपयेन्न पूर्वचोदितत्वात्सन्देहोऽसम्भवाद्विनिवृत्तिः क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन ग्रामे वोभयसम्प्रयोगाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरोधाद्यत्र श्रपयिष्यन्नुपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय तन्मिश्रैर्दर्भैस्तीर्त्वाऽऽज्यभागा-
विष्ट्वाऽऽज्याहुतीर्जुहोति पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः । तमिहेन्द्रमुपह्वये शिवा
नः सन्तु हेतयः स्वाहा । यन्मे किञ्चिदुपेप्सितमस्मिन्कर्मणि वृत्रहन् ॥ तन्मे सर्वꣳ समृध्यतां
जीवतः शरदः शतꣳ स्वाहा ॥ सम्पत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रेष्ठ्यꣳ श्रीः प्रजामिहावतु स्वाहा ॥
यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्मणाम् ॥ इन्द्रपत्नीमुपह्वये सीताꣳ सा मे त्वन्नपायिनी
भूयात्कर्मणि कर्मणि स्वाहा ॥ अश्वावती गोमती सूनृतावती बिभर्ति या प्राणभृतो अतन्द्रिता ॥
खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाꣳ सा मे त्वनपायिनी भूयात्स्वाहेति स्थालीपाकस्य
जुहोति सीतायै यजायै शमायै भूत्या इति मन्त्रवत्प्रदानमेकेषाꣳ स्वाहाकारप्रदाना इति श्रुते-
र्विनिवृत्तिः स्तरणशेषकुशेषु सीतागोप्तृभ्यो बलिꣳ हरति पुरस्ताद्ये त आसते सुधन्वानो निष-
ङ्गिणः ॥ ते त्वापुरस्ताद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीम-
मित्यथ दक्षिणतो निमिषा वर्मिण आसते ॥ ते त्वा दक्षिणतो गोपायन्त्वप्रमत्ता अनपायिनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम एषां करोम्यहं बलिमेभ्यो हरामीममित्यथ पश्चादाभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुनकुरिः ॥ ते त्वा पश्चाद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममित्यथोत्तरतो भीमा वायुः समाजवे ॥ ते त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म स्त्रियश्चोपयजेरन्नाचरितत्वात्सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् ॥ २१ ॥ ॥ ॥ ॥ ॥

इति पारस्करगृह्यसूत्रे द्वितीयकाण्डं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयं काण्डम् ।

अनाहिताग्नेर्नवप्राशनन्नवꣳस्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे ॥ शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा । ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ॥ तेषां योऽज्यानिमजीजिमा-वहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहेति । स्थालीपाकस्याऽऽग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्ट-कृते च स्विष्टमग्ने अभितत्पृणीहि विश्वाँश्च देवः पृतना अविष्यत् । सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः स्वाहेति । अथ प्राश्नात्यग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिर्भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावशेन समशीमहि त्वा । स नो मयोऽभूः पितो आविशस्व शं तोकाय तनुवे स्योन इत्यन्नपतीयया वाथ यवानामेत-

---

१ अन्नपतिशब्दो विद्यते यस्यां सा अन्नपतीया तया अन्नपतीयया अत्र छप्रत्ययः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुत्यं मधुना सञ्युतं यवꣳसरस्वत्या अधिवनाय चकृषुः ॥ इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति ततो ब्राह्मणभोजनम् ॥ १ ॥ मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म स्थालीपाकꣳ श्रपयित्वा श्रवणवदाज्याहुतीर्हुत्वाऽपरा जुहोति यां जनाः प्रतिनन्दन्ति रात्रीन्धेनुमिवायतीम् ॥ संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा ॥ संवत्सरस्य प्रतिमा यां रात्रिमुपास्महे ॥ प्रजाꣳ सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा ॥ संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः ॥ तेषां वयꣳसुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः । तेषामृतूनाꣳ शतशारदानां निवात एषामभये वसेम स्वाहेति स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनान्मार्जनान्त उत्सृष्टो बलिरित्याह पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतो दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳ शमी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाखसीतालोष्टाश्मनो निधायाग्निमीक्षमाणो जपत्ययमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः ॥ सुवीर्योऽयं श्रैष्ठ्ये दधातु नाविति पश्चादग्नेः प्राञ्चमञ्जलिं करोति दैवीं नावमिति तिसृभिः स्रस्तरमारोहन्ति ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति ब्रह्मानुज्ञाताः प्रत्यवरोहन्त्यायुः कीर्त्तिर्यशो बलमन्नाद्यं प्रजामित्युपेता जपन्ति सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः ॥ शिवा नो वर्षाः सन्तु शरदः सन्तु नः शिवा इति स्योना पृथवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्त्युपोदुतिष्ठन्त्युदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरित्येवं द्विरपरं ब्रह्मानुज्ञाता अधःशयीरँश्चतुरो मासान्यथेष्टं वा ॥ २ ॥ ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टका ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येत्यपूपमाꣳसशाकैर्यथासङ्ख्यं प्रथमाऽष्टका पक्षाष्टम्याꣳस्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्रिꣳशत्स्वसार उपयन्ति निष्कृतꣳसमानं केतुं प्रतिमुञ्चमानाः ॥ ऋतूँस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा ॥ ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि ॥ विपश्यन्ति पशवो जायमाना नानारूपामातुरस्या उपस्थे स्वाहा ॥ एकाऽष्टका तपसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तप्यमाना जजान गर्भं महिमानमिन्द्रम् ॥ तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः स्वाहा ॥ अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छ एतत् ॥ भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥ अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् ॥ भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा ॥ पञ्च व्युष्टीरनु पञ्चदोहा गां पञ्चनाम्नी मृतवोऽनु पञ्च ॥ पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकꣳ स्वाहा ॥ ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु धर्मस्यैका सवितैकान्नियच्छतु स्वाहा । या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे ॥ सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाꣳ स्वाहा ॥ शुक्रऋषभा नभसा ज्योतिषाऽगाद्विश्वरूपा शबली अग्निकेतुः ॥ समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आगाः स्वाहा ॥ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् ॥ एका सती बहुधोषो व्यौच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत्स्वाहेति । स्थालीपाकस्य जुहोति शान्ता पृथिवी शिवमन्तरिक्षꣳशन्नो द्यौरभयं कृणोतु ॥ शन्नोऽदिशः प्रदिश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ॥ आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम् । भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याᳬस्वाहा ॥ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु ॥ ऊर्जं प्रजाममृतन्दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति च । अष्टकायै स्वाहेति मध्यमा गवा तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य इति श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत्स्त्रीभ्यश्चोपसेचनञ्च कर्पूषु सुरया तर्पणेन चाञ्जनानुलेपनᳬस्रजश्चाचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन् मध्या वर्षे च तुरीया शाकाष्टका ॥ ३ ॥ अथातः शालाकर्म पुण्याहे शालां कारयेत्तस्या अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति स्तम्भमुच्छ्रयतीमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम् ॥ इहैव ध्रुवान्निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा ॥ अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय ॥ आ त्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः ॥ आ त्वा कुमारस्तरुण आवत्सो जगदैः सह ॥ आ त्वा परिस्रुतः कुम्भ आदध्नः कलशैरुप क्षेमस्य

सं. ७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्नी बृहती सुवासा रयिन्नो धेहि सुभगे सुवीर्यम् ॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव ॥ अभिनः पूर्य्यताꣳरयिरिदमनुश्रेयो वसान इति चतुरः प्रपद्यतेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳश्रपयित्वा निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणमामन्त्रयते ब्रह्मन्प्रविशामीति ब्रह्मानुज्ञातः प्रविशत्यृ(चं)तं प्रपद्ये शिवं प्रपद्य इत्याज्यꣳसँस्कृत्येहरतिरित्याज्याहुतीर्हुत्वाऽपरा जुहोति वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः ॥ यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥ १ ॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥२॥ वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या ॥ पाहि क्षेम उत योगे वरन्नो यूयम्पात स्वस्तिभिः सदा नः स्वाहा ॥ ३ ॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ॥ सखा सुशेव एधि नः स्वाहेति स्थालीपाकस्य जुहोत्यग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये ॥ सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा ॥ सर्पदेव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनान्सर्वान् हिमवन्तꣳसुदर्शनम्। वसूँश्च रुद्रानादित्यानीशानं जगदैः सह ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ पूर्वाह्णमपराह्णञ्चोभौ मध्यन्दिना सह ॥ प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथाम् ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा। कर्तारं च विकर्तारं विश्वकर्माणमोषधीँश्च वनस्पतीन् ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ धातारं च विधातारं निधीनां च पतिꣳसह ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ स्योनꣳ शिवमिदं वास्तु दत्तं ब्रह्मप्रजापती ॥ सर्वाश्च देवताः स्वाहेति प्राशनान्ते काꣳस्ये सम्भारानोप्यौदुम्बरपलाशानि ससुराणि शाड्वलं गोमयं दधि मधु घृतं कुशान्यवाँश्चासनोपस्थानेषु प्रोक्षेत्पूर्वे सन्धावभिमृशति श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेतामिति। दक्षिणे सन्धावभिमृशति यज्ञश्च त्वा दक्षिणा च दक्षिणे सन्धौ गोपायेतामिति पश्चिमे सन्धावभिमृशति ॥ अन्नं च त्वा ब्राह्मणश्च पश्चिमे सन्धौ गोपायेतामित्युत्तरे सन्धावभिमृशत्यूर्क्च त्वा सूनृता चोत्तरे सन्धौ गोपायेतामिति निष्क्रम्य दिश उपतिष्ठते केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केतादित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद्गोपायेतामित्यथ दक्षिणतो गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानꣳरात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेतामित्यथ पश्चाद्दीदिविश्च मा जागृविश्च पश्चाद्गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पश्चाद्गोपायेतामित्यथोत्तरतः स्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपायेतामिति निष्ठितां प्रपद्यते धर्मस्थूणा राजꣳश्रीस्तूपमहोरात्रे द्वारफलके ॥ इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह ॥ यन्मे किञ्चिदस्त्युपहूतः सर्वगणसखायसाधुसंवृतः । तां त्वा शालेरिष्टवीरा गृहान्नः सन्तु सर्वत इति ततो ब्राह्मणभोजनम् ॥ ४ ॥ अथातो मणिकावधानमुत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षतानरिष्टकाँ(सुमनसः कपर्दिकान्)श्चान्यानि चाभिमङ्गलानि तस्मिन्निनोति मणिकꣳ समुद्रोऽसीत्यप आसिञ्चत्यापो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद्गृणते वयोऽधादित्यापोहिष्ठेति च तिसृभिस्ततो ब्राह्मण-भोजनम् ॥ ५ ॥ अथातः शीर्षरोगभेषजं पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि चक्षुर्भ्यां श्रोत्राभ्यां गोदानाच्छुबुकादधि । यक्ष्मꣳशीर्षण्यꣳरराटाद्विवृहामीममित्यर्द्धश्चेदवभेदकविरूपाक्ष श्वेतपक्ष महायशः । अथो चित्रपक्ष शिरो मास्याभिताप्सीदिति क्षेम्यो ह्येव भवति ॥ ६ ॥ उतूलपरिमेः हस्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसल(मेव)वि त्रिः परिषिञ्चन्परीयात् परित्त्वा गिरेरहं परिमातुः परिस्वसुः परिपित्रोश्च भ्रात्रोश्च सख्येभ्यो विसृजाम्यहम् ॥ उतूल परिमीढोऽसि परिमीढः क्व गमिष्यसीति स यदि भ्रम्याद्दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयात्परित्वा ह्वलनो ह्वलनिर्वृत्तेन्द्रवीरुधः ॥ इन्द्रपाशेन सित्त्वा मह्यं मुक्त्वाऽथान्यमानये दिती क्षेम्यो ह्येव भवति ॥ ७ ॥ शूलगवः स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्य औपासनमरण्यꣳ हृत्वा वितानꣳसाधयित्वा रौद्रं पशुमालभेत साण्डं गौर्वा शब्दाद्वपाꣳश्रपयित्वा स्थालीपाक-मवदानानि च रुद्राय वपामन्तरिक्षाय वसाꣳस्थालीपाकमिश्राण्यवदानानि जुहोत्यग्नये रुद्राय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति च वनस्पतिस्विष्टकृदन्ते ॥ दिग्व्या-घारणं व्याघारणान्ते पत्नी सञ्याजयन्तीन्द्राण्यै रुद्राण्यै शर्वाण्यै भवान्या अग्निं गृहपतिमिति लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो बलिꣳ हरति यास्ते रुद्र पुरस्तात्सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्र दक्षिणतः सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्र पश्चात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्रोत्तरतः सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नमो यास्ते रुद्राधस्तात्सेनास्ताभ्य एष ते बलिस्ताभ्यस्ते नम इत्यूवध्यँल्लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनत्यनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वाऽनुवाकाभ्यां नैतस्य पशोर्ग्रामꣳहरत्येतेनैव गोयज्ञो व्याख्यातः पायसेनानर्थलुप्तस्तस्य तुल्यवया गौर्दक्षिणा ॥ ९ ॥ अथ वृषोत्सर्गो गोयज्ञेन व्याख्यातः कार्तिक्यां पौर्णमास्याꣳ रेवत्यां वाऽऽश्वयुजस्य मध्येगवाꣳसुसमिद्धमग्निं कृत्वाऽऽज्यꣳसंस्कृत्येहरतिरिति षट् जुहोति प्रतिमन्त्रं पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ॥ पूषा वाजꣳसनोतु नः स्वाहेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पौष्णस्य जुहोति रुद्रान् जपित्वैकवर्णं द्विवर्णं वा यो वा यूथं छादयति यं वा यूथं छादयेद्रोहितो वैव स्यात्सर्वाङ्गैरुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वित्तमः स्यात्तमलङ्कृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालङ्कृत्य एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण ॥ मानः सासजनुषाऽसुभगा रायस्पोषेण समिषा मदेमेत्येतयैवोत्सृजेरन्नभ्यस्थमभिमन्त्रयते मयोभू-रित्यनुवाकशेषेण (वामे चक्रं दक्षिणे त्रिशूलꣳ)। सर्वासां पयसि पायसꣳ श्रपयित्वा ब्राह्मणा-न्भोजयेत् पशुमप्येके कुर्वन्ति तस्य शूलगवेन कल्पो व्याख्यातः ॥ १० ॥ अथोदककर्माद्विवर्षे प्रेते मातापित्रोराशौचꣳशौचमेवेतरेषामेकरात्रं त्रिरात्रं वा शरीरमदग्ध्वा निखनत्यन्तःसूतके चेदो-त्थानादाशौचꣳसूतकवन्नात्रोदककर्म द्विवर्षप्रभृति प्रेतमाश्मशानात्सर्वेऽनुगच्छेयुर्यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनाच्छा-लाग्निना दहन्त्येनमाहितश्चेत्तूष्णीं ग्रामाग्निनेतरं सञ्युक्तं मैथुनं वो याचेरन्नुदकं करिष्यामह इति कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते कुरुध्वमित्येवेतरस्मिन् सर्वे ज्ञातयोऽपोऽभ्यवयन्त्यासप्तमात्पुरुषाद्द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शमाद्वा समानग्रामवासे यावत्सम्बन्धमनुस्मरेयुरेकवस्त्राः प्राचीनावीतिनः सव्यस्यानामिकयाऽपनो-
द्यापनः शोशुचदघमिति दक्षिणामुखा निमज्जन्ति प्रेतायोदकꣳ सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त
उदकमित्युत्तीर्णाञ्छुचौ देशे शाड्वलवत्युपविष्टांस्तत्रैतानपवदेयुरनवेक्षमाणा ग्राममायान्ति रीती-
भूताः कनिष्ठपूर्वा निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोरमयं गौरसर्षपाँस्तैल-
मालभ्याश्मानमाक्रम्य प्रविशन्ति त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वी-
रन् क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमाꣳसं प्रेताय पिण्डं दत्त्वाऽवनेजनप्रत्यवनेजनेषु नामग्राहं
मृन्मये हताꣳ रात्रीं क्षीरोदके विहायसि निदध्युः प्रेतायात्र स्नाहीति त्रिरात्रꣳशावमाशौचं दश-
रात्रमित्येके न स्वाध्यायमधीयीरन् नित्यानि निवर्तेरन्वैतानवर्जꣳ शालाग्नौ चैकेऽन्य एतानि कुर्युः
प्रेतस्पर्शिनो ग्रामन्न प्रविशेयुरानक्षत्रदर्शनाद्रात्रौ चेदादित्यस्य प्रवेशनादि समानमितैरः पक्षं द्वौ
वौऽऽशाचमाचार्ये चैवं मातामहयोश्च स्त्रीणां चाप्रत्तानां प्रत्तानामितरे कुर्वीरन् ताश्च तेषां प्रोषित-
श्चेत्प्रेयाञ्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरनतीतश्चेदेकरात्रं त्रिरात्रं वाथ कामोदकान्यृत्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्श्वशुरसखिसम्बन्धिमातुलभागिनेयानां प्रत्तानां चैकादश्यामयुग्मान्ब्राह्मणान्भोजयित्वा माꣳस-
वत्प्रेतायोद्दिश्य गामप्येके घ्नन्ति पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवाँश्चेन्निवर्तेत चतुर्थः
संवत्सरं पृथगेके न्यायस्तु न चतुर्थः पिण्डो भवतीतिश्रुतेरहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्या-
त्पिण्डमप्येके निपृणन्ति ॥ ११ ॥ पशुश्चेदाप्लव्या गामग्रेणाग्नीन्परीत्य पलाशाखान्निहन्ति परिव्यय-
णोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत्परिपशव्ये हुत्वा तूष्णीमपराः पञ्च वपोद्धरणं
चाभिघारयेद्देवताश्चादिशेदुपाकरणनियोजनप्रोक्षणेषु स्थालीपाके चैवं वपाꣳहुत्वाऽवदानान्यवद्यति
सर्वाणि त्रीणि पञ्च वा स्थालीपाकमिश्राण्यवदानानि जुहोति पश्वङ्गं दक्षिणा यद्देवते तद्दैवतं यजे-
त्तस्मै च भागं कुर्यात्तं च ब्रूयादिममनुप्रापयेति नद्यन्तरे नावं कारयेन्न वा ॥ १२ ॥ अथातोऽवकीर्णि-
प्रायश्चित्तममावास्यायां चतुष्पथे गर्दभं पशुमालभते निर्ऋतिं पाकयज्ञेन यजेताप्स्ववदानहोमो भूमौ
पशुपुरोडाशश्रपणं तां छविं परिदधीतोर्ध्वबालामित्येके संवत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयनथा-
परमाऽऽज्याहुतीर्जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा ॥ कामाभिदु(द्रु)ग्धोऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्म्यभिदु(द्रु)ग्धोऽस्मि कामकामाय स्वाहेत्यथोपतिष्ठते सम्मा सिञ्चन्तु मरुतः समिन्द्रः सम्बृहस्पतिः सम्मायमग्निः सिञ्चतु प्रजया च धनेन चेत्येतदेव प्रायश्चित्तम् ॥ १३ ॥ अथातः सभाप्रवेशनꣳ-सभामभ्येति सभाङ्गिरसि नादिर्नामासि त्विषिर्नामासि तस्यै ते नम इत्यथ प्रविशति सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ ॥ यो मानविद्यादुपमास तिष्ठेत्सचेतनो भवतु शꣳसथे जन इति पर्षदमेत्य जपेदभिभूरहमागमविराडप्रतिवाइयाः ॥ अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन इति स यदिमन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते यात एषा रराट्या तनूर्मन्योः क्रोधस्य नाशनी ॥ तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः ॥ द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्य-सहासावित्यथ यदि मन्येत द्रुग्धो यमिति तमभिमन्त्रयते तां ते वाचमास्य आदत्ते हृदय आदधे यत्र यत्र निहिता वाक्तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यमधरोमत्तांद्यस्वेत्येतदेव वशीकर-णम् ॥ १४ ॥ अथातो रथारोहणं युङ्क्तेतिरथꣳ सम्प्रेष्य युक्त इति प्रोक्ते सा विराडित्येत्य चक्रे अभिमृशति रथन्तरमसीति दक्षिणं बृहदसीत्युत्तरं वामदेव्यमसीति कूबरीꣳ हस्तेनोपस्थमभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृशत्यङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनुसञ्चरन्तं दूरेहेतिरिन्द्रियवान्पतत्रि ते नाम्नयः पप्रयः पारयन्त्विति नमो माणिचरायेति दक्षिणं धुर्यं प्राजति (गवां मध्ये स्थापयति) अप्राप्य देवताः प्रत्यवरोहेत्सम्प्रति ब्राह्मणान्मध्ये गा अभिक्रम्य पितृन्न स्त्रीब्रह्मचारिणौ सारथी स्यातां मुहूर्त्तमतीयाय जपेदिहरतिरिहरमध्वमेके मास्त्विहरेतिरिति च स यदि दुर्बलो रथः स्यात्तमास्थाय जपेदयं वामश्विनारथो मा दुर्गे मास्तरोरिषदिति स यदि भ्रम्यात्स्तम्भमुपस्पृश्य भूमिं वा जपेदेष वामश्विना रथो मा दुर्गे मास्तरोरिषदिति तस्य न काचनार्त्तिर्न्न रिष्टिर्भवति या त्वा ध्वानं विमुच्य रथं यवसोदके दापयेदेष उ ह वाहनस्यापह्नय इति श्रुतेः ॥ १५ ॥ अथातो हस्त्यारोहणमेत्य हस्तिनमभिमृशति हस्तियशसमसि हस्तिवर्चसमसीत्यथावरोहतीन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारयेत्येतेनैवाश्वारोहणं व्याख्यातमुष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि त्वष्ट्रदैवत्यः स्वस्ति मा सम्पारयेति रासभमारोक्ष्यनभिमयन्त्रते शूद्रोऽसि शूद्रजन्माग्नेयो वै द्विरेताः स्वस्ति मा सम्पारयेति नावमारोक्ष्यनभिमन्त्रयते सुनावमित्युत्तरिष्यनभिमन्त्रयते सुत्रामाणमिति वनम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा सम्पारयेति गिरिमभिमन्त्रयते नमो रुद्राय गिरिषदे स्वस्ति मा सम्पारयेति चतुष्पथमभिमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा सम्पारयेति नदीमुत्तरिष्यन्नभिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा सम्पारयेति श्मशानमभिमन्त्रयते नमो रुद्राय पितृषदे स्वस्ति मा सम्पारयेति गोष्ठमभिमन्त्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा सम्पारयेति यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदꣳसर्वमिति श्रुतेः सिचाऽवधुतोऽभिमन्त्रयते सिगसि न वज्रोऽसि नमस्तेऽस्तु मा मा हिꣳसीरिति स्तनयित्नुमभिमन्त्रयते शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः शिवा नस्ताः सन्तु यास्त्वꣳसृजसि वृत्रहन्निति शिवां वाश्यमानामभिमन्त्रयते शिवो नामेति शकुनिं वाश्यमानमभिमन्त्रयते हिरण्यपर्ण शकुने देवानां प्रहितं गम ॥ यमदूत नमस्तेऽस्तु किन्त्वाकार्क्कारिणोऽब्रवीदिति क्षेम्यो ह्येव भवति लक्षण्यं वृक्षमभिमन्त्रयते मा त्वाशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः ॥ अङ्कुरास्ते प्ररोहन्तु निवाते त्वाऽभिवर्षत्वग्निष्टे मूलं मा हिꣳसीत्स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पत इति स यदि किञ्चिल्लभेत तत्प्रतिगृह्णाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति साऽस्य न ददतः क्षीयते भूयसी च प्रतिगृहीता भवत्यथ यद्योदनं लभेत तत्प्रतिगृह्य द्यौस्त्वेति तस्य द्विः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नात्वित्यथ यदि मन्थं लभेत तम्प्रतिगृह्य द्यौस्त्वेति तस्य त्रिः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नातु ब्रह्मा त्वा पिबत्विति ॥ अथातोऽधीत्याधीत्यानिराकरणं प्रतीकं मे विचक्षणं जिह्वा मे मधु षद्वचः। कर्णाभ्यां भूरि शुश्रुवे मात्वद्दःहार्षीः श्रुतं मयि ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे विश ॥ वाचा त्वा पिद्धामि वाचा त्वा पिद्धामीति (तिष्ठ प्रतिष्ठ) स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवत्वाप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम्। यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ १६ ॥

इति श्रीपारस्करगृह्यसूत्रे तृतीयकाण्डः समाप्तः ॥ ३ ॥

सं. ८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमृते अमृतं जुहोमि स्वाहेति वैष्णव्यर्चा यजुषा वाऽङ्कुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्योष्णꣳखिष्टमन्नं दद्याच्छक्त्या वाऽश्नत्सु जपेत् व्याहृतिपूर्वां गायत्रीꣳ सप्रणवाꣳ सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य सकृत्सकृदपो दत्त्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधु मध्विति च तृप्ताः स्थेति पृच्छति तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रीँस्त्रीन्पिण्डानवनेज्य दद्यादाचान्तेष्वित्येक आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यादघोराः पितरः सन्तु सन्त्वित्युक्ते गोत्रं नो वर्धतां वर्धतामित्युक्ते दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्वित्याशिषः प्रतिगृह्य स्वधावाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामित्यस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चत्युर्ज्जमित्युत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यो विश्वेदेवाः प्रीयन्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति दैवे वाचयित्वा वाजेवाजेवतेति विसृज्यामावाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्योपविशेत् ॥ ३ ॥
अथैकोद्दिष्टमेकोऽर्घ एकं पवित्रमेकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति
तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरताः स्म
इतीतरे ॥ ४ ॥ ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि
सतिलगन्धोदकानि पूरयित्वा त्रीणि पितृणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना
इति द्वाभ्यामेतेनैव पिण्डो व्याख्यातोऽत ऊर्ध्वꣳसंवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः
स्यात् ॥ ५ ॥ आभ्युदयिके प्रदक्षिणमुपचारः पूर्वाह्णे पित्र्यमन्त्रवर्जं जपः ऋजवो दर्भा यवैस्ति-
लार्थाः सम्पन्नमिति तृप्तिप्रश्नः सुसम्पन्नमितीतरे ब्रूयुर्दधिवदराक्षतमिश्राः पिण्डा नान्दीमुखा-
न्पितृनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने
नान्दीमुखान्पितृन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः
प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति न स्वधां प्रयुञ्जीत युग्माना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयेदत्र ॥ ६ ॥ अथ तृप्तिर्ग्राम्याभिरोषधीभिर्मासं तृप्तिस्तद्भाव आरण्याभिर्मूलफलैरोषधीभिर्वा सहान्नेनोत्तरास्तर्पयन्ति छागोस्रमेषानालभ्य क्रीत्वा लब्ध्वा वा न स्वयं मृतानाहृत्य पचेन्मासद्वयं तु मत्स्यैर्मासत्रयं तु हारिणेन चतुर औरभ्रेण पञ्च शाकुनेन षट् छागेन सप्त कौर्मेणाष्टौ वाराहेण नव मेषमाꣳसेन दश माहिषेणैकादश पार्षतेन संवत्सरं तु गव्येन पयसा पायसेन वा वार्ध्रीण-समाꣳसेन द्वादश वर्षाणि ॥ ७ ॥ अथाक्षय्यतृप्तिः खड्गमाꣳसं कालशाकं लोहच्छागमाꣳसं मधु महाशल्को वर्षासु मघाश्राद्धꣳहस्तिच्छायायाश्च मन्त्राध्यायिनः पूताः शाखाध्यायी षडङ्गविज्येष्ठ-सामगो गायत्रीसारमात्रोऽपि पञ्चाग्निः स्नातकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी द्रोणपाठको ब्राह्मोढा-पुत्रो वागीश्वरो याज्ञिकश्च नियोज्या अभावेऽप्येकं वेदविदं पङ्क्तिमूर्द्धनि नियुञ्ज्यात् ॥ आसहस्रा-त्पङ्क्तिं पुनातीति वचनात् ॥ ८ ॥ अथ काम्यानि भवन्ति स्त्रियोऽप्रतिरूपाः प्रतिपदि द्वितीयायाꣳस्त्री-जन्म श्वास्तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पञ्चम्यां द्यूतर्द्धिः षष्ठ्यां कृषिः सप्तम्यां वाणिज्य-मष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारका एकादश्यां धनधान्यानि द्वादश्यां कुप्यꣳ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्यामभावास्यायाꣳसर्वमित्यमावास्यायाꣳसर्वमिति ॥ ९ ॥ ॥ ॥ ॥

इति कात्यायनप्रोक्तं पारस्करगृह्यसूत्रस्य परिशिष्टं समाप्तम् ।

श्रीकात्यायनोक्तं त्रिकण्डिकास्नानसूत्रम् ।

अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्योरुद्गृहीति तोयमामन्त्र्यावर्तयेद्येतेशतमिति सुमित्रियान इत्यपोऽञ्जलिनाऽऽदाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्कटिं वस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्म्मानिति स्नात्वोदिदाभ्य इत्युन्मज्य निमज्योन्मज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति ततोऽभिषिञ्चेदिमम्मे वरुणेति चतसृभिर्माप उदुत्तमं मुञ्चन्त्ववभृथेत्यन्ते चैतन्निमज्योन्मज्याचम्य दर्भैः पावयेदापोहिष्ठेति तिसृभिरिदमापो हविष्मतीर्द्देवीराप इति द्वाभ्यामपोदेवा द्रुपदादिव शन्नो देवीरपाꣳ रसमपोदेवीः पुनन्तुमेति नवभिश्चित्पतिर्म्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद् द्रुपदादिवायङ्गौरिति वा तृचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम् ॥ १ ॥ उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य त्रिराचम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्द्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाशक्ति विभ्राडित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् दर्भेषु दर्भपाणिः स्वाध्यायञ्च यथाशक्त्या-दावारभ्य वेदम् ॥ २ ॥ ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णुꣳ रुद्रं प्रजापतिं देवाँश्छन्दाꣳसि वेदानृषीन् पुराणाचार्यान् गन्धर्वानितराचार्यान्संवत्सरञ्च सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो मनुष्यान् यक्षान् रक्षाꣳसि पिशाचान्सुपर्णान् भूतानि पशून् वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामिति ॐकारपूर्वं ततो निवीती मनुष्यान्। सनकञ्च सनन्दनं तृतीयञ्च सनातनम्। कपिलमासुरिञ्चैव वोढुं पञ्चशिखन्तथा। ततोऽपसव्यं तिलमिश्रं कव्यवाडनलꣳ सोमं यममर्यमणमग्निष्वात्तान् सोमपो बर्हिषदो यमाँश्चैके। यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नम इति "एकैकस्य तिलैर्मिश्राँस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन्। यावज्जीवकृतं पापं तत्क्षणादेव नश्यति जीवत्पितृकोऽप्येतानन्याँश्चेतर उदीरतामङ्गिरस आयन्तु न ऊर्ज वहन्ती पितृभ्यो ये चेह मधुव्वाता इति तृचञ्चपन् प्रसिञ्चेत्तृप्यध्वमिति त्रिर्नमो व इत्युक्त्वा मातामहानाञ्चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवानतर्पिता देहाद्रुधिरं पिबन्ति वासो निष्पीड्याचम्य ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिङ्गैरर्चयेदृश्रꣳ हꣳस इत्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्योऽद्भ्योऽपाम्पतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृष्टे देवागातुविद इति विसर्जयेदेष स्नानविधिरेष स्नानविधिः ॥ ३ ॥ इति श्रीकात्यायनोक्तं त्रिकण्डिकास्नानसूत्रं समाप्तम् ॥

॥ अथ भोजनसूत्रम् ॥

अथातः श्रुतिस्मृतीरनुसृत्य भोजनविधिं व्याख्यास्यामः ॥ आचान्तो धृतोत्तरीयवस्त्रो धृतश्रीखण्ड-गन्धपुण्ड्रो भोजनशालामागत्य गोमयेनोपलिप्य शुचौ देशे विहितपीठाधिष्ठितो नित्यं प्राङ्मुखो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न दक्षिणामुखो न प्रत्यङ्मुखो न विदिङ्मुखो श्रीकामश्चेत्प्रत्यङ्मुख सत्यकामश्चेदुदङ्मुखो यश-
स्कामश्चेद्दक्षिणामुखो जीवन्मातृकवर्जं हस्तपादास्येषु पञ्चस्वार्द्रो नीवारचूर्णैर्गोमृदा भस्मनोद-
केन वा मण्डलं कुर्याच्चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलाकृति वैश्यस्याभ्युक्षणः
शूद्रस्य यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ॥ एवं मण्डलभस्मैतत्सर्वभूतानि रक्षत्विति तत्र
भूमौ निहितपात्रेऽन्ने परिविष्टे पितुन्नुस्तोषमित्यन्नꣳ स्तुत्वा मानस्तोके नमो वः किरिकेब्भ्यो
नमः शम्भवायेत्यभिमन्त्र्य प्रोक्षयेत् ॥ सत्यं त्वर्त्तेन परिषिञ्चामीति प्रातर्ऋतं त्वा सत्येन परिषिञ्चा-
मीति सायं तेजोसि शुक्रमस्यमृतमसीति यजुषाऽन्नमभिमृश्याऽग्निरश्म्मीत्यात्मानमग्निं ध्यात्वा
भूपतये भुवनपतये भूतानां पतये इति चित्राय चित्रगुप्ताय सर्वेभ्यो भूतेभ्यो नम इति दिवा
प्रणवादिकैः स्वाहा नमोऽन्तैर्मन्त्रैः प्रतिमन्त्रं बलीन्हरेदन्तश्चरति भूतेषु गुहायां विश्वतोमुखः ॥ त्वं
ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदममृतोपस्तरणमसि स्वाहेति विष्णुमन्त्रम-
भिध्यायन्नाचम्यान्नममृतं ध्यायन्मौनी हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुतीर्जुहोति प्राणाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदनाय स्वाहेति क्रमं याज्ञवल्क्यो मन्यत उदानाय स्वाहेति शौनकबौधायनौ याज्ञवल्क्योदितक्रमो वाजसनेयिनां दन्तैर्नोपस्पृशेज्जिह्वया ग्रसेदङ्गुष्ठप्रदेशिनीमध्यमाभिः प्रथमामङ्गुष्ठमध्यमानामिकाभिर्द्वितीयामङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयां कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीꣳसर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमीमङ्गुष्ठानामिकाग्राह्यान्नेनैता आहुतय इति हारीतव्याख्यातारः सर्वाभिरेता इति बौधायनः ॥ मौनं त्यक्त्वा प्राग्द्रवरूपमश्नीयान्मध्ये कठिनमन्ते पुनर्द्रवाशी स्यान्मधुरं पूर्वं लवणाम्लौ मध्ये ॥ कटुतिक्तादिकान्पश्चाद्यथासुखं भुञ्जीत भुञ्जानो वामहस्तेनान्नन्न स्पृशेन्न पादौ न शिरो न बस्तिं न पराभोजनꣳ स्पृशेदेवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय ॥ "मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः ॥ तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु" इति ॥ १ ॥ पितृतीर्थेन दत्वाऽमृतापिधानमसि स्वाहेति हस्तगृहीतानामपामर्धं पीत्वाऽर्धं भूमौ निक्षिपेत् ॥ "रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् ॥ अर्थिनाꣳसर्वभूतानामक्षय्यमुपतिष्ठतु" इति तस्माद्देशादपसृत्य गण्डूषशलाकादिभिस्तर्जनीवर्जमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य्शोधयेन्न भार्यादर्शनेऽश्नीयान्न भार्या सह न सन्ध्ययोर्न मध्याह्ने नार्धरात्रे नायज्ञोपवीती नार्द्रशिरा नार्द्रवासा नैकवासा न शयानो न ताम्रभाजने न भिन्नेन राजतसौवर्णशङ्खस्फाटिककाँस्यभाजनवर्जं न लौहे न मृन्मये न सन्धिस्ँस्थिते न भुवि न पाणौ न सर्वभोजी स्यात्किञ्चिद्भोज्यं परित्यजेदन्यत्र घृतपायसदधिसक्तुपललमधुभ्यः साध्वाचान्तो दक्षिणपादाङ्गुष्ठे पाणिं निःस्रावयेदङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ॥ ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुगिति श्वात्राः पीता इति नाभिमालभेत अमृता इत्यतः प्राग् "अगस्त्यं वैनतेयं च शनिञ्च वडवानलम्। आहारपरिणामार्थं स्मरेद्भीमञ्च पञ्चमम्" ॥ इत्युदरमालभ्य "शर्यातिं च सुकन्याञ्च च्यवनं शक्रमश्विनौ ॥ भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयते" इति स्मृत्वा मुखशुद्धिं कुर्यान्नमो भगवते वाजसनेयाय याज्ञवल्क्याय नमो भगवते वाजसनेयाय याज्ञवल्क्याय ॥ ॥ ॥

इति परिशिष्टे भोजनसूत्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रमसूत्र-
पारस्करगृह्यसूत्र-परिशिष्टप्रकरणानि समाप्तानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ वेदपारायणविधिः शुक्लयजुर्वेदानुवाकसूत्राध्यायश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॥ अथ वेदपारायणविधिः ॥ ॥ स्थण्डिलं कल्पयित्वा तत्राग्निमुपसमाधाय संपरिस्तीर्य्याज्येनैताभ्यो देवताभ्यो जुहोति अग्नये सोमायेन्द्राय विश्वेभ्यो देवेभ्यऽऋषिभ्यऽऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै प्रज्ञायै मेधायै धारणायै श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषये सोमाय काण्डऽऋषये अग्नये काण्डऽऋषये विश्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः संहिताभ्यो देवताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्य ऋग्गणेभ्योऽनुमत्यै स्विष्टकृते च पृथक्स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिषिञ्चति ॥ समाप्ते चैता यजुषा तर्प्पयति। एवमृग्वेदस्य काण्डऽऋष्यादिवर्ज्यमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यो देवताभ्यः क्षुद्रसूक्तेभ्यो महासूक्तेभ्यो महानाम्नीभ्य इति ॥ ततो वेदादिमारभ्य सन्ततमधीयीतेत्याह भगवान्बौधायनः ॥ इति वेदपारायणोपक्रमविधिः ॥

अथ वेदपारायणे कलशप्रतिष्ठापनादिप्रकारः ॥ तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ॥ कलशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदृढं तत्र सुनिर्णिक्तं विभूषितम् ॥ पुष्पपल्लवमालाभिश्चन्दनैः कुङ्कुमादिभिः ॥ मृत्तिकाभिश्च सम्मिश्रवेदिमध्ये न्यसेत्ततः ॥ पञ्चाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः ॥ स्नापितः स्थापितः कुम्भे चतुर्बाहुश्चतुर्मुखः ॥ वत्सजान्वाकृतिं दण्डमुत्तराग्रैः कुशैः कृतम् ॥ ब्रह्मोपधाने दत्त्वा तं ततः स्वस्त्ययनं पठेत् ॥ प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते ॥ यज्ञोपवीतनैवेद्यवस्त्रचन्दन-कुङ्कुमैः ॥ स्रग्धूपदीपताम्बूलैरक्षतैश्च पितामहम् ॥ ब्रह्मजज्ञानमिति वा गायत्र्या वा प्रपूजयेत् ॥ उपाध्यायश्च सम्पूज्यो यथापाठं पठेत्ततः ॥ इति वेदपारायणे कलशप्रतिष्ठापनादिप्रकारः ॥

अथानश्चत्पारायणविधिः ॥ अथातोऽनश्चत्पारायणविधिं व्याख्यास्यामः ॥ आसमाप्तेर्नाश्नीयात् यथाशक्ति वाऽऽपः पयः फलान्योदनं वा हविष्यमल्पं भुक्त्वा तदाशेषमधीयीत ॥ ग्रामात्प्राची-मुदीचीं वा दिशमुपगम्याग्निमुपसमाधाय परिस्तीर्येद्ध्मं प्रदायाज्येनैताभ्यो देवताभ्यो जुहोति ॥ अग्नये सोमायेन्द्राय प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्य ऋग्भो यजुर्भ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतय अनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काण्डऽऋषये सोमाय काण्डऽऋषये विश्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः संहिताभ्यो देवताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्य ऋग्गणेभ्य अनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिषिञ्चति ॥ समाप्ते चैता यजुषा तर्पयति एवमृग्वेदिकानां काण्डऽऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महानाम्नीभ्य इति ॥ ततो वेदादिमारभ्य सन्ततमधीयीत ॥ नास्यान्तरानध्यायो नास्यान्तराजननमरणे अशुची नान्तरा व्याहरेन्नान्तरा विरमेत् यावदन्तमधीयीत ॥ यद्यन्तरा विरमेत् त्रीन् प्राणायामानायम्य प्रणवं वा प्रणिदाय यावत्कालमधीयीत ॥ ततः सर्वं निशो निशान्तरं सङ्ग्रामारण्यसलिलं प्रलोप्य परिदध्यात् ॥ आदावन्ते च ब्राह्मणभोजनं दक्षिणादानं च दद्यात् ॥ परातेन विधिना वेदमधीयीत ततः स पूतो वेदो भवति मनःशुद्धश्च भवति द्वाभ्यां पारायणाभ्यां ऋग्भिश्च भोजन इहाधीते अनृतेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमुच्यते त्रिभिर्बहुभ्यः पातकोपपातकेभ्यः शूद्रायां रेतः सिक्त्वा गंगासु निमज्जँश्च भवति ॥ चतुर्भ्यः शूद्रान्नभोजनात्तत्सेवनात्तत्स्त्रीसेवनाच्च ॥ पञ्चभिरयाज्ययाजनात्पूतो भवति ॥ अग्राह्यग्रहणाद्ग्राहणादभ्यासोपासन्नाच्च षड्भिर्ब्राह्मणस्य लोहितकरणात् स्त्रीलोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतिसम्प्रयोगाच्च सप्तभिः प्राजापत्यानां हीनाचरणात् ॥ यज्ञोपवेधनाच्च अष्टभिश्चान्द्रायणस्यान्तरानाचरणाद्गुरुतल्पगमनाद्रजस्वलागमनाच्च नवभिः सुरापानाच्च दशभिरश्रोत्रिययाजनात् असोमपानात् अन्यायतश्च एकादशभिर्ब्राह्मणहननाद्गर्भहननाद्द्वादशभिः पूर्वजन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गलोकं गच्छति पितॄन् स्वर्गलोकं गमयति अग्निष्टोमादीन् क्रतून्यजति तैः क्रतुभिरिष्टं भवति ॥ वेदाध्यायी सदैव स्याद्यथा हि सत्यवाक् शुचिः ॥ यं यं कामयते कामं तं तं वेदेन साधयेत् ॥ असाध्यं नास्ति यत्किंचिद्ब्रह्मणो हि फलं महत् ॥ ब्रह्मणो हि फलं महदिति समाप्तौ यजुषा तर्पयतीति ॥ समाप्ते वेदपारायणे समाप्ते एता देवताः पूर्वोक्ता अग्निसोमाद्यजुषा तर्पयति यजुर्वेदपारायणे तस्य वेदस्य प्राधान्यमुच्यते ॥ अथवा भूरादिव्याहृतिचतुष्टयात्मकं यजुः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्देन गृह्यते ॥ तेनैतदुक्तं भवति ॥ भूर्देवाँस्तर्पयामीति अनेन प्रकारेण तर्पयित्वा अग्निसोमादीँ-स्तर्पयेदिति ॥ नास्यान्तरा जननमरणे ॥ अशुची इति नाशुचिहेतुभूते इत्यर्थः ॥ नान्तराव्याहरे-दिति ॥ उपक्रान्तवेदपारायणमध्ये न व्याहरेन्नाध्यापयेत् तथा लौकिकवचनमपि न ब्रूयात् ॥ विहितं नित्यनैमित्तिकं कर्मानुपयुक्त्वा वक्तिं न कुर्यादित्यर्थः ॥ निशो निशान्तरम् सङ्ग्रामारण्य-सलिलं लोप्य परिदध्यादिति लोप्य छित्त्वा परिहार्य्य वर्जयित्वेत्यर्थ इति यावत् ॥ परिदध्यात् समापयेत् ॥ निशान्तरं निशीथः सन्ध्या वा ॥ सलिलं वृष्टिरुदकसमीपभूमिका वा निशादि-कालान्देशाँश्च वर्जयित्वा समापयेदित्यर्थः ॥ ततः स पूतो वेदो भवतीति वेदो भवति वेदात्मको भवति उत्कृष्टज्ञानवान्भवेदित्यर्थः ॥ द्वाभ्यां पारायणाभ्यां ऋग्भिश्चेति ऋग्भिः पावमानीभिः पारायणद्वयं पावमान्यश्च मिलित्वोक्तफलाय कल्प्यते इत्यर्थः ॥ एवमुत्तरत्र पारायणत्रयं गंगास्नानं च मिलित्वा साधनम् ॥ निमज्जँश्च भवति पूतो भवतित्यर्थः ॥ प्राजापत्यानाचरणं प्रक्रान्तप्राजा-पत्यानामननुष्ठानम् एवं चान्द्रायणस्यानाचरणं यज्ञोपवेधनं यज्ञविनाशः ॥ इत्यनश्नत्पारायणविधिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुवाकसूत्राध्यायः ॥

॥ श्रीगणेशाय नमः ॥ ॐअथानुवाकान् वक्ष्यामि ब्रह्मणा निर्मितान् पुरा ॥ शिष्याणामुपदेशाय यज्ञसँस्कार एव च ॥ विप्राणां यज्ञकालेषु जपहोमार्चनादिषु ॥ इषेत्त्वैका वसोः पवित्रं तिस्रोऽग्नेव्व्रतपते सप्त पवित्रेस्थो द्वे शर्म्मासि तिस्रो धृष्टिरसिशर्म्मासि द्विकौ देवस्य त्वा पञ्च प्रत्युष्टꣳरक्षस्तिस्रो दशैकत्रिꣳशत् ॥ अनु० १० ॥ मंत्राः ३१ ॥ अ० १ ॥ कृष्णोसिषडग्नेवाजजित्तिस्रो मयीदमग्नीषोमयोःपञ्चकावग्नेदब्धायोचतस्रः संवर्च्चसापञ्चाग्नये कव्यवाहनायषट् सप्तचतुस्त्रिꣳशत् ॥ अनु० ७ ॥ मंत्राः ३४ ॥ अ० २ ॥ समिधाग्निंभूर्भुवःस्वश्चतुष्कावग्निर्ज्योतिर्द्वे उपप्रयन्तः षड्विꣳशतिर्भूर्भुवःस्वश्चतस्रो गृहामातिस्रः प्रघासिनःपञ्च पूर्णादर्विर्द्वे अक्षन्नमीमदन्तषडेषते सप्त दशत्रिषष्टिः ॥ अनु० १० ॥ मंत्राः ६३ ॥ अ० ३ ॥ एदंद्वे महीनांपयश्चतस्र आकूत्याऋक्सामयोर्द्विकौ व्व्रतङ्कृणुतषडेषतेचतस्रो वस्व्यसितिस्र एषतेद्वे शुक्रन्त्वाचतस्रोऽदित्यास्त्वगष्टौदश सप्तविꣳशत् ॥ अनु० १० ॥ मंत्राः ३७ ॥ अ० ४ ॥ अग्नेस्तनूरापतयेचतुष्कौ तप्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यनीमेद्वे इन्द्रघोषस्तिस्रो युञ्जतेऽष्टौ देवस्यत्वाचतस्रो देवस्यत्वापश्च विभूरसि चतस्रो ज्योति-
रसिषड्रुविष्णोतिस्रो दश त्रिचत्वारिꣳशत् ॥ अनु० १० ॥ मंत्राः ४३ ॥ अ० ५ ॥ देवस्यत्वा-
षडुपावीरसिपञ्च माहिःषट् सन्तेतिस्रः समुद्रङ्गच्छहविष्मतीर्द्विकौ हृदेत्वापश्च देवस्यत्वाष्टावष्टौ
सप्तत्रिꣳशत् ॥ अनु० ८ ॥ मंत्राः ३७ ॥ अ० ६ ॥ वाचस्पतयऽउपयामगृहीतोसित्रिकावावायो-
यंवांद्विकौ यावामेका तम्प्रत्क्नथाचतस्रो यंवेनोयेदेवासस्त्रिकाविन्द्रायमूर्द्धानंद्विकौ यस्त्त एका
प्राणायमेतिस्रो मधवऽइन्द्राग्नीऽआगतमाघौमासश्चर्षणीधृतोविश्वेदेवासऽआगतेन्द्रमरुत्वोमरुत्व-
न्तंवृषभंमरुतान्त्वौजसेसजोषाऽइन्द्रमरुत्वाँ२ऽइन्द्रंमहाँ२ऽइन्द्रोमहाँऽ२इन्द्रएकैकोदुत्त्यमष्टौ पंचवि-
ꣳशतिरष्टाचत्वारिꣳशत् ॥ अनु० २५ ॥ मंत्राः ४८ ॥ अ० ७ ॥ उपयामगृहीतोस्यादित्येभ्यः
पञ्च वाममद्द्यद्वे सुशर्म्मास्येकाबृहस्पतिसुतस्यद्वे हरिरसिचतस्रः समिन्द्रणोष्टौ माहिरेजतुद-
मास्यःपञ्चकावातिष्ठुयुक्क्ष्वाहींन्द्रमिदेकैका यस्मान्नद्वेऽग्नेपस्वोत्तिष्ठन्नदश्रमुदुत्त्यमेकैकाऽजिग्घद्वे
विनऽइन्द्रवाचस्पतिंविश्वकर्म्मन्नेकैकाग्नयेस्त्वाचतस्र इहरातिस्तिस्रः परमेष्ठीदश त्रयोविꣳशतिस्त्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्टिः ॥ अनु० २३ ॥ मंत्राः ६३ ॥ अ० ८ ॥ देवसवितश्चतस्र इन्द्रस्यवज्रः पञ्च देवस्याहंदशा-
पयेतिस्रो वाजस्येममष्टावग्निरेकाक्षरेणैषते चतुष्कौ सविताद्वे अष्टौ चत्वारिꣳशत् ॥ अनु० ८ ॥
॥ मंत्राः ४० ॥ अ० ९ ॥ अपोदेवाश्चतस्रः सोमस्यत्त्विषिःपञ्चावेष्टाःसप्त सोमस्यत्त्वाचतस्र इन्द्र-
स्यवज्रःपञ्च स्योनासि चतस्रः सवित्रेकाश्विभ्याश्चतस्रोऽष्टौ चतुस्त्रिꣳशत् ॥ अनु० ८ ॥ मंत्राः
३४ ॥ अ० १० ॥ युञ्जानऽएकादश प्रतूर्त्तꣳषोडश देवस्यत्त्वा दशाऽऽपोदेवीर्द्वादशापोह्येकादशादि-
तिष्ट्वापञ्चाऽऽकूतिमष्टादश सप्त त्र्यशीतिः ॥ अनु० ७ ॥ मंत्राः ८३ ॥ अ० ११ ॥ दृशानःसप्तदश
दिवस्परिद्वादश समिधाग्निंपञ्चदशापेतसप्तदशा सुन्वन्तं त्रयोदश याऽओषधीःसप्तविꣳशतिर्मा-
मांषोडश सप्त सप्तदशꣳशतम् ॥ अनु० ७ ॥ मंत्राः ११७ ॥ अ० १२ ॥ मयिगृह्णामिपंचदश दश-
ध्रुवासि मधुवाताऽएकादशकौ सम्म्यक्स्रवन्तिनवेमम्माषडपान्त्वैकाऽयम्पुरःपञ्च सप्ताष्टापञ्चाशत्
॥ अनु० ७ ॥ मंत्राः ५८ ॥ अ० १३ ॥ ध्रुवक्षितिः षट् सजूर्ऋतुभिर्भूर्द्धावयोर्द्दिकाविन्द्राग्नीऽ-
आयुर्म्मेषट्कावाशुस्त्रिवृदेकाऽग्नेर्भागोस्येकयाचतुष्कावष्टावेकत्रिꣳशत् ॥ अनु० ८ ॥ मंत्राः ३१ ॥

सं. ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० १४ ॥ अग्नेजातान् पञ्च रश्मिमनासत्यायचतस्रो राज्ञस्ययम्पुरःपंचकावग्निर्मूर्द्धैकोनत्रिꣳशत्
येनऽऋषयोऽष्टौ तपश्चनव सप्त पञ्चषष्टिः ॥ अनु० ७ ॥ मंत्राः ६५ ॥ अ० १६ ॥ नमस्तेषोडश
हिरण्यबाहवऽउष्णीषिणेतक्षब्भ्योज्येष्ठायपञ्चकाः स्रुत्यायचतस्रः शम्भवायैका पार्ष्यायपञ्च
द्रापेऽअन्धसोविꣳशतिर्नव षट्षष्टिः ॥ अनु० ९ ॥ मंत्राः ६६ ॥ अ० १६ ॥ अश्मन्नूर्जंदश
नमस्तेपञ्चाग्निस्त्तिग्मेननव चक्षुषःपिताष्टावाशुःशिशानःसप्तदशोदेनंक्रमद्ध्वमग्निनापंचदशकौ
शुक्रज्योतिःसप्तेमꣳस्तनंत्रयोदश नवैकोनशतम् ॥ अनु० ९ ॥ मंत्राः ९९ ॥ अ० १७ ॥ वाजः-
सत्यमूर्कचतुष्काऽअश्मग्निस्त्रिकावक्षुःपञ्चैकाचतस्रो वाजायद्वे वाजस्यन्वष्टावृताषाड्त्रयोदशा-
ग्निंयुनज्मिसप्त षदाकूताद्वार्त्रहत्यायदशकौ त्रयोदश सप्तसप्ततिः ॥ अनु० १३ ॥ मंत्राः ७७ ॥
अ० १८ ॥ स्वादीन्त्वैकादश देवायज्ञंकिꣳशतिः सुत्ररावन्तꣳसप्तदशोदीरतात्रयोदशाऽयाजानुर्दश
सोमोराजाष्टौ सीसेनतत्रꣳषोडश सप्त पञ्चनवतिः ॥ अनु० ७ ॥ मंत्राः ९५ ॥ अ० १९ ॥ क्षत्रस्य-
योनिस्त्रयोदश षद्देवादशाब्भ्यादधाम्यष्टौ योभूतानाञ्चतस्रः समिद्धऽइन्द्रऽएकादश आयात्त्वष्टौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समिद्धोऽअग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादश नव नवतिः ॥ अनु० ९ ॥ मंत्राः ९० ॥ अ० २० ॥ इमम्मेसमिद्धोऽअग्निरेकादशकौ वसन्तेनऽऋतुनाषड् होतायक्षत्समिधाग्निद्वादशाऽश्विनौछागस्यसप्त देवम्बर्हिश्चतुर्दश षडेकषष्टिः ॥ अनु० ६ ॥ मंत्राः ६१ ॥ अ० २१ ॥ तेजोसिपञ्चाग्नय एका हिङ्कारायद्वे तत्सवितुर्दश विभूर्मात्रैका कायद्वे आब्ब्रह्मँस्त्रयोदश शेषादेकैकोनविꣳशतिश्चतुस्त्रिꣳशत् ॥ अनु० १९ ॥ मंत्राः ३४ ॥ अ० २२ ॥ हिरण्यगर्भोषःप्राणतोद्विकौ युञ्जत्यष्टौ वायष्ट्वापञ्च प्राणायतिस्त्र उत्सक्थ्याद्वादश गायत्रीकस्त्वाषट्कौ कःस्विदष्टौ कास्विद्दश सुभूःस्वयम्भूस्तिस्त्र एकादश पञ्चषष्टिः ॥ अनु० ११ ॥ मंत्राः ६५ ॥ अ० २३ ॥ अश्वस्त्वूपरोधूम्म्रान्वसन्तायसमुद्रायशिशुमारान्मयुःप्राजापत्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥ अनु० ४ ॥ मंत्राः ४० ॥ अ० २४ ॥ शादन्दद्भिर्नवैकैकाहिरण्यगर्भश्चतस्त्र आनोदश मानोमित्रोयदश्वस्याष्टकौ यत्तेषडिमानुकंद्वे पञ्चदश सप्तचत्वारिꣳशत् ॥ अनु० १५ ॥ मंत्राः ४७ ॥ अ० २५ ॥ अग्निश्चपञ्चदशोच्चातऽएकादश द्वौ षड्विꣳशतिः ॥ अनु० २ ॥ मंत्राः २६ ॥ अ० २६ ॥ समास्त्वादशो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्द्धाऽअस्यपीवोऽअन्नाद्वादशकावभित्त्वेकादश चत्वारः पञ्चचत्वारिꣳशत् ॥ अनु० ४ ॥ मंत्राः ४५ ॥ अ० २७ ॥ होतायक्षदेकादश देवम्बर्हिर्द्वादश पुनरप्येवं चत्वारः षट्चत्वारिꣳशत् ॥ अनु० ४ ॥ मंत्राः ४६ ॥ अ० २८ ॥ समिद्धोऽअञ्जन्नेकादश षदक्रन्दस्त्रयोदश समिद्धोऽअद्यद्वादश केतुङ्कृण्वँश्चतुर्विꣳशतिश्चत्वारः षष्टिः ॥ अनु० ४ ॥ मंत्राः ६० ॥ अ० २९ ॥ देवसवितःषट् तपसेकौलालꣳषोडश द्वौ द्वाविꣳशतिः ॥ अनु० २ ॥ मंत्राः २२ ॥ अ० ३० ॥ सहस्त्रशीर्षाषोडशाद्ध्यःषट् द्वौ द्वाविꣳशतिः ॥ अनु० २ ॥ मंत्राः २२ ॥ अ० ३१ ॥ तदेवसप्त वेनस्तन्नव द्वौ षोडश ॥ अनु० २ ॥ मंत्राः १६ ॥ अ० ३२ ॥ अस्याजरासःसप्तदशाऽऽपश्चिद्द्वादश विब्भ्राट्चतुर्दश प्रवावृज एकादश प्रवायुम्प्रवीरयापञ्चदशकावानस्त्रयोदश सप्त सप्तनवतिः ॥ अनु० ७ ॥ मंत्राः ९७ ॥ अ० ३३ ॥ यज्ञाग्यतः पञ्चनद्यःसोमोधेनुमाकृष्णेनपूषन्तवदशकानतष्टौ षडष्टपंचाशत् ॥ अनु० ६ ॥ मंत्राः ५८ ॥ अ० ३४ ॥ अपेतोदशाघं द्वादश द्वौ द्वाविꣳशतिः ॥ अनु० २ ॥ मंत्राः २२ ॥ अ० ३५ ॥ ऋचंवाचꣳषोडश द्यौःशान्तिरष्टौ द्वौ चतुर्विꣳशतिः ॥ अनु० २ ॥ मंत्राः २४ ॥ अ० ३६ ॥ देवस्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्वादश यमायत्त्वैकादश द्वावेकाविंशतिः ॥ अनु० २ ॥ मंत्राः २१ ॥ अ० ३७ ॥ देवस्यत्त्वाष्टौ-
यमायत्त्वाक्षत्रस्यत्त्वादशकौ त्रयोऽष्टाविंशतिः ॥ अनु० ३ ॥ मंत्राः २८ ॥ अ० ३८ ॥ स्वाहा-
प्प्राणेभ्यःषडुग्रश्चसप्त द्वौ त्रयोदश ॥ अनु० २ ॥ मंत्राः १३ ॥ अ० ३९ ॥ ईशावास्यमष्टावन्धन्त-
मोनव द्वौ सप्तदश ॥ अनु० २ ॥ मंत्राः १७ ॥ अ० ४० ॥ दशाध्यायेसमाख्याताऽनुवाकाः सर्व-
संख्यया ॥ शतंदशानुवाकाश्च नवान्ये च मनीषिभिः ॥ १ ॥ सप्तषष्टिश्चितो ज्ञेयाः सौत्रे द्वावि-
शतिस्तथा ॥ अश्व एकोनपञ्चाशत् पञ्चत्रिंशत्खिले स्मृताः ॥ २ ॥ शुक्रियेषु तु विज्ञेया एकादश
मनीषिभिः ॥ एकीकृत्य समाख्यातं त्रिशतं त्र्यधिकं मतम् ॥ ३ ॥ इत्यनुवाकसूत्राध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदपारायणविधिरनुवाकसूत्राध्यायश्च समाप्तः ।

ो द्वौ चतुर्विंशतिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu